स्त्वैकैः स्वनिश्वासैः क वीहि निजमुखनासिकानिश्वसितैः हत्वा नैमी हृदयं उदयंती नितरां व्याकुलादयायस्य ए
वं भूतं अतिसत्रपं विदधुः वक्तुः अतिदीनां स्तान्दृष्ट्वा नैमी नितरां स रूपा भूदिति भावः॥ नैम्या हृदयभूतं प्राणभूतं
प्राणरूपं नलं स्वनिःश्वासैः सद्रूपं चक्रुरिति वा॥ ९७॥ भट्टिरिति॥ तुच्छ ही रानि निःशोकस्थायिभावस्य करुण
गप्रस्थरसस्याथवा जलस्पंदीन स्यामूर्तिमत्या देवताया भावं लंभिता प्रापिता कुलदेवतास्थानि स्थापिता तन्नि
श्वासैः करुणरसार्द्रीकृतचित्ता सती असौ भैमी सपदि इमं मा प्राप्नोरिति नितरां दुःखिता तस्मादतिसुंदरीर्मत्सखीरे
ति त्योदेही त्वं जले योजनेनार्थोऽत्रातमेवास्यपर्थ्यसंप्राप्त्ययोग्या रूपकुलशीलादिना तेषां त्वायत्ति समुचिता निज
सखीः स्वसहचरीस्ताते नृपत्रातेभ्यो राजभ्यो दापयामास तेभ्यः सखीदानेनानीमं प्रावर्त्तयदित्यर्थः॥ ते राजानोऽपि
विदर्भाकुलानात् रूढं गमने देहत्यागविषयमनोयैस्ते तेषां प्राणानां वांछामासिः सखीभिर्वि जहुः नैमी सखीलाभात्

प्रारब्धगमना आप्राणास्तु नर्त्यवर्त्तयन्नित्यर्थः॥ यतः किंभूतासि सख्यो नेभ्यां सकाशात् इंद्रादिदेवेभ्यः वरप्राप्तया
दक्षिकशरीरनिर्माणादिरूपं विद्यां संप्राप्य अस्य सम्यग् अभ्यस्य सततं प्रत्यहं धृता वयस्या या नेभ्यां अनुकारो यास्तिः तु
ल्यशरीरकलाकौशलास्मिरित्यर्थः॥ ततश्च सर्वं पित्रे मी प्राप्तिं बुध्येव स्वप्राणानारक्षितवंत इति भावः॥ लिंग्नि द्विकर्मा
॥ सख्याः आख्यातोपयोग इत्यपादानत्वं॥ ९०॥ अहह इति॥ अथ राजन्यः सखीदानानंतरं महेन्द्रेण इंद्रेण सह श्रि
यासंपदा प्रतिष्ठा माहात्म्यं ताभ्यां समानि स्वं निजं निलयं स्थानं अनि लक्ष्मीस्तत्प्रतिष्ठासमोन जिगमिषति नलेन न
सो गगनात्सकाशात् पारिजातादिदेववृक्षाणां पुष्पवृष्टिरपतत्॥ अहह इति हर्षे नेभ्यानले दृष्टे इष्टे दैवैर्नलस्यो
परि पुष्पवृष्टिः कृतेत्यर्थः॥ ९१॥ उत्ते इति॥ बद्धाधृता मूर्त्तिर्यया सा मूर्त्तिं बध्वाय त्वा मूर्त्त्या बद्धायुता साकारा गलंत्या प
तंतोऽलयो भ्रमरा यत्रैवं विधं मधुवद्वाष्पो यस्याः अधः पतनजं [illegible] नितंदुःखमुक्तसनिःश्वासजलाश्रुविंदवो यस्याः
एवंभूताऽमरभर्तुः इंद्रस्य कीर्त्तिर्दिवा पुष्पानां च्युतत्वात्कीर्त्तित्वांनेभ्या बाष्पतत्वादिंद्रस्य कीर्त्तिर्गलिते [illegible] तियुक्ते
स्वर्गादध्यःपाते दुःखादश्रु च युक्तं स्त्रीणां चाश्रु मकज्जलं भवति॥ मकरंदो वाष्पः स्थानि तदनुगता भ्रमराः कज्ज
लस्थाने॥ समानशब्दस्य समासांत्यत्वात् तत्वात्ताद्धा तुल्यार्थयो अपाचा वा न्यथा नेति दृष्टा यार्थमनुप्रासार्थं वसाद्धा

नै·टी·१४

त्सहस्रा इः प्रयोजितो प्रतिष्ठास मानइतिसमवप्रेतितङ्गो विधानात्सर्ववत्सनइतितङ् ॥ एणी स्वस्येति ॥ तदा
स्वर्गगमनसमयेऽमुं नृपतिं नलं त्यजद्भिरमरैः अंशस्यस्वावयवस्य छिदा कर्त्तनं तया यत्केदनं दुःखं तदिवाध्य
गामिप्रापिपत स्वस्येंद्रादेरंशो लोकपालांशत्वाद्राज्ञः स्वहस्तादिकर्त्तनेया दृग्दुःखं नवतितादृशमिव तेषां नल
परित्यागे जातमिति भावः। यांतीस्वर्गं प्रतिगच्छंती वाग्देवतापि नैमीमिदं पुनरप्युनः वाहुश्च वलितग्रीवं यथात
थापत्रपणिस्म। किंभूतां निजविभ्रमणं स्वीयवचनचातुर्यादिविलासानां धामस्थानभूतां ॥ किंभूता उत्का कियत्स
हस्रात्रानुभूतगुणगणप्रेमभरतया मनोत्कंठा परित्यक्तुमशक्तेत्यर्थः ॥ अन्योप्यन्यत्र गच्छन्निजं विलासं पृष्ठ हस्तु
त्कं मन्त्रिहृत्सपञ्चपतिं उरुषाणां उरुषेषु स्त्रीणां च स्त्री उसौहार्दमिति नलपरित्यागे तेषां भैमीपरित्यागे च दे
व्याः सोत्कंठतायुक्ता निजं सारस्वतं विलासं पृष्ठं याती तिवा ॥ छिदेति षिच्छिदा द्विषोइ ॥ १०॥ स्नानंइमिति ॥
सभीमएकः भूमीपती राजा तनुजाया भैम्या विवाहनं पाणिग्रहणं तस्य क्षणे महे महोत्सवे विषये मांगलिकतू
र्यवादनादिकं मंगलं स्नानं दसहर्षं यथा तथा चकार ॥ वैदर्भी निषधेश्वरो च दो क्षणमात्रं तत्र स्थितावेव अस्त
यकान्नृपजना राजसंघा नृपानीवाये ऊनाः सवकास्तेषां अनिष्टो कयं कर्णकठोराणिया निष्ठ पादी षा

पन्नैव बना नितांसां नितरां दृष्टये परिमार्जनाय अश्रु नववचनानाकर्णनायत्वन्नगीतवाद्यं बकुलप्रेंखणीयका
दि दर्शनश्रवणादिरूपं मंगलं भजतः स्म चक्राते ॥ अ मैलं नाकर्णनीयमिति निषेधाकूतवाद्यं कर्णनमाजिन
मंगलपरिहारं चक्रतुः । बहवः सर्वे धराधिपाश्च राजानो पि स्वानि शिबिराणि सेनानिवेशान् उद्दिश्य पलदीकृत्य
यांतो गच्छंतः संतः प्राप्त भैमीसहशादयितः पटहनिस्वनादिरूपं मंगलमातिनिरे च चक्रुः ॥ वाद्यानि वादय
यामासुरित्यर्थः । एतच्च सर्वं क्रमात् । पूर्वं भैमीमखकारानंतरं भैमीनलौ चक्राते ततो राजानश्चक्रुरिति क्रमः ॥
किं वैको द्वै बहवः इति क्रमः । तथा स्वकारस्त्वजत स्मातेनिरे इति च क्रमः ॥ सानंदमिति सर्वत्र वा मंबंधनीयं
श्रेष्ठजामात्वा श्रीमस्य हर्षः । परस्परलाभाद्भैमीनलयोः सुंदरं भैमीसखीलाभाद्राज्ञामिति ज्ञेयं यथा
संख्यं विवाहनं एपंता अवं सकेनावेल्लुद्दितिलुदः ॥१०१॥ श्रीहर्षमिति ॥ शारदीना शारत्का लीनाज्योत्स्नावं दि
कातद्वद्रछो निर्मला निर्दोषा प्रसन्ना ज्ञारजनिका वंशो जनता उक्तिर्यस्य तस्य श्रीहर्षस्य कवेः कृतौ महाकाव्ये
चतुर्दशानां पूरणः सर्गः समाप्तः ॥ ॥ चतुर्दशानां पूरणं इत्यर्थे तस्य पूरणे डटिति डट् शारदिनेति सम्यांउ
निर्देः इति हउ प्रत्यये प्राप्ते शारत्कालदिवांजइ इति समस्या अव्युका ॥१०२॥ ॥ इति श्री वेदरकरोपनाम्न

 मान्नरसिंहपंडितात्मजनारायणकृते नैषधीयप्रकाशे चतुर्दशः सर्गः समाप्तः ॥१४॥ श्रीरस्तु ॥छ॥

॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥

१५

नै०टी०२५

श्रीरघुनाथायनमः॥ ॥अथेति॥ अथभैम्यास्वयंवरेवरणस्रजामधूकमालयांचितस्रजितःसनिषधावनी
पतिर्नलोप्येवंदेवान्प्रसाद्यभैम्यानलेष्टतेताभ्यांवरान्दत्वादिवेषुप्रारब्धस्वर्गगमनेषुसत्स्वनंतरंभीमेनसंनि
वासार्थंरचितांनिजांस्वीयांनलेनैववाकारितांपटमयदूष्यादिरूपांउपकार्यांत्रियासीत्ययौ॥ किंकुर्वन्
अन्येषांवंदितांसाधारणेनस्तुबहूनिवस्तूनिवर्षन्भैम्यागुणानांकीर्त्तनमासामस्त्येनकुर्वतीतिकृतस्तेषां
तुवंदिनांविशिष्यविशेषंकृत्वावर्षन्अन्यापेक्षयातेभ्योधिकंप्रयच्छन्॥वंदिनांसंबंधसामान्येषष्ठी॥श्र
धनदानस्यस्तुबहुत्वमेवविष्टृणोति॥तथेति॥अयंनलःप्रथितत्यागंकीर्त्यर्थंसाधारणेनदीयमानंधनंतया
तेनप्रकारेणवितीर्णवान्दत्तवान्॥यथायेनप्रकारेणमागधेवंदिजातिविशेषेःअतिभाराधिगमेनाति
शयितगुरुत्वप्राप्त्याबहुतरत्नबद्धधनस्यवोढुमशक्तेःपरिपूर्णत्वाच्चनिरपेक्षत्वाच्चगणीतंतंटणवक्षपक्रंरत्न
निकायंरत्नसमूहंउच्चकैर्नितरांउत्सुकोऽहमहमिकयाग्रहीतुंप्रवृत्तोलोकःउत्कंठ्यपतितेनमणुकागणं
चिरंबहुकालंविकायउत्क्षिप्तपादिदेशःरत्ननिकायंप्रयोगः॥त्यज्यतेत्यागोवर्जनंकर्मणिक्षञ्चवितीर्णनिवानीति
पावेत्यागमितित्राविघञ्॥दानंब्वकरोत्यर्थः॥निकायंइतिनिवासचितिनिघञादेशश्चकः॥उच्छमितिरूपकं॥उ

१

त्वैकैर्बहुमूल्यं रत्ननिकायमितिवा॥ अनेनास्पदानश्वरत्वमुक्तं॥ उच्छेदोधान्पत्र। स्वादानं रत्नादानेनतोपच
रिकः॥ विक्रायेतिविक्रेयाषा वेरितिकर्त्वं॥ यात्रपेति॥ अस्याविवहन्नस्पतइत्यप्रदुक्षेतत्स्तदूत्पन्यापिनैमिष्यहत्ता
निराजकानिष्टपसंघोस्तानिरंजयंतीत्येवंश्रीलास्तदनुजीविनोलोकास्तेषांमृषारोषारोपनरूपावाक्तस्य
नलस्यतयोर्वाभैमीनलयोःकवयःप्रबंधवक्तारोवंदिनश्चप्राकृताद्विजाषावर्णनचतुरास्तेषांवर्णनैःकृ
दंभितिरस्कृतानितेषांप्रचुरतरतारस्वरवर्णनतिरोहितत्वात्स्यावाकाम्यांनाकर्णितेत्यर्थः॥ वागवाङ्मूतेत्यत्र
रूपाहृताध्वनिमात्रंश्रुतंनत्वर्थस्पष्टः कःशब्द अस्फुट इतिवा॥ असौकः मदसिनानादेशामिलितजनसमा
जेतत्समक्षंस्त्रियांत्वयात्मंबंधीदस्यनलस्यलज्जानस्यात्अपितुलज्जयात्नविलंबमुक्तेनभवतयाजातं इति
निर्लज्जोयमित्येकावाक्॥ तथाऽतिरूपःसुंदरोजनःश्रीरामचंद्रजानकीवल्लभतःसुरक्षाजनंसुखस्था
नं अपितुरूपवान्जनोऽद्यःखेदेविनिवृष्टत्वात्तद्रूपयोरनयोरपिऽद्यःखंनविंतैवेत्यन्यावाक्॥ वागवाङ्मूतेतिविरो
धाभासः॥ सदसिस्त्रियात्वयाध्वेत्तोलज्जास्यनस्यात्अन्यस्पतुस्यादेवेतिअयंनिर्लज्जः अतिसुरूपस्त्वनवा
हश्रीजनोनैमीप्राप्तिजनितसुखव्राजनंकृतोपितुनारूपवान्हि रम्यांप्रियांनलनतेऽतोरूपवंतोभवंतोपि

कृ५

नै०टी०१५

रम्यां प्रियां न लज्जेतेति स्वयं प्रत्युप्रतिमेव कवचनमिति वा॥ अति रूपो प्रेमी लक्षणो जनः सुखभाजनमपि
तुना॥ एवं भूतानां राज्ञामप्राप्तिरिति वा॥ अमृदुदृशां त्रदः ग्रन्थे उपदेत्सदादिङ्ड्वशङ्डुतिकस्ति टृग्रहशावहुष्य
सर्वनाम्न इत्याद्वि॰ दमो सिदर्दा डुरित्सुत्स्वटि द्वाण जिति डी पू॥ अवा कुरुतेति पद द्वयं॥ ॥ राजकीये निर्दा
यां सतायामपि तयोर्निर्दोषत्वमाह अदोषतामिति॥ द्विषी मृषा ऽविद्यमानस्य दोषकणस्य दोषलेशस्याधिरो
पणं आरोपः सतां अदोषतामेव निर्दोषत्वमेव विद्वद् एवेत प्राकृते न कथयंति॥ कथं यतः सत्से दूषणे सत्यवि
द्यमाने ऽलीकमसत्यमवद्यमाधातुमारोपयितुं खलानां जातु कदाचिदपि उद्यमः प्रयत्नारंभो न भवेत् सत्
ति दोषे विद्यमानत्वादेवनारोप्य॥ अयं तावदारोपेन तत्त्वा सति दोषे तदारोपणं निर्दोषतां वक्तीत्यु
क्तं तथापि परदोषाच्छादनमनुचितमित्यर्थः॥ सर्वथा नितौ निर्दोषावेतिभावः॥ सत्से दूषणे सति खलानाम
लीकं दोषमाधातुं उद्यमः कदाचिन्न भवेदपि तु सत्य दोषाभावे ऽलीकमपि दोषं वदंतीति तत्त्व निर्दोषत्वमेवा
गतमित्यर्थ इति वा॥ अथ च मते परब्रह्मस्वरूपे श्रीरघुनाथे विषये असति असाधो दूषणाख्ये राक्षसे अव
द्ये ऽपि अलीकमप्रियं कर्तुं उद्यमः किं कदाचिन्न च दपि तु रामवद्विषयेपि दूषणाख्येन राक्षसेना प्रियं

द्वौ

मे०

कर्तुमुद्यमः कृत एव तथापि यथा स निर्दोषस्तथा तैर्निर्दोषायां कृतायामपि निर्दोषावेव तावपीत्यर्थः॥ यद्वा वैदे
सीतायाः पातिव्रत्यपरिक्षणाद परिक्षितपरिग्रहादिदोषः सत्यपि परब्रह्मस्वरूपे श्रीरघुनाथे कदाचित्तेनैव वा
लीकं दोषमाधातुं प्रयत्नः किं न स्यादपि तु लोकः प्रयत्न एव। तथापि यथा तत्त्वतः स निर्दोष एव तथा तावपीत्यभि
वः॥ वैरिभिः सत्यमप्युक्तं अलीकं भवति दृष्टे घोद्यं तु किमुतेति मिथ्याचिंतं॥ द्विषां कर्तृ रिपिष्टं॥४॥ विदर्भेति॥ विद
र्भराजो पि उत्तमजामातृस्पृहा प्राग्रुक्मिण्यास्त्वत्तनूजया समं महात्मन अवरोधमंतःपुरं प्रविश्य नेमीन लं वरि
ष्यतस्यं वेति अनुजातः उनयतिः संज्ञायोस्याः तां देवीं नेमीमातरं त्वासंमउत्सवो चत्त। इति किं हेतुः लोके जामा
रि नले उत्कंठितेत्वं नलं जामातरं नैमीपतिं प्रतीच्छ जानीहि॥५॥ नामग्रहणमात्रेण सूचितस्य नलस्य गुणगण
वर्णयति॥ तवेति॥ यस्य तनुत्विषा कायकांत्या हेतुना मसृणः सौंदर्येण प्रसिद्धो मन्मथः स्तृणं इव किंचित्करः॥ तथा
यः कुलश्रिया वंशपरिशुद्ध्या कृत्वा कौलिन्यात् प्रसिद्धतराणामस्माकमप्यन्वयं पवित्रतापावनं कर्ता॥ अस्मिन्
पि महाकुलीन इत्यर्थः॥ जगत्त्रय्या नायकमेलके वरसमूहमध्ये ईदृशं ईदृग्गुणं नायकरत्नं वरं परिणेतारं वि
वेक्तुं निर्णेतुं परं केवलं तव सुता वेद जानाति नान्यो स्मदादिः। न विद्यते परः श्रेष्ठो यस्मादिति वरविशेषणं वा

नै०टी०१५

ति१

॥ पूर्वाफल्गुन्यः ॥ ६१ ॥ अथ स्वजातिविं मनीमः इति अहस्पष्टं तस्मच निर्णयो वांतः। उरा त्रिरगाद्यो चकारो विवाहत्वरीयो
नयति। इति किं हेमगी हस्तो हरिणे स्मृणं सुवासिन्यः नवत्य पाणिग्रहो विवाहस्तत्र रूपे मंगलेऽच्चिता। तथा स्त्री
णां समयत्राचारस्तं स्पृष्टं तिताये षिदाचार प्राप्ता दुर्गा दिकुलदेवता पूजा तैलयवारंभादि क्रिया स्तंजं तुऊर्वत्
। वर्यं तु पुनः श्रुतिस्मृतीनां विधीन् स्वरूपेण जुहोती त्यादीन्मधुपर्कादिकांश्च वैदिकान्स्मार्त्तांश्च विधीन् विदधी

६५

हि कर्म इति। एवमादि रूपतदानी मेव निर्गत इत्यर्थः। पाणिग्रहमंगले अच्चिताये षिदाचार रूपा हस्ता सुवासिनी
विशेषणं वा। समय स्पृशः स्पृष्टा मुदक इति किं नावयं त्रस्मदा हूयो स्वेतिब रुक्वनं। ॥ निरीयति। स्वपत
नीमेन निरीयांतः उराभृर्गत्य निरीक्षि तानमामो रूक्तिकानां ज्यो तिषिकानां मंसत स्वजात्रं शकं वैवाहिकं
लग्नं शसंसा स्वजनी मृत्तदातस्मिन् शके तनयांनलायदा तुं प्रच कर्मो मुहूर्त्त विलंबा तु रोधनप्रायमिकां छीत
स्मातनिविधीन्तत्र श्रिकरदित्यर्थः। किंभूतमं शकं अरीणैः सं स्पृष्टः जामित्रगुणे रूपलक्षितं तथा श्रुत्युवाघु
दयास्तमयप्रयुक्तदोषैर्निस्तुषं रहितं ग्रहाणां गुणदोषादि वृंज्योतिः शास्त्रादवगंतव्यं। निरीयद्गते। मो स्म
र्त्तिकाउ रूतेज्ञा रत्समरं मुक्तं वेदेत्यर्थे कतस्था दि तुष्ठा दित्वा त्रुका त्रंश मेवां शकं स्वार्थे कन्। अरीणोत्वा

३

दित्वादोदिक्तिश्चेतिति विशिष्टानैर्ध्वनिर्गतं तच्छुषात्॥ तुषोदोषलेश॥४१॥ अथेति॥ अथ लग्नांशकेसन्निहिते दूत
एवमुक्तवं यस्य मन्त्री मं नैषधमिति अवदत्॥ इति किं भवता मम कार्यं च बालायाः रूपयाऽनुकंप्यतां अंगीक्रिये
तां॥ बालायामनुगृहीतायां सर्वोपि मम वंशोनुगृहीतः स्यादित्यर्थः॥ तथापि चिरेण चिरंतनोऽस्माकं सर्वेषां
प्रसिद्धलक्षं बंधविषयो मनोरथकल्पांकुरं अद्यास्मिन् दिने त्वच्चरणोदकैः त्वदीयचरणोदकैः सिक्तः सन् पल्लववद् ६४
पल्लव इवाचरतु पल्लवितो भवतित्यर्थः॥ पल्लवसहितो भवत्वेकं वा पदं कंचन संदेहहरं प्रेष्यतां स विनयमाका २५
६२ यतिस्मेति नावः॥ अन्यत्रापि चिरसंवितो अंकुरो जलैः पल्लवितो भवति॥ स पल्लवतुङ्गाश्वारेकिं प्र॥४२॥ तथेति॥
सन्नलः दूतस्य वक्त्रादिव गर्भरात्कठोरा तथा पूर्वोक्तप्रकारेण यथाज्ञीमेनोक्तं तथैवोदितं नाम [illegible] प्रति
ध्वनिं प्रतिशब्दं निपीय सादरमाकर्ण्य इति ब्रुवन् तस्मै दूताय बहुप्रचुरं वस्त्रालंकारादि प्रदाय तं दूतं प्रजिघा
य प्राहिणोत्॥ इति किं हे दूत अहं व्रजामि इदानीमेव गच्छामि गत्वा च गुरोः श्वशुरस्य चरणौ वंदे नमस्करोमीति
प्रतिश्रावकत्वरूपेण न राजादेशानुवादस्य न्यूनाधिकता शंकापरिहृता॥ व्रजामि वंदे व र्द्धमानसामीप्य इति न
विषतिलह॥४३॥ निपीतेति॥ ततो दूतप्रत्यागमनानंतरं निपीतं सादरं श्रुतं दूतालपनं दूतवचनं येन स वि

नै०टी०५५

दर्शनत्वन्नीमः धृतादरः सादरः सन् नलमागमयांबकत्वप्रतीक्षितवान् पुनरपि दूतैरानाययति स्मेतिवा॥
यथा निशावसाने ब्राह्ममुहूर्ते कृतापर्तिकीनाम्रचूडस्य कुक्कुटस्य वाक्येन स्वरयां ग्रस्त्रचक्रवाको धृताद
रः सन् तपनं सूर्यं प्रतीक्षते कदा वा द्रक्ष्यतीति। चक्रवाकः स्त्री ताम्रचूड इत्यमरः॥२१॥ कापि चित्रिति॥ तदा नलाग
मनसमये काचित्स्त्री लेपनदाने सुधालेपचित्रादिकर्मणि पंडिता कत्रालाका चित्रमनीषु रक्ता तान्निर्मा
णार्थमेव सेनापिता सती स्वप्रार्थनावशात्कमप्यहंकारमतिमानमगात्प्राप। अनिर्वचनीयं गौरवं धृतवती सुधा
लेपादिचिकीरेत्यर्थः॥ चतुष्कनिर्माणार्थं हरिद्राचूर्णमिश्रितं तुलपिष्टं तस्य दाने आलेपकरणे कशलां का
चिद्धितेन स्मरणीयेवा प्रदेशे तस्या नैम्यास्त्रंगोद्वर्तने कशलेति वा। तयोर्भैमीनलयोर्वा। तथा काचित्स्त्रीदेशे अ
ल्पनिर्माणे मंडकरचनायां विदग्धया चतुरया। कयाचित्तुंगासने उच्चचतुरंगाद्यासने सन्निवेशनादुपवेश
नादितोऽतिशयादरो गौरवमलं निःप्राप्तं। उच्चासनसंनिवेशनादादरो वक्षितापत्रयात्राजनः प्राप्त इति वा जातावेकव
चनं॥ काश्चिच्चित्रादिकर्म काश्चिदालूपादि निर्माणं चक्रुरिति भावः॥२२॥ मुखानीति॥ तस्य पुरस्य तथा तत्संबं
धिनामखिलवेश्मनामपि मुखानि द्वारोपांतस्थानानि नानानिर्मुक्तायुक्तानां मणीनां रत्नानां मुक्तानां च मणि

नांववात्तोरणास्तैस्तुङ्गैर्निर्गतैः॥ अत एव पांथविलासस्तुच्छाय दूरं प्रसर्पणशीलानां पंथानां विलासमा
श्रितैः मराविनिः किरणैः तदावरागमनसमये प्रमोदहासेन हर्षजहास्येन छुरितानि मिश्रितानीव रेजि
रे॥ सर्वाण्यपि पुरद्वाराणि च स्फुक्कामणितोरणैरलंकृतानि सर्वं पुरं वसानंदमच्छूदितिभावः॥ हास्यांमुखेनवणि
तस्य पुरस्य संबंधिनां विस्मनामितिव्याख्याने नकेवलं पुरलोकानां सुखानि प्रमोदहासच्छुरितानि किंतु ग्रह
णमयीत्यपेरर्थः॥ तोरणान्तरेति पाठे तोरणात्पांथविलासमाश्रितैः उच्छाय दूरं प्रसर्पनशीलैरितिव्याख्ये
यं॥ पांथानामिति॥ पुटच्छिद्रानिर्वस्त्रच्छेदैर्निर्मिता॥ निश्राकालिकान्य समयजानि यस्मिन्काले यानि न जा
तिताद्दृढानि पुष्पाणि तेभ्यो जातास्तन्निर्मिताः स्रजः मालाः तदावरागमनसमये पथां पुरमार्गाणां वितान
तां उल्लोचत्वं अनीयंत प्रापिताः॥ किंभूताः यथा मालत्यादिपुष्पाणां वासस्तथाधिवासनात्सुगंधिद्रव्यैः प
रिमलारोपणात् मधुव्रतानामपि दत्तः विशिष्टो नमो याभिस्सर्वदा मधुन्यवये निवसंति तेषामपि छत्रनिमाणि
वितानि पुष्पाणीति तेषामपि दत्तश्चोत्तयः किंभूतान्येषामिति मधुव्रतपदेरेरिति॥ तस्मिंस्तु रे प्रजाः पौराजान
पदाश्च क्लिष्ठैरलंकारैः कंचुकिता नानारत्नकांतिच्छादितसर्वावयवाः संतः बन्धुसुभ्रुभिरेतन्मावर्णमा

नै॰टी॰१५

त्र कल्पिते भुवि निर्जीवेष्वपि रूपकेषु जीवन्नृत्याद्युत्पादनादिचमत्कारकरणाद्विचित्रैश्चित्रैः आश्चर्यकारिणि। कुड्य
लिखितनानावर्णरूपकैः स्थापितलिपिः। उज्ज्वलीकृतदीप्तयः गृहा बभुः। एवं जंगमस्थावररूपाण्यतयातत
था मणिकुट्टिमेषु मणिवद्भूमिभिः कृत्वा उर्व्याः स्वं सहजं मृन्मयं वपुः केनापि ब्रह्मादिना परिवर्तितोपमा
यस्य तत् स्वरूपान्तरं प्रापितमिव बभूव॥ पातालस्य रम्यतरत्वात् पातालान्मणिभूमिरुपरि जातमिवेत्यर्थः। इत्युत्प्रे
क्षा॥ परिवर्तिता विनिमयिता उपमा उपमानं स्वर्गादि येन। उपमानत्वेन प्रसिद्धस्य स्वर्गस्य उपमेयत्वं कृतं
स्वयं च तस्योपमानं जातमित्यर्थ इति वा॥ स्वरुच्या इति पाठे स्वगत्विकान्त्या परिवर्तितोपममिव बभूवेत्यर्थः।
मणिकुट्टिमैरुपलक्षिते पुरे वा॥ सर्वमपि तदा सालंकारं जातमिति भावः॥ कंचुकत्वात् कादि॥१५॥ तदेति॥
तदानललागमनसमये तस्मिन्पुरे घनं कांस्यतालादि वाद्यं घनं निविडं पद्यातयातथा निस्स्वानश्रद्धं चकार॥
तथा ततं वीणादिवाद्यं ततं विस्तृतं यथा तथा नितरां तनना दक्षाद्धं चकार। तथा सुषिराणि सच्छिद्राणि वंशादि
वाद्यानि उच्चैर्नितरां रागिणीनां राज्ञां श्रवांसि। तथा आनद्धं मुरजादि वाद्यमपि यत्नेन दंपतिमानवेनामानं
अपरिच्छेद्यं यथा तथा ध्वनीत। घनं दृढावयवं बहुसंख्यं वेति घनविशेषणं वा। तथा ततं स्वरूपेण विस्त

तं बऊसंरम्भाकं चेति ततविशेषणं वा ॥ तथा ऽयुक्ततया ऽमानं बऊसंरम्भमित्यानन्दविशेषणं वा ॥ चतुर्विधमपि वा
द्यं तत्र वादित्रमित्यर्थः । ततं वीणादिकं वाद्यमानद्धं मुरजादिकं ॥ वंशादिकं तु सुषिरं कांस्यतालादिकं घन
मित्यमरः ॥ राणितां अव्यक्तस्वरणती त्वावद्रूपकाधमर्ण्यरिति निनो राणीनि तेषां संस्कातां ॥ अध्वनी तत्रेताह
लादिरिति वृद्धिविकल्पः ॥ २६ ॥ विपंचिविरिति ॥ वेणुनिर्वंशध्वनिनिर्विपंचिवीणाध्वनिर्नाच्छादितेत्येव वेणुध्वनयः
प्रणीतं प्रारब्धं गीतं यैः श्रुतमध्यादि मूर्छनादिस्वरमुच्चैर्गायद्भि [illegible] र्गायकैर्गायक [illegible] गीतैर्नाच्छादिषतेति सर्व
त्र विपरिणामेनव्यारभ्यं । ऊर्ध्वे रैऽ ऊरारवैः कांस्यमयैर्वाद्यविशेषैः ध्वनिभिः सत्वातेपि गायकध्वनयो पिन
वैने वाच्छादिषत ॥ ढुंडुक्केन लघीयसा कांस्यमयवाद्यविशेषेण तेऊर ध्वनयो नाच्छादिताः ॥ ढक्कया वादित्रवि
शेषेण सोपि ढुंडुक्कध्वनिर्नाच्छादि ॥ मर्द्दलैर्मृदंगध्वनिभिः साढक्कापि नाच्छादि । ढक्कया तेपि मर्द्दलत्रिपि नाच्छादि
ताः ॥ अनपेक्षितगो रवला घवं वाद्यमात्रं तत्र मिलितं समस्थश्रुतिलानमाना अपि विपंच्यादिध्वनयः वादककौशल
तः प्रव्यक्तं भेदेनोपलब्धा इति भावः ॥ विपंच्यंते स्वरोस्यां विपंचिः श्रोणादिकइत्यत्ययांतः ॥ ६७ ॥ विचित्रेति ॥ विचित्राणि
नानाविधानि वादित्राणि तेषां निनादैर्मूर्छितः वार्द्धितः तथा सुतरां दूरसंचारी दूरसंचरन्नेशीलः जनता ऊनसंघ

यो ३

स्तस्यसुरवारवोसुरवन्नाहः पयोधिपूरे समुद्रप्रवाहे प्रतिनादेन प्रतिग्राह्येन पयोधिपूरस्य तटे प्रतिग्राह्यस्तेनवा
मेदुरः परिपुष्टः सन्नदिगंत दंतिनां दिक्प्रांतवर्त्तिदिक्पालहस्तिनां कर्णेषु नममो तत्कर्णेन पिपरि पूर्य
बहिर्निर्गत इत्यर्थः॥नानाजातीयमिश्रणादेकीभूतो ऽनन्नाह्वः दिगंतपर्यंतं समुल्ल लासेतिनादः॥मदूरे
तिपाठे सोतिमहानित्यर्थः॥२८॥उदस्येति॥अथ सर्ववाद्यवादनानंतरं पुरंध्रिवर्गः स्त्रीसमयइ कुलवृद्धसुवा
सिनीसमूहः चतुष्कसंज्ञेन नानावर्णककल्पितस्वस्तिकसर्वतोभद्रादिमंडनेन चावीरमणीया तिस्रकं
तिर्यस्य एवं भूते कूर्मपृष्ठवतु रस्वहस्तमात्रोच्छ्रितत्वादिसु कल्पिते वेदिकायाउदरे मध्ये ज्ञातकौंभजासु
वर्णघटिता कुंती रुदस्यो तत्क्षिप्य यथाकुलाचारं स्त्रीणां भैम्याश्च कुलाचारान तिक्रमेणाद्यमंगलं मंगलगी
तसर्वं यथा तथा तामवनी द्र कौ भैमी स्नपयांबभूव॥मंगलानंतरारंभ प्रश्नकालेन प्ययो अथेति वदनादिकोष्य
त्राह्वत्रांतर्ये द्वितीयस्तुमंगले इति ज्ञेयं यथाविधानं नरनाथनंदनामिति च पाठः॥स्नपयांबभूव मित्यांक्ष
स्व॥२९॥विजित्येति॥ताः कौंभ्यः तस्याः भैम्याः कुचयोर्द्वयेन गौरत्वकाठिन्यादिगुणातिशयेन विजितदास्या
दिवचारिहारितां जलवाहित्वं भावापिताः प्रापिताः प्रापिता इव वासत्यः आनैतैस्तुखैः सहकारशाखिनश्चा

दुपभा२

श्र८५

मरंदस्य शारदवांत्र पान्तरेणऊनितां म्लानिं वैवर्ण्यकालिमानमिवावाप्तुः वहंतिस्म। पराजितेऽपि द्वीन्तरेण
नत्रमुखेवा वारिहारिणी प्रापितः सन् म्लानिं धत्ते। कलत्री मुखे मांगलिकाश्रुतपस्त्वान्निर्दिष्यंतदृष्ट्यावारः। अ
वाप्तुः वहप्रापणे। लुङि॥२०॥ असाविति॥ ऊर्जितं जलाभिषेचनं यस्या अस्यैमी क्रमात् सितांशुना सितत्तं
तुना दुकूलेन तद्धोमांबरेण ज्वलाभूषिता सती वर्षास्विव शरदश्वतासां द्वयस्य संध्यया संधिना तदानवां तात्
कालिकी स ना भिता साधुसम्यक्त्व बंधौ॥ वर्षाश्चन्त जलाभिषेकात् शरच्छ्रीतांशुना चंद्रेण ज्वला। द्वयोः सं
धि रूपयगुणोपेतः वस्त्रपरिधानात् सर्वप्रावृट् सदृशी अनंतरं शरत्सदृशी जातेत्यर्थः॥२१॥ कचिह्नरेतिस्ति
कः॥ सा दिवं निर्निद तत्तुल्या जातेत्यर्थः॥ किंभूतां प्रावर्षास्तु प्रभिन्नैरति घनैः दूरं क्रिवंबिंदुदेर्दिनी हृतां अ
लक्षाविता अनंतरं शरदारं ने चंद्रद्युतिसुंदरी॥ किंभूता कचिद्दर्षता शिरोरुहौघेन केशपाशरूपेण घनेन
मेघेनोपलक्षितातथा दुकूलेनेव सितांशुना चंद्रेण ज्वला। जलाभिषेकस्थाने उदकदूरणां चंद्रचंद्रिकास्था
नेदुकूलं॥२२॥ विरेजिरइति॥ तस्याश्चिकुरोत्कराः केशसंघा विरेजिरे। किंभूताः गलतां निर्मलानां वारिवि
प्रुषां उदबिंदूनां कणं किरंति किराः विक्षेपकाः उदबिंदून्मुंचंत इत्यर्थः॥ किंभूता इव तमसः सदृशं दिसदृशा

नै० टी० २५

निःश्रतिश्यामा निखामराणि तेषां निर्ऊर्ध्येनाऽङ्किताः स्वीकृत्यसंगृहीताः सीताः शुभ्राः कीर्तिरूपाः मुक्तिकाः वमंत
खलु इवार्थः खलु वाक्ये ॥ लल्लवामरादप्यतिसुंदरस्तत्केशपाश इति भावः ॥ विभूषांकमणिषष्ठी ॥ ७ ॥ प्रदीयसे
ति ॥ सा भैमी अदत्त्वमधिकं अर्थ्यजात अश्रोन्नत ॥ किंभूता प्रदीयसा स्नानजलस्य प्रमार्जनेन प्रोंछनकारिणा
वाससा प्रदीयसा वाससा कर्तृणा स्नानजलस्य प्रमार्जनेन करणेन वा स्वर्णापेक्षया अधिकं यथा तथा उज्ज्व
लीकृता केव अश्मसाननाच्छिलो निजनाद्धेतोः प्रकाशं स्वर्णापेक्षयाति दीप्तं रोचिर्दीप्तिर्यस्याः सा हेमजसौ
वर्णी देवादीनां प्रतिमेव ॥ शिलाघर्षणाद्दीपितेति स्वर्णकारपरिभाषा ॥ प्रमार्जनेन प्रथमपंक्तेः नं द्योतित्वात्क
र्तेरिल्यु ॥ [illegible] तीयपक्षे साधवेल्युट् ॥ शातनेन [illegible] वादि कस्तस्मात्स्युट् ॥ ४६ ॥ तदेति ॥ सुवर्णं दरमीषत्स्फुटदि
कसत्कांचनकेतकीदलं तस्मात्सौरभं सौगंध्यं यद्यन्यस्यति [illegible] तदा तहितदंगस्य भैमीशरीरस्य कि त्वमे
विलासं विशिष्टां कांतिं वा बिभर्ति ॥ किंभूतस्य विलेपस्य कुंकुमकर्दमादेः अंगरागेण आमोदं मुंचति तस्य तथा
स्फुरंती रुक् दीप्तिर्यस्य स्वासाना विकगौरकांतिना ॥ अन्यं गामानंतरं अंगरागः कृत इति भावः ॥ यदिति हीति
मं बंधाद् अन्यस्यति विभर्त्तिसिन लिङ् लिट् ॥ क्रियानिष्पत्तिस्तु न विवक्षणीया ॥ ४७ ॥ आत्मवा पितायाइति ॥ स्वक

श्रि॰३

लासु गीतालंकरणादिषु कलासु विद्यासु पंडिताः कुशलाः सख्यः श्च विगोमयाद्यनुलिप्ते सर्वतोभद्रादिच
चित्रितं वेदिकायामं तरे मध्ये शृंगारस्थानं अवापितायाः प्रापिताया [illegible] स्तस्या नेम्याः प्रतिप्रतीकं प्रत
वयवं विरचनाद् बहुकालाभ्यासात् स्फुटं विनरतिशायि यमतएव न्दूषणेन प्रतिकर्म अलंकरणं निर्मसुक्ष्म
[illegible]॥ विनेत्रि॥ तेषां मंडनं विनापि श्रियां कांतीनामवधिः परमसीमा इयं नेमी विज्ञाभिरलंकारचतुराभिः
भूषिविशेषेण मंडि॥ अधिका अनलंकृतांगकांतितो धिककांतिरदर्शि वा परं इति विचारचातुरी एक
तरनिश्चयरूपविचारे शावी एवं कस्यास्तु न कस्यापि॥ इति किं॥ एषा भूषया भूर्वापेक्षया अधि अधिकं न वा का
स्ति॥ किं तु सा भूषैवानया नेम्या भूत्वाधिकं शोभते नेम्या भूषणानां च यस्परसंपर्कात् शोभातिशयो भूपते
तत्र भूषणैः नेम्याः शोभातिशयो न जातः किंतु नेम्या भूषणानामिति विवेकः कस्यापि नाभूदित्यर्थः॥ भूर्वापे
क्षयाधिकं वा शोभते स्मेति तत्त्वावगमः॥ भूषां विनापि श्रियामवधिरियं विज्ञाभिर्विशेषेण बहुना प्रयासेन भूषि
पूर्वापेक्षयाइयमधिका किमिति तारतम्यज्ञानार्थं पुनः पुनः विलोकिता च परमियं भूषणानाधिकास्ति किं
तु सा नयेतिता त्विक विचारचातुरी कस्यास्तु पुनः सख्या जातेत्यर्थः पितु कस्याश्चित् प्रयासेनालं कृत

नै०टी१५

पुनः रविलोक्यापि विज्ञातिरस्पनयामंडनेमंडितमितितारतम्यं न ज्ञातमेवपरं लक्षणानां वैयर्थ्यमाधारए
त्वं वा अधिकशोभाकारित्वं चेति किमपि न निश्चितं किंतु त्वं तास्याए व जानासि इत्यर्थः इतिवा॥ तस्या निरतिश
याकांतिर्जातेति भावः। पूर्वोक्ता चातुरी कस्यास्तु कस्याश्चिदेव विदुष्या न तु सर्वस्या इतिवा अलंकृतं तद्व
पुषैवमंडनमिति विचारचातुरीकस्य चिन्मल्लक्षणस्य महाप्राज्ञस्य कस्य ब्रह्मणो वास्तु मया श्रीहर्षेण ब्र
ह्मणा वा एवं निर्णीतं त्वाकांतेनान्येनेत्यर्थ इतिवा। कस्याः पुनर्न ज्ञाता अपि तु सर्वस्या अपीतिवा॥ १७॥ ति
लकप्रसाधनं वर्णयति॥ स्वच्छं प्राप्तमधराभ्यां लोचनाभ्यां च कृत्वा अंचनं मज्जनं जैनदंष्ट्रानेत्रे ए रमणीयमिति
यावत् एवंविधं तस्या मुखं नैमीमुखं कर्तुं मांगलिकं मनःशिलारक्तगौरधातुविशेष निर्मितं चित्रकं तिलकं ए
त्यप्राप्पबं धूकेन पयोजाभ्यां नीलोत्पलाभ्यां च खंजनेन मजाद्वयं कृत्वा० नेतरं कृतां विधाश्चंद्रसंबंधिनीं गंध
फल्या चंपककलिकया कृत्वा वलिः मजातं जनितां श्रियं कांतिं निर्मिंद॥ यदि कोपि बंधूकोत्पलेः चंद्रस्य
मजां कृत्वा चंपककलिकां वा चंद्रस्य शिरसि न्यस्यति तदा तां चंद्रलक्ष्मीं न्यक्करोतीति अलंकृतोपमेत्यर्थः॥
बंधूकस्याधरस्य नीलोत्पलयोर्लोचनयोश्चंपककलिकाया मनःशिलातिलकस्य चंद्रस्य वदनस्य चोपमोप

मेघनावः ॥ चंपको हेमपुष्पकः एतस्य कलिकागंधफलीत्यमरः ॥२६॥ श्लोकत्रयेण केशप्रसाधनं वर्णयति ॥ मही
ति ॥ कयापि केशप्रसाधनचतुरया सख्या तस्या भैम्या मूर्द्धजपाशः केशपाशस्तद्रूपा सौगंध्यादेर्घ्राणमंजरीप्रथ
मोद्भिन्नकलिकांकुरदंडः ॥ अबंधि संयुता ॥ किंभूता मंजरी महीमघोनां भूमींद्राणां मदनेन कामविकारेणत्वं ध
ताविवेकशून्यतासेवनमीतामसीरात्रिस्तस्यास्तमो रूपस्य पटस्यावरकत्वाद विवेकरूपस्यास्य तेनैव निर्माणे विष
यितं तत्संततिः स्वतंत्रपरंपरा तानकरूपा तथा धूपग्रहस्य धूपग्रहणेन धनस्य सच्छिद्रस्य धातुयमस्य करंडकादेः सं
बंधिनादस्यमानकर्पूरागरुचंदनादिपरिमलबहुलेषु लुब्धात दृष्ट्वा इति सुंदरी नितरां त्रपामारा जानो राज्ञोनी
पट्टवस्त्रादिकं परिधाय विचरंतीतिवा ॥ नलपराया अपि तस्याः केशपाशं दृष्ट्वा कामोद्रेकाद्विवेकशून्यता नव
तीतिवा ॥२७॥ पुनरिति ॥ काचन सखी तस्या भैम्याः मूर्द्धजः केशपाशस्तं तत्या मादृत्य पात्र धूपपर्यस्य धूमस्य मु
जः संयमं बंधनं कुर्वती ॥ तथा तत्स्फोति दर्शिनी नां सखीनां स्मितेरन्योन्यमुखविलोकनपूर्वविलसदीषद्धास्यैः त्र
त्वात् किं तः सकेशपाशस्त्रमेण धूपजधूमसंयमनरूपः निजः स्वीयः श्रमो यया ॥२८॥ बलस्येति ॥ कुटिलातिव
क्रांतस्याः कचच्छटाकुंतलश्रेणिः बलस्य बलभद्रस्य हलेन आकृष्टा सती घनैर्निविडैर्नगैस्तरंगैर्गुरा उच्चा

वचा कलिंदस्य पर्वतस्य कन्या यमुने व नातिसा कच्छटा तां यमुनां तदा तस्मिन्समये अर्पितैः शिरसि न्यस्तैः करु
णाख्य इव तस्य ऊर्मिलैः कलिका निर्जहास। यमुनापराकर्षणकृते न महीयसा नगेन परानेवेन तत्तुला शुभ्ररहित
त्वा। स्वयं तु स्वभावकुटिला पुनरपि कुसुमैरं चिता चेति हासो युक्त इत्यर्थः॥ अपामार्गोऽतिवक्रा शुभ्रालंकृता च तस्यो
ऊंतलश्रेणिरिति तात्पर्यं मे तस्मिन्निति भावः॥ सर्वं तु तत्तुल्यात्कृदि[illegible]दानीं त्वधिका जातेति भावः॥ जहासेवेति वा॥ यमु
नाकर्षणं हरिवंशादौ ज्ञेयं॥३१॥ ललाटप्रसाधनं वर्णयति॥ धृतेति॥ एतस्याः अलिके ललाटे या हाटकस्य सुवर्ण
स्य पट्टिका धृता सा केशानां बुदानां कुंतलरूपजलदानां तेषु वा विद्युदेव नृत्व॥ क्षणप्रभाया अस्त्वस्याः कथं स्थिरत्व
मित्यत्राह॥ सुखेंदोः संबंधवशाद्धेतोः सुधा जुषोऽमृतं सेवमानस्य तदायुषो विद्युद्वस्थानस्य स्थिरत्वं नियतं
निश्चितं अहमूहेन तर्कयामि॥ अमृतपानात् मरत्वं तस्या जातमित्यर्थः॥ सुवर्णपट्टिकया ललाटमलंकृतमिति भा
वः॥ यदायुष इति वा पाठः॥ ऊहे ऊह वितर्के॥३२॥ कुंतलान्वर्णयति ललाटिकेति॥ ललाटे रचितायां रेखाका
या ललाटिकायां पत्रपाश्यायामलंकारविशेषस्य सीमनि पर्यंतप्रदेशे नीमने रेकूजन्मनो नेम्यां चूर्णकुंतला
वक्रकुंडलीकृताः केशाः कज्जलरूपस्य धूमस्य वल्लयः श्रेणयः स्फुटं इव बभुः॥ किंभूता वल्लयः मनःशिला

याश्चित्रकं तिलकस्तद्रूपो दीपः तस्मात्तं नवोयासं तातस्तथा त्वमीः संकल्प वक्री नावा न विन्नति न्नतः धारयं
त्यः नलस्य मनः शिला तिलके नैव कामोद्दीपनात्तस्य दीपत्वं॥ दीप धूपसंनवाकज्जलश्रेणिः किल त्वमित्युक्ता
नवति॥ पत्रपाद्मपाललाटिकेति हलायुधः कर्णललाटात्कल्नलंकारे इति कल्प॥३३॥ श्लोकचतुष्टयेन कज्ज
लालंकारं वर्णयति॥ अपांगमिति॥ अंजनेन उनितायारेखा सा तदीयं अपांगमालिंग्य स्पृष्ट्वा उच्चकैर्नितरा
मदीपि छल्छ्रे॥ द्वितीययाता रूपएरूपयावयः श्रिया कल्पा विलोचने नेत्रे मीनेत्रे वर्द्धयितुं श्रोत्रावापे हृया विन्ना
लिकर्तुं नद्रेखादीपनं स्वत्रमिव अपाति॥ प्राप्या हिमुं दर्यो नेत्रप्रांत निर्गतया कपोल कर्णपांत स्थ्रिन्यां जनरे
खया न्नूषयंति॥ शिल्पिनश्च किमपि लेखितुं वर्द्धयितुं वा लिख्यमानस्य वकारवक्रिम परिहाराय मरवीरवटि
का युपदिग्ध स्तत्रा विघाते नरेखापातं कुर्वंति॥ यद्यपि नेत्रयो वृद्धिर्नास्ति तथापि श्रोत्रावापे हृयाता रूपेण
न कटाक्षविक्षेपादि विलासवशाद्दैर्घ्यकरणार्थं स्तत्रपातो युक्तः॥ नेत्रे कज्जलांचिते इति भाव॥३४॥ अ
नंगेति॥ अनंगली लानि कटाक्षविक्षेपस्वरूपेः कामविलासैः कृत्वा पुनः पुनः अपांगं धावितो नेत्रोपांतस्थश्रि
नः कनीनिका नीलमणिः नेत्रतारका रूपस्यं इन्द्रनीलस्य नस्पत मिश्रवंद्य अञ्जनेनाध्यरपामान्वयजेनातिकृष्णे

नै० टी० १५

नखस्मिन्नासकृज्जलरेखारूपासास्य पद्धतिर्निर्गमनसरणिः। किंभूतं डिंभं ऊनैर्न सदा तन्मार्गगमनेस्य संबंधान्नारकानीलमणिकिरणैरेव नेत्रप्रांतो नीलीकृतो न तु कज्जलैरिति उत्प्रेक्षा॥ कामोल्लसितभिरतिशय कटाक्षश्री तुल्यां ऊनरेखामालंकारतां जगामेति भावः॥१५॥ असविषाणामिति॥ विदर्भसुताह्वयोर्नेत्रे ऊनरेख यान्वयं संबंधं अवाप्य स्मरेण बाणीकृतयोर्बाणत्वं प्रापितयोः पयोजयोर्नीलोत्पलयोः सुखमां परमां शोभां असविषाणां अलेनेतां॥ किंभूतयोः सव्यापसव्यबाणकर्षणाद्भुजद्वये धिकरणे ज्याकिणपद्धतिर्ज्यानि घातजवेवर्णरूपकिणमार्गः तां स्पृशतः इति स्पृशतोस्तयोः। नलसुदृशापाकर्णबाणाकर्षणात्कर्णांतविश्रां तयोर्नेत्रनीलोत्पलबाणयोर्भुजकिणसंबंधसंभावनायुक्ता॥ ऊनरेखैव किणं तुल्यनेत्रे च स्मरद्विक रत्वात्स्मरनीलोत्पलबाणतुल्ये इति भावः॥१६॥ ब्रूतादस्तीति॥ विधिर्ब्रह्मा तदक्ष्णोर्मृगनेत्राधिकयोर्नैमीनेत्र योस्तत्काले तस्मिन्पाणिग्रहोचितां ऊनप्रसाने समये तुल्यसाम्यकरणं तद्रूपेनागसाऽपराधेन हेतुना नखं निखाय तन्मृगस्य मृगस्य तन्मृगसारं हरिणस्य चक्षुषी उद्धर्तुं उन्मूलयितुं यतः इयेष अभिलाषा तयोः तन्मृगसारनेत्रयोः अदूरवर्त्तिसमीपवर्त्तिय तस्कृतं तस्मात्तावस्तत्रासांतत् नखनिखननकर्मरेखा मतिस्मा

तमाख्यत स्फुटमिति पाठे॥ स्फुटं प्रकटमुत्प्रेक्षायां वा॥ अदूरवर्त्तिन्दितं ययोस्तेऽदूरवर्त्तिन्दितेतयोर्नविद्रुतिन॥
मृगनेत्रसमीपेन खनिखननाकारं कृतं भवति॥ ७॥ श्लोकद्वयेनावतंसनीलोत्पलेवर्णयति॥ विलोचनास्या
मिति॥ खलु यतः श्रीमत्सुतायाः कृती कर्णे विलोचनास्यामाकर्णपूर्णत्वादतिमात्रमतितरां पीडिते पराक्रान्ते

स्त॰ ४

ततस्मात्स्वात्मपराभवकारिणोस्तयोर्नेत्रयोः प्रतिद्वंद्विनीतुल्यबलेइमेनीलोत्पलेइतिधियाबुद्ध्येवस्वमि
रसिवतंस्वरूपतीलांबुरुहद्वयी अधिरोपयांबभूवतुः आरोपितवंतौ दधतुरित्यर्थः॥ लुप्तोत्प्रेक्षा॥ खलु वा त्रे
क्षायां अन्योप्यधिकेनपराभूतस्तत्समानेनद्विरोधिनं मन्त्रिधापयति॥ नीलोत्पलकरणीयं नेत्राभ्यामेवकृतं
नतु नीलोत्पलाभ्यामधिकं किं विकृतं॥ नीलोत्पले कर्णभूषणीकृते इतिभावः॥ ८॥ धृतमिति॥ एतयाकर्ण
योरुपरिधृतं वतंसोत्पलयुग्मं नैमीमेतत्कर्णावापश्यतः कस्यचिद्रसिकस्य विलासिनो दृशाविवव्यराजत॥
किंभूतस्य मनोभुवा कामेनाविवेकित्वमेवांध्यं कृतं नेत्रत्वं गमितस्य प्रापितस्य॥ किंभूते दृशौ अस्यां नैम्यी
पतितेनिखाते ततो रसिकत्वादेवापरावृत्य लगित्वा संबंध्य स्थिते स्थिरतरे इत्युत्प्रेक्षा॥ कश्चिद्विलासी नैम्याः क
र्णौ प्रथममेवदृष्टवान् ततस्तस्य नेत्रे कर्णयोरेव लग्ने स्थिते नोत्पलद्वयमित्यर्थः॥ नेत्रगमनादेवास्यांध्यांत्र

न्यदपि पतितं वस्तु कर्त्रा पिलगित्वा तिष्ठति ॥ २९ ॥ रत्नावतंसं वर्णयति ॥ विदर्भेति ॥ स्मरः नलं परं केवलं श्रेष्ठं
वा लक्ष्यमेवेद्धत अपाङ्गं तं प्रतीक्षितवानित्यर्थः ॥ किम्भूतं विदर्भेन्द्रपुत्र्याः श्रवणयोरुपरि अवतंसिकायामन्यत्भू
षणम्भूता माणिक्यादिरत्नखचितसुवर्णकंविका: तत्संबंधीनि माणिक्यादिरत्नानि तासां महस्तेजःस्वदे
व किंशुककार्मुकं पलाशकुसुमधनुः तस्योदरे विषये उदीयि उदीतात् समुत्पन्ना नेत्रयोरवतंसोत्पलयोश्च
तद्रूपाणां चतुर्णां बाणानां संहतिः सामग्री नेत्ररूपाभ्यां वा नीलोत्पलाभ्यां बाणसामग्री यस्य एवंविधं चापे
समारोपितबाणमित्यर्थः ॥ स्वलंकृतकर्णकज्जलांचितनेत्रमैमीदर्शनविलोकनमात्रेण नलः कामपरवशो बभू
वेति भावः ॥ अवतंसिकापदेनैव श्रवणलब्धावपि तत्सन्निधिसूचनार्थं श्रवणपदप्रयोगः ॥ पुष्पफलद
स्मरणात्स्मरः ॥ ४० ॥ श्लोकद्वयेन कुंडलप्रसाधनमाह ॥ अनायरहितेति ॥ सा तद्रूपा स्फुरितया द्विचंद्र
बुद्ध्या द्वौ चंद्राविति भ्रांतिज्ञानेन तौ द्वौ चंद्रौ तवाकर्षेन सहेते इति भैम्यास्तदानमस्येवाभुरस्यारस्य
कोस्पर्द्धकारिणौ कथितौ प्रतिपादितौ ॥ माणिक्यकुंडले रत्नखचिते सुवर्णताटंके एवंविधे द्वौ चंद्रौ पितवा त
दाननं कर्त्तुं कर्णलतायुगेन कृत्वा बबंध किं न तु द्विचंद्रबुद्धेरवस्तुरूपेण मत्पत्वात्स्त्रीलावश्चत उक्तेऽर्थे कर्थं

तस्यप्रवृत्तिरित्याशंक्याह॥ किंनृतंतस्यमृषाविचारणं अनयाकथितंसत्यमसत्यंवेतिविमर्शनंमनाक्स्वरंदक
र्वाणं॥ त्रपोच्छ्वासंपन्मदेननकृतवादित्यर्थः॥ किंकिमितिबबंधापित्वदुक्तितेमत्कृतं॥ यतःसत्यासत्यविचारणेनात्मा
वादितिभावःकृतिवा॥ अन्योपिदुर्मदःसत्यासत्यविचारमकुर्वन्कस्यचिद्दूतस्यकस्यचिद्वचनादनपराधमपिकं
चित्ताडनादिनावध्नाति॥ चंद्राकारेमणितारंकेतयाधृतेइतिभावः॥ ४१॥ अवादीति॥ कयाविदूत्यस्ययासख्या
कुंडलेपरिधाप्यकर्णयोर्निक्षिप्यभैमीअवादिदुक्ताइतिकिं। हेभैमि त्वदाननेंदोरास्यांकुंडलाभ्यांअभितः
उभयपार्श्वयोरयंसमन्वयःसमीचीनःसंबंधःप्रियस्यनलस्यकामोरत्पतिला स्यजन्मसुतपत्रोविष
यदेरोरुंधरीस्वर्णोत्तरराशिस्थगुरुशुक्रयोर्मध्यराशिस्थचंद्रस्यडुरुंधुराख्यस्यमहायोगस्यसंबंधिनोधुरं
धरंध्रुवंनिश्चितंआश्रयतीति। ध्रुवमुत्प्रेक्षायांवा। डुरुधुराख्येमहायोगेजातःउत्तराधिर्यथाद्धिंप्राप्नोति
तथाकुंडलालंकृतमुखचंद्रदर्शनमात्रेणनलस्यरमणाभिलाषोवृद्धिंप्राप्स्यतीतिभावः॥ गुरुभार्गवयोर्योग
ज्यो२ श्चंद्रेनैवयदाभवेत्॥ तदाडुरुधुरायोगइतिसोतिःशास्त्रात्स्फुटसंधेयं॥ ४२॥ अधरप्रसाधनमाह॥ निवेशितमि
ति॥ तदीयोधरोष्ठतस्यास॥ त्रिउई देशोपावकस्यालक्तकस्यरागोनिहितमानस्यदीप्त्येप्रकाशनायनिवेशितंप

नै॰टी॰१५

क्थ॰१

स्तंपश्चात्तेन लग्नत्संलग्नं सिक्थकं मधूच्छिष्टं॥ स्वस्य जनकानि मधूनि हीनरसतया परित्यज्य माधुर्यातिशयात्सु
धायां अमृतसधर्मणि तुल्यायां तत्रैवाधरसीम्नि निवस्तुं नित्यं स्थातुं उत्सुकमुत्कंठितामिव रराज॥ सुधया सिक्थ
कस्य कदापि दप्यसंबंधात्तल्लाभाभावात्तां परित्यक्तुमशक्यमिव तत्रैवास्थितमित्यर्थः प्रसाधिकात्र लक्तस्य स्थि
त्यर्थं अधरे सिक्थकं निवेशयति॥ अधरस्य मधुनोप्यधिकत्वं सूचितं॥ अन्यदपि हीनमाश्रयं परित्यज्योत्तममाश्र
यति॥ लुठितेत्यादि॥ सधर्मा धर्माद्दनिच् समानस्य छंदसी तत्र योगविभागेनात्समानस्य सादेशः॥ सुधर्माया सु
धर्मा तस्यां मन इति न डीप्॥ ४१॥ कंठप्रसाधनमाह॥ स्वरेणेति॥ तदीया कंठ एव कंदलीत्रतिसेऽकुमाया
द्विगुणत्वाद्दृढो जात प्रथमोंऽकुरदंडोऽतिमधुरेण हृत्वा अपराः सर्वे अविशेषणं विशेषणेन रहितं यथा तथा सा
माप्येन वीणायेनेमित्येवं खलु निश्चितं अस्फुरत् आभासत॥ ननुरुद्दवीणादिबहुवीणाभेदे कुविशिष्टतेयय
मिदं संजेत्यर्थः॥ अथालंकारसमये सप्तमुक्तिकासरान् सूत्रप्रोतमौक्तिकहारानेव तर्जनीमध्यमध्यमा
शिघातोत्पद्यमानध्वनिव्यंजितपंचमादिरागान्॥ पदस्वाद्यादिरचिता। सप्ततंत्री रवाप्य विपंची सा तु तंत्री
भिः सप्तभिः परिवादिनीति॥ अमरवचनात्स्फुटं प्रकटं परिवादेनाति विशिष्टसंज्ञा सती अराजत॥ अं

नतोऽत्रस्फुटमुत्प्रेक्षायां वा ॥ वीणास्योप्यतिमधुरतरस्वराकंदलीसत्समरसमुक्ताहारालंकृता चेति तात्पर्य वा ॥ ४४ ॥
भुजप्रसाधनमाह ॥ उपेति ॥ मंगलं प्रयोजनमस्य मंगलार्थं रचितनकं कुचं रत्नखस्य वलये नकं कणेन संग
तो युक्तो सुदत्याः स्निग्धा भुजौ विरेजतुः । उत्प्रेक्षते अत्र प्रौढा बाला मृणालनालतया बिसदंडेन तत भुजाभ्यां
सकाशात् घृष्टत्वं शिक्षितुं उपास्यमाना विवसेव्यमाना विवा मृणालादपि कोमलतरौ भुजाविति स्पष्टः । गौड
देशे विवाहकाले शंखवलयधारणमाचारः बालेनत्र न्यासस्तु करइति प्रौढपदं नाला नालमथ्या स्त्रियामि
त्यपि क्वचित्पाठात् महाकविप्रयोगान्नालात्राह्योपि त्राव्यंतः ॥ ततः श्लाख्यातो प्रयोग इत्यपादानत्वं मांगलि
केन प्रयोजनमिति ठक् ॥ ४५ ॥ श्लोकद्वयेन पदप्रसाधनमाह ॥ पदेति ॥ तदानीं तस्मिन्प्रसाधनसमये अस्याः
पदद्वये ऽपि लाक्षर्पिता नवार्द्रया वरंजना ऽलक्तकरंजना जने नवोदयसमये जाता ऽतिरक्ता रविद्युति
रिव ठदनीयतां तर्क्यते । किंभूता रविद्युतिः निशि रात्रौ सूर्यस्यास्तमयवशात् पद्माभ्यां सह विश्लिष्टपदि नेष्टुनः
पद्मो विरायपरिस्त्यजाग्रतीति ष्टंती ॥ रविद्युतिर्यथा पद्मेषु श्रियमधिकां करोति तथा यावकरंजनाततत्पद
याविति तिनैमी चरणे पद्मतुल्याविति तात्पर्य वा ॥ चिरायविश्लिषितिवा ॥ चिर वियुक्ता चन्योन्यं प्राप्य गाढमालिंग्य ग्य २

क ४

नै०टी०१५

तिष्ठ मद्गृति उक्तिः॥४६॥ ऊतेति॥ पूर्वं विरहावस्थायां बहुसंतापकारित्वात्खलु तेनाग्नेर्भैम्यां कृतोपराधो येन स कु
सुमेषुः काम एव पावकः॥ अनंतरं अधुना कांतेन नलेन समं सह भैम्याः समागमं विचिंत्य स्फुटं निश्चितं च
रणौ सिषेवे अपराधमार्जनाय तत्पर्थः। कामस्याग्नित्वे हेतुमाह यतः सः अभिरागवान् अङ्कः रागो लोहितिमैव चि
ङ्कं यस्य रक्तिम्ना वह्निरयमिति ज्ञायते॥ अथवा अनुराग एव चिङ्कं यस्य अनुराग एव हि काममनुमापयति॥
तस्मात्कामाग्निरेवायं न त्वयं पावको लक्षकः स पावको नेति वा॥ अन्योपि प्रोषितभर्तृकायाः कस्याश्चि
त्कृतापराधः स्त्रीस्ततः प्रियागमनं विचिंत्यापराधमार्जनाय तत्पादयोः पतति सालक्तकतत्पदद्वन्निदे
वनलस्य कामोद्रेको भवितेति भावः॥४७॥ महउत्रो नाम माहात्म्यं वर्णयति॥ स्वयमिति॥ स्वयं भूषणं विनैव
परस्परानपेक्षं च तस्या भैम्या अंगेषु मुखाद्यवयवेषु प्रत्येकं स्वीयस्वीयसौष्ठववशात्तरुणिमारोहव
शाच्चारुतां गतेषु प्राप्तेषु सत्सु परस्परेणैवान्योन्येनैव च विशेषेणाभूषितेषु प्रत्येकं सौन्दर्ये सत्यपि अ
न्योन्यसाहचर्यवशात्करानुगुणेन भुजा भुजानुगुणेन च करादित्येकस्यांगस्यापरेण तस्य च तेनैव सर्वांग
योग्यांगसामग्रीसंघट्टनात्सुंदरतरेषु सत्सु तानि मनःशिलातिलकादीनि अलंकरणानि किं भूषि

रेपि तत्स्वकरणप्रयोजनं न किंचिदस्तु ॥ यस्मात्तेषामलंकरणानां तत्पूर्वोक्तप्रकारं करणं निर्माणं वृथैव वत्स्व
दुःखवशान्न किंचिदस्तु ॥ किमप्यधिकं न वक्तुरित्यर्थः ॥ आश्रितत्वादनिराकार्यत्वेन स्थितानीति भावः ॥ यत्तेषां
करणं वृथैवाभूत् ॥ अत एव करणमलंकृत्यन्वयेन नामसान्वयं जातमिति भावः ॥ अलं वृथा करणं येषामिति बहु
व्रीहिणापि सान्वयं जातमित्यर्थः ॥ सर्वमलंकारवृद्वसन्नूषणार्थत्वं पश्चादप्रयोजकत्वान्निषिद्धार्थमिति वेत्यर्थः ॥ कि
म्हरिहरे इति पाठे किमर्थं धृतानि न जाने इति शेषः इति वा ॥ ७७ ॥ भूषणकोत्कर्षं वर्णयति ॥ क्रमेति ॥ इयं भूषणैर्यु
वैर्भूषणसंबंधैः सत्वा उत्तरमुत्तरं यथा तथा ॥ ऽनेक्रमेण सर्वं भूषणपेक्षया उत्तरोत्तरं भूषणेनाधिकां अति
शायितां यां श्रियं पुपोष ॥ तया लंकारश्रीछायारमणीयसौंदर्ये उरः उरः तस्थुषि स्थिरतरे सति अवधिबुध्येरि
यत्ना बुधेः धोरणिः परं पराबबाधे बाधिता ॥ इतोन्यद्रामणीयकं नास्तीति यदि बुद्धिर्न वेत्तदावधिर्नवेत् ॥ सर्व
सर्वरामणीके यत्ना बाधेन रामणीयकांतरे तु उरः उरः स्फुरति सति ॥ अवधिर्बाधित इत्यर्थः ॥ तस्या भूषणशोभा
निरवधिरभूदिति भावः ॥ धोरनिरिति देशपत्रा हृदं ॥ ७८ ॥ मणीति ॥ मणिः स्तनांशोमो क्तिकादिरत्नः तुल्यः ऽतिस्व
च्छे मुकुरस्य मंडले दर्पणतले पुनः नियांस्यस्य स्वमुखस्य दर्पणासंक्रांतिप्रतिबिंबं पश्यत्पवंशीलाद दविनी ॥

सा नैमी स्वमुखं विधोः दर्पणरूपस्य प्रतिबिंबरूपस्य वा चंद्रस्य दूरं निकटवर्त्तित्वं विधाय कृत्वा एतयोर्मुख
चंद्रयोर्विशेषं तारतम्यं निरूपयंती विचारयंतीव बभौ॥ सन्निधौ हि विशेषः स्फुरति। बिंबापेक्षया प्रतिबि
बस्य न्यूनत्वात्तस्यैव चंद्रत्वमिति विशेषो निरूपित इति भावः॥ क्षणानंतरमादर्शविलोकनमिति जाति
प्रतिबिंबदर्शिनी आसीत् क्षणांतिनि॥ ५०॥ जितइति॥ तस्या आस्येन जितः कलानिधिश्चंद्रः नेत्रविपिंडीक
रणादि निमित्ता हस्तस्थितादर्शनिमित्ता वा द्वौ चंद्राविति धीर्यस्य तद्रूपस्य स एव साक्षी साक्षाद्द्रष्टा य
स्याः सा मायापस्येव तत्र तं कायो यस्य चंद्रस्य तद्भावस्तत्ता तां दधे बभार। एकत्वादहं नैमीमुखेन जितइ
ति मायामयानेककायत्वं चंद्रेण धृतं इत्यर्थः। अत्र च पूर्वोक्तप्रकारद्वयेन साक्षिणौ द्वौ चंद्राविति बुद्धिरे
व प्रमाणं॥ कलानिधिपदेनानेकशिल्पज्ञत्वा [illegible] न्मायिकायव्यूहनिर्माणकलामपि वे[illegible]त्तीति सूचितं।
द्वाभ्यामेकजयस्य सुकरत्वात्करस्थितादर्शच्छलेनानेककायत्वं यद्यप्यंगीकृतं तथापि युगपत्समकाले
सखीयुगेन प्रकर्षेण दर्शिताभ्यामादर्शाभ्यां कृत्वा तया वा ऽ बहुनेकनापि बहुत्वविधुना बहुत्वं वतन्नी
तेन सता तन्मुखेन चंद्रो जिग्ये जित एव। हस्तस्थदर्पणसहितसखी दर्पणद्वयं प्रतिफलितमुखप्रतिबिंबं

स्त १

सहबिंबभूतस्य मुखस्यानेकत्वात्सुखतुल्यदर्पणद्वयेन सहबिंबभूतस्य मुखस्य च मद्भेरोरादद्वैः स्वप्रति
बिंबेभ्यश्च सह वा अनेकत्वात्त्वं च षेद्वयोः॥ विज्ञयस्य मुकुरत्वादित्यर्थः। पूर्वश्लोकत्रया जितोपि संख्याधिक्येन मुखं जेतु
मारब्धवांस्तथापि मुखस्याधिकतरसंख्यत्वान्नशशांकेतिभावः। बहूनां विह्वलुनेति द्विः॥ ५१॥ किमिति। आलि
युग्मेनार्पिते दर्शिते दर्पणद्वये बहुभिर्बिंबप्रतिबिंबैस्तमःश्लोके कसंख्यायोग्यमथ च मुखं तदास्यं नेमीमु
खं। अन्यत्स्वहिमशुशिशिरशुश्रुअथ च कामेषु केदारादिहिमेषु निर्वाप्य निर्वाणमथ च [illegible] मो[illegible] हं कृत्वा
प्राप्येति यावत्। निःश्वाससमाधिस्तिमिरात्रिसंबंधिनिः संकोचरथ्यप्रपरमात्मदर्शनोपायैः कृत्वा तदीयं नेमीमुख
संबंधिसालोक्यं सारूप्यं अथ च सालोक्यलक्षणां मुक्तिं इतं प्राप्तं बहु अनेकं अंबुजं किं लोके व्यलोकयत्। कि
मुत्प्रेक्षायां नेमीमुखप्रतिबिंबान्निर्हीनत्वात्पद्मैः केदारादिहिमवृन्दताडितपल्लवप्राप्त तन्मुखप्रतिबिंबस्य स
मीपे स्थितानि किमित्यर्थः पद्मेभ्यो मुखं अधिकमिति भावः। अंबुजमिति जात्येकवचनं। निर्वपणं निर्वापस्तं करोति
एपंतालूपि निर्वापसं करोति एपंतास्तपि निर्वाप्येति। हिमेष्वात्मानं विनाश्येत्यर्थः समालोक्यं समानस्थितियोग
विनागात्॥ ५२॥ असौ नेमीपलाशानां किंशुकानां दाम मालेयमिति निन्योत्पामिलं तत्रागच्छंतः त्रिलीमुख

तरां ४ ति३

रा१

नै०टी०२५

त्रमरायत्रैवंच्छतेरथ्यश्च किंशुकानां धनुराकारत्वान्मिलद्भ्यां ऐणविलूषामणीनां विशिष्टालंकारसंबंधिमाणिक्या
दिरत्नानां रश्मिरूपैः कार्मुकैरिंद्रधनुर्भिः ईति) वेष्टिता सती तदा भूषणानंतरकाले रतीशस्य कामस्य सर्वस्व
तया परमधनत्वेन हेतुना धनुर्भिर्लक्षितैः लक्ष्मसंख्यैर्धनुर्भिः अभिसामस्त्येन रक्षितेव लोके रत्नक्षितातकिंता॥
ऊंता· प्रविशंतीति वत्स धनुषां धनुर्द्धराणामित्यर्थः॥ कोतिसाम्यात् मित्रतया नलसर्वस्वं नैमी कामास्तूणी
त्यर्थः॥४७॥ विशेषेति। तस्याः भैम्याः सुखमा स्वाभाविकी परमा शोभा विशिष्टैर्भूषणैः रूत्तमहार्घतां अतिशै
श्रेष्ठ्यं जगाम॥ काकैरिव जह्नुनंदना स्वतएव श्रेष्ठापि गंगा विशेषतीर्थैः प्रयागादिभिरिव। तथा आजानिक
रागज्ञमिता जननं जननः न जननः अजनः अजनेन निर्वृत्ता स्वभावेन संभूता आजानिका अध्यात्मादित्वाट्ठञ्। ज
निर्जन्मनः आ आजनि आ जनि नवः सहजः अनुशातिकादित्वादुभयपदवृद्धिः। आजानिकः सहजो रागस्त
स्य भूमिः स्थानं पुत्रादिस्तस्य लावण्यस्तस्य सहज स्नेहपात्रता गुणैः शीललावण्यादिभिरिव। तथा नीतिरु
लेः भीति साध्वित फलप्रतिबंधनाशना त्रयकोशैः नाग्येः पूर्वकृत शुभकर्मभिरिव। भागीरथी सर्वत्र श्रेष्ठैव प
रं प्रयागे माहात्म्यातिशयः। यत्रानुरागः स्तत्र श्रेष्ठं परं शीलादिना अनुरागस्य निरतिशयत्वात्। तथा नीतिमार्गानु

गा१

सरणीश्रेष्ठमेव परंतु दुकूलेनग्यैरनुगृहीतं श्रेष्ठतरं जवतीत्यर्थः॥ मंडनैस्तस्या निरतिशयाशोभा स्फुरदिति भावः॥
उदुकूलेरिति उपमा[illegible]नोपमेयैः संबंधनीयं॥ अस्तुनकर्मणो पित्रा गृह्यस्या विधाय कृत्वान्ते निहितस्तथै[illegible] साम्यवि
शेषणमेवदा॥ उपमानत्रयेणैकक्रमेण पाक्षिक्ये गुणवत्वं साम्यं व त्वे च सूचितं॥ विशिष्यंते विशेष्याः प्रत्याद्यं नृ॥ पूर्ण
नलादिति॥ नलात्मकाशात्स्वस्यात्मनो वेषकल्पं दैधव्यमनाद्भुमवाप्नुमान[illegible]तां नेमी-चरणकमलास प्रवी
ता॥ नीमस्यकन्यास्वयंवररूपमहोत्सवे आकारिता मत्य आगता नृपप्रियां अन्यराजमहिष्यः प्रियाः
षस्व प्राणेशचिरं जीवनाय मंगलरूपं सिंदूरमिव स्वशिरःसु तस्या नेम्या अं घ्योश्चरणयोर्लाक्षाम ल
क्तकमदधंत अधारयन् पत्युरायुर्वृद्ध्ये अन्याः स्त्रियः ता एव वा यथा शिरःसु सिंदूरं धारयंति तथा प्राण
म प्रसन्नया नेम्याः एतदीयाः प्राणेश्वरः क्षणीया इति प्रार्थितो नलः स्वप्राणेशान् रक्षिष्यतीति बुद्ध्या स्वस
र्ह चिर जीवनाय नैमी चरणयोः प्रमाणं कृतवत्य इति भावः॥ प्रणामोदवः वार्दलाक्तो लग्ना॥ विश्वस्ता विधिवेस
मत्पमरणौ ब्राह्मणादिला द्वैधवस्त्यं दधधारणे नलऊ॥ हरिद्रां कुंकुमं चैव वासं दूरं कज्जलं तथा॥ कूर्पासकं च
तांबूलं मंगल्यानरणं स्मृतं॥ केशसंस्कारकबरीकरकर्णविभूषणं नर्तुरायुष्यमिच्छंती दूरयेन्न पतिव्र

पतिमव्याप्तिः१

वास्तुतः कायकर्मस्त्रियं रतीनां पतिव्रतानां इत्यद्रोगाजन सुवासिनीनां २

नै-टी-१५

तितिस्कंदवचनं॥५५॥ अमोघेति॥ ततो मंडनानंतरं प्रनम्याहृत गुर्वादिवरणं प्रणामासक्तीः क्रियागुर्व्यै
कल्जेत्यर्थः॥ सनिमी गुर्वीः कृतमयोः पित्रोस्तथा ब्राह्मणां ब्राह्मणीनां वृद्ध अविधवाकुलनागपुत्रान्वे
ति आशिषः आधिऊगमालनत किंभूता आशिषः अमोघत्वेन सफलत्वेन प्रसन्नानां गीर्वाणानां दे
वानां रूवेकि वरास्तत्तं बंधिनी ऽ हरस्त्रजो वर्णमालास्तासां सनाथितं बंधुत्वं गताः प्राप्ताः सत्यत्वेन त
तुल्याः॥५६॥ तथैवेति॥ तथैव कैम्यां वेदिकोदरे यथा मंगलस्नानादिकृतं तेनैव प्रकारेण क्रमेण अत्र तत्का
लं तस्मिन्नेव काले ऽथ मंगलस्नानानंतरं प्रसाधनासंजने भूषणकरणं तत्कर्त्रं बंधिद्विशिल्पं विज्ञान
कौशलं तस्य पारगैः [illegible] अशेषविशेषज्ञैः शृंगारि त्रिः अ
नुजी विलि सवके निजस्य स्वस्य विनोः स्वस्वामिनो नलस्य पापिपानिग्रहणलक्षणे चिंता विवाहकाल
योग्या विवाहरूपोत्सवयोग्या वा किंभूषणेकृतारचिता॥ निजस्येति स्वयं प्रवृत्तिः सूचिता किं नोरित
विलंबः सूचितः भूषयति श्रुरादिस्तस्मा युक्तः॥५७॥ श्लोकद्वयेन केशप्रसाधनमाह॥ नृपस्येति॥ तत्र
केशप्रसाधने ऽधिकृता नापितादयः ऽजनाः रविचार्य धूपजधूमं [illegible] पि विद्यमानत्वात् ऽजनस्त्र

तं शोष[illegible]णपुरः सरं कंकतिलकादिना प्रसाधनं नत्वा [illegible] धावधूपजधूमस्या १

नि

तिवशादेते केशा एव न भ्रम इति चिरान्निश्चित्य कानि पुष्पाणि कुत्र स्थाप्यानि इति योग्यायोग्यत्वविचा
र्यवान्तपस्यमानः कवानः धम्मिल्लादिरचनाविज्ञो भूयं भिरूपं वधं अवापयत् प्रापयामास॥ तावकान्यैः क
चैः शरादिगरुतः पक्षान्नत्यजति गरुत्पक्षतस्य कलापिसंसदः मयूरसंघस्य संबंधी कलापलीलाप
निधिः॥ कलापलीलाया उपनिधिः सामस्त्येन पालापिञ्छाछादितं॥ तदपेक्षयाधिकेर्जातमित्यर्थः॥ कलाप
लीलारूपो य उपनिधिः कविसमयसिद्धः प्रतिनिधिः सयैराच्छादितं तद्दवेत्यर्थ इति वा॥ नलकेशैर्विलोलस
स्पृहीतत्वान्निर्विलासतया निरर्थकबर्हभारं त्यजति॥ तिसृवनाऽऊरुतत्यजइतिपदं साधिः श्रायोयैः के
शैः पक्षत्यागित्वा मयूरसंहतेः कलापशोभा नितिद्वे पञ्चपालापिगृहीत्वाना स्तीत्यपलापितः यः परस्मिन्दि
यं गृहीत्वा स्वदत्तेपरं प्रतारयति॥ मराज्ञो धिल्लतैः ३ रूषेः पश्चाद् ध्याक्ति स्मरणीयो भवति॥ मयूराः शरदि पक्षा
लुंवति उमान्तुपमिधिर्नामसङ्त्यमरः॥ अवापयत्॥ आप्नोते ण्यंताल्लुङि द्वितीयस्यैकावाधित्वं॥ गत्यर्थत्वा
दनौ कर्तुर्णौ कर्मत्वं॥ अलंघयन्निति च पाठः॥ ५७॥ एतत्त्रिणामिति॥ अर्जिता लज्जाभाजने रत्नेत्यगजनिता स्त्रि
धत्तोत्ता येन तथा द्वाधिन्याला तेएवं शीलेन तस्य नलस्य केवनकेशपाशेन सह समेत्य संबंधं प्राप्य ऊरुमा

नै॰टी॰१५ लेमल्लिकादिकोरकैकर्द्दमितः न्यग्धिमश्यामलिनी तथा अङ्कितमार्द्रश्रिया पुनः रत्रांऽत्यादिना घर्षणाल्लभ्रम
ज्जनिसंबंधिस्निग्धत्रगात्मेन भ्रमरमालारूपेण धनुर्गुणेन संयोगयुषां सहिता नामनो धुवः कामस्य पतत्रि
णां सौभाग्यं सादृश्यमलंभि केशपाशस्य भ्रमरमालारूपेण कामधनुर्गुणेन साम्यं कोरकाणां च पुष्परूपे
बाणेन नलस्य च कामेनैव वेत्यर्थः॥ अति विश्वालननलनीलतरलिकालंकृतनलकेशपाशदर्शनमात्रेणैव
मी कामवशाभविति तत्रावः कविनात्मकवचनं॥ ॥१०॥ मूर्द्धप्रसाधनमाह॥ अनर्घ्येति॥ अनर्घ्यरत्नौघ
मयेन अमूल्यदिव्यमाणिक्यादिरत्नघटितेन मुकुटेन मूर्द्धनि मंडितो राजा स नलः हि यस्माद्धनीपकानां
याचकानां अतिवनदानात् कल्पमहीरुहः कल्पवृक्षस्ततो मंजुमंजरीरत्नघटितेन मुकुटेन मूर्द्धनि मंडि
तो राजा स नलः हि यस्माद्धनीपकानां याचकानां अतिवनदानात्। कल्पमहीरुहः कल्पवृक्षस्ततो मंजु
मंजुरी कल्पवृक्षत्वे वितीर्णरत्नांकुरपरंपराविस्फुरत्नुज्ज्वलरत्नविवरराजा वृक्षो हि बालपल्लवपुष्प
फलयुक्तो मंजरीमुज्झति॥ कल्पवृक्षस्य च मंजरी रत्नफलत्वाद्रत्नमयी॥ मंजरीस्थाने मुकुटस्तत्किर
णावा॥ मंजर्याकारा मुकुटमणिकिरणा ऊर्ध्वं निर्गच्छन्तीत्यर्थः॥ अर्घमर्हतीत्यर्घ्यं दंडादित्वाद्यत्। मंजरी

रिति च पाठः॥ ५६॥ नालप्रसाधनमाह॥ नलस्येति॥ रत्नरचितायावीरसंबंधिन्या वीरडरूपधार्याया वीरपट्टि
कानाम्न्यावार्यमानाया स्वर्णपट्टिकायाः श्रवणयुगपश्चाद्भागमात्रव्याप्तिन्याः मिषेण व्याजेन नलस्य नाले ल
लाटे लग्नः सन् विधोश्चंद्रस्य परिधिः परिवेषो वेनोऽसुखचंद्रे पिवेत्परिवेषः मंडलं किमिति न दृष्टपत
त्पतत्राह॥ किं भूर्ववन्निवृत्तदा प्रियासंगमकाले हर्षवशात् कृपणवशाद्वा श्रोत्रोत्कर्षाधिकरूपतां चंद्रापेक्ष्या
धिकमौदर्यमथवाधिकपरिमाणत्वं गते प्राप्ते तदानने मातुं तुल्यप्रमाणतां च प्राप्तुमशक्नुवन्निव त्र्यल्पप्र
माणस्य यदनंकरणं तदधिकपरिमाणस्यैकदेश एव तिष्टतीति तु सर्वमंडपितुं न शक्नोतीति तस्मात्तु रेवकदे
शो परिधिर्य्यं न स्थित इति युक्तमिति भावः॥ मणिकिरणानां मंडलाकारत्वेन पट्टिकायाः परिवेषाकारत्वं युक्तं॥ अ
त्राक्ति स्तुद्दहन्निति च पाठः॥ ५७॥ श्लोकत्रयेण तिलकं वर्णयति॥ बभ्नवेति॥ मनो ध्रुवोर्धनुः संमीपे संहृता सञ्जीकृता
उपलक्षु ध्रुवोर्समीपे तस्य नलस्य वर्तुलं चित्रं तिलकस्तद्रूपिणी गुलिके वध्यनल्पयोगोलवदृव बभ्नववाकिंभूतस्य
स्यामानसौकसं मनसि वर्तमानं धैर्यं ज्वरं धैर्यं वा कुल्पमथवा धैर्यं ज्वरभे मानसमरोनिवासिनं हंसपक्षिवा
न्न विद्यते धैर्यं ज्वरो यस्य तं विविधं वाहं संजिघांसतो हंतुमिच्छतः॥ ध्रुवोकामधनुष्टं तिलकस्य वृगुलिकात्वं

नालएव

नै॰ टी॰ १५ समीपस्थितं वर्त्तुलतिलकदर्शनमात्रेण नैमीकामवज्ञा न विष्यतीति भावः॥ अन्योपि हंसं हंतुमिच्छति॥ तुणीका
मधनुष्टं तिलकस्य पुलिकात्वेन समीपस्थितवर्त्तुलतिलकदर्शनमात्रेण नैमीकामवज्ञा न विष्यतीति भावः।
अन्योपि हंसं हंतुमिच्छन् कृत्रिपो धनुषि पुलिकां संधत्ते॥ गाढस्थतिलको हृत्स्थ॥ वर्त्तुलो न्यपवैरूपयोरिति वचना
नात्॥ मानसौकस्त्वोत्से स्थायां खलु॥ चित्रं स्यादद्भुतालेख्यतिलके छिति विश्व॥ चित्रं च तद्रूपं चेति कर्मधार
यादिन्निर्वा॥ चित्ररूपेतेति पाठः॥ तिलकस्वरूपेतित्यर्थः॥ दृशा॥ अनुबंधेति॥ द्वन्त्वादिना गुणेन सरोजतर्जिनाद्भ
मलजैत्रेण तदधिकेन पद्मकमलतर्जनवशाद्वैरूपद्रूपेण न लीयेत वक्रेणयाचंदनविंदुमंडली मंडलाकृ
रश्चंदनतिलकत्वं भुवि धृता। तयाचंदनविंदुमंडल्याचंद्रस्यैव सखी श्रियं श्रिता सलक्ष्मीका काचनरोहिणी
हि मध्ये तारका॥ शोकस्यां कवर्त्तिनी मध्यवर्त्तिनी ऋता तया चंद्रमध्यवर्त्तिनी काचन सश्री तारकास्त्व
स्य सखी महत्वरीं कृता सा तत्तुल्या जातिर्यदिजवेत्तर्हि चंदनवृत्तितिलकयुक्तः सरोजतर्जीनलमुखचंद्रस्त
तुल्योनवेत्त्वेव मित्यर्थः॥ तदा तन्मुखं पद्मचंद्राभ्यामधिकतमं जातमिति भावः॥ कांचनेति पाठे अतिसमि
नांश्रियंश्रिता॥ दृशानेति॥ हरेरिंद्रस्य इति एवं रूपया उरारायाऽनुपद्यमाना संभावितविंतयाऽस्य नलस्य

नालिललाटेमा॰भैमीकिमस्तिनवेति संदह्यमानरूपो ब्राह्मीलिपिं अक्षरपंक्तिं मंदेहनिरासाय स्पष्टं पठितुं
वाचयितुं स्वं दनतिलकचिरे वेंदुश्चंद्र प्रहितः प्रेक्षितइवेत्युत्प्रेक्षा॥ इति किं भैमीयावदग्निप्रदक्षिण
करणपर्यंतं नलस्य उदूढतां परिणीततां नार्यात्वं नैवगच्छतिइतियद्यपिस्वयंवरेयातस्तथापियावत्स्पष्ट
पदिनैमीनलस्नायनिजवतीतोदस्य दुराशायाः सबिंदुश्चंद्र एव प्राहितः किं। पतित्वमसप्तमे पदे इतिस्मृतिप्रामा
ण्यात्यावदग्निप्रदक्षिणे भैमी नलसत्वां नैतत्ब्रह्मलिपिनिश्चयं चंद्रद्वारा बुध्वा तत्प्राप्त्यर्थं वयं प्रयतामह इति दुराशा
यापित्र वाचनार्थं प्रेषितो ललाटे स्थितश्चंद्र इव तिलको रेज इति भावः॥ यावदग्निक्तमम व्ययीभावः। लिंपिंरुदि
कारादिनीकारः॥ ६४॥ कर्णभूषणं वर्णयति॥ कपोलेति॥ तत्कालं तन्मंडनसमये नलस्य कुंडलेमंडलमैत्रीकं

६

र्णभूषणीभूतमंडलाकारकुंडलद्वयीकपोलपाल्यां पात्रास्ता तिस्वच्छनलकपोलयुगे यातौ प्रतिबिंबितौ स्वीयौ तु बिं
बौप्रतिबिंबौ तयोः समागमात्संबंधात्हेतोः विभ्रत्रथ कामरथे स्फुरद्विलसच्चक्रचतुष्कत्तस्य बाहुल्यतासौं
दर्यं अवाप॥ रथस्य तु चक्रो भवति। पाली फलकं च तु कं परिमाणी पाधिकेसंघ्यर्थेसंख्यायाः संज्ञासंघेति
कन्नात्त्वप्राणिसंघे यद्यपि प्रत्ययस्तथाप्यत्रोपचारिकः प्रयोगः॥ ६५॥ क्रतेति॥ अस्य कंठश्रितामुक्तावली

=न्यरात्रावुकं तस्य सनलो बलवान्नुत्साहयुक्तः शक्तियुक्तो वा कस्य वा यत्नेन निवारणेन बलवान्सन् शत्रुसैन्यपराजयकोऽभूदिति वा वारा बंध्योऽर्थ ततश्च
= जिष्णुबलं द्विषः ७=

श्रीमौर

नै०टी०१५

मौक्तिकहारलताश्चास्यमेव चंद्रमास्तस्मात्स्रवंतीसुधा तस्यास्तुं दिलं स्थूलं बिंदुवृंदं तत्स्वभावस्ततातां श्रव
पकिंभूतस्य गुरूणां पित्रादीनां विप्राणां च वंदनया विनम्रमौलिर्यस्य ात एव किंभूता चिबुकाग्रचुंबिनी हृच्च यस्य
ग्निनी॥ मुक्तानां स्थूलत्वं वर्तुलत्वं सूचितं॥ स्वर्णचंद्रदर्शनवत्सलदर्शनादुर्वादीनां प्रतीयमानेतिभावः॥६६॥
श्लोकत्रयेण भुजभूषणं वर्णयति॥ यत इति॥ यत्तद्भुजेन तद्भुजः मुद्राभिरंगुलीयकैः सहितः समुद्रस्तस्यभा
वं अथच दंड्यादंडनादिराजधर्मपरिपालनान्मुद्रा नियमस्तत्साहित्यं व्रजति॥ जे जे ऊर्मिका दधारेति भाव॥
स कः यतः यस्माद्भुजाङ्कितो श्रीः शोभा राज्यलक्ष्मीर्वा श्रिजनि उत्पन्ना तथा अजिष्णुयस्य भुजस्य वारणेन यत्कष्ट
केन शत्रुविमर्दनेन जित्वा बलं शत्रुसैन्यं द्विषन् सन नलो यस्य च यत्कष्टकेन संग्रामेन बलवानभूदितिवा॥ शत्रुसै
न्यद्विषंतस्य प्रतिद्वंदिनी बलोपि शत्रुः संग्रामे भुवि यस्य कर्मभूतस्य वारणे निराकरणे बलवान्न बभूवेतिवा॥ अजिष्णु
बलं द्विषत्स प्रसिद्धः शत्रुर्यस्य संग्रामविषये बलवान्नभूदितिवा॥ वारणानामिनः स्वामी वारणेनश्चासौ स्य वापि
प्रसिद्ध एवातः स वारणेनसः यस्य नलभुजस्य बलं द्विषन्पद्धलेन सह स्पर्द्धमानः संग्रामे बलवान्भूत् हीनं
बलोप्युत्तमेतद्भुजबलस्पर्द्धया बलवत्त्वप्रतिष्ठां लेभे॥ वरं विरोधोपि समं महात्मभिरिति न्यायादितिभावइतिवा

॥संग्रामेबलंदैत्यंपराजितवुकःसइंद्रोपियस्माजिष्णुयेनत्वर्जुनेनसहसंग्रामेबलवान्नाभूदिंद्रादप्ययंबलीतिनावद्
तिवा॥संग्रामेबलंदैत्यंपराजितवुकःसइंद्रोपियस्माजिष्णुयेनत्वर्जुनेनसहसंग्रामेबलवान्नाभूदिंद्रादप्ययंबलीति
नावइतिवा॥बवयोरभेदाद्वलनंबलःपलायतंतस्मात्संग्रामेषुयत्कृतेननिवारणेनसबलारातिःपवयबलवा
न्पलायनपरोभूत्तन्नतुस्थातुंशक्तइतिवा॥यःकरस्तानतिप्रसिद्धान्धनात्कैतवकृत्कमलान्लक्ष्मीमर्थयंतेए
वंशीलान्याचकान्अमपुरत्यदिक्षिणीचकारा तिवदान्यइत्यर्थः॥बकृत्सुंदरवधूकांक्षिणोवरान्यःपपारबहवो
ब्राह्मण्येयेनविवाहिताइत्यर्थइतिवा॥अथवसागरत्वंतेजे॥यस्मात्सागराल्लक्ष्मीर्जाता॥यद्वात्वन्नेनवारणे
नैरावताख्येनसबलारातिःआजिषुबलवानभूत्॥यश्चवृक्षमर्थंजलात्पिल्लाषिणोमेघान्स्ययतिरामनामा
ध्यकितामुद्रिकामुद्रयाहनूमतापपारयस्मान्निनिचपागः॥सलिलंकमलंजलंइत्यमरः॥कमलाश्रीवरश्रियोरि
तिविश्वः॥बलत्वंबलःघञर्थकविधानात्कः॥अमृडरदितिसुरर्येतेर्लुटिबडीतिक्त्वोदीर्घोलघोरितिअ
भ्यासस्यदीर्घःपपारदृधालोःस्मरणार्थन्तुलिट्॥इत्थंवाधित्वापरत्वाद्वृद्धिः॥७१॥ननेतिनस्यकरःअमर
रुहकल्पवृक्षोयतःबभूव॥किंकवन्अर्जुनान्याचकलोकान्बहुधनदानात्अनारतंसदालो

र्धि

नै०टी०१५

तार्थयन् प्राप्तप्रयोजनात् कुर्वन्॥ तस्मात् स्मनिर्बंधैकरूपे तदीयमूले करमूले निहितं स्थापितं द्वितीयवत् द्वितीये
न वैवाहिकेन सूत्रमयेन मांगलिकेन सूत्रमयेन गुंफं सौवर्णिकं कणं आलबालतां दधे तदीयकरकल्पतरोः कं
कणं आलबालस्थाने जातमित्यर्थः॥ कल्पद्रुमूले आलवालद्वयं भवति मिलितमुद्रिकाद्वयवत् द्वयोर्मिलित
योर्घटना द्वितीयवदिति वा॥ ऋवक्षुत्रेस्रायां॥ विनिवेशितं तं ददतिपाठः साधुः॥ ६५॥ रराजेति॥ मनलः राज
कं कुर्वन्निव दीर्घमंडनं बकुलभूषणं तस्य मंडली श्रेणी तां चुचुंबे इति युक्तो तयोरंगदादिवर्तुलवाभूषणाश्रय
योर्वज्रमाणिक्यानां क्रमेण सितारुणत्विषोः श्वेतरक्तदीप्तोर्मिघनउर्ध्वोर्ध्वदिक्सहितमाभ्यादिदत्वादिङ्मुख
नासुलमुखो तत्र प्रसरतो अवनीयितेनार्जितो क्रमेण यशः प्रतापौ ववर्षतुः प्रसस्रतुरिव॥ हीरकमाणिक्यानां मंडना
श्रितत्वात् नदीप्तोरपि मंडनाश्रितत्वं युक्तं यशः प्रतापौ सितरक्तौ शोभौ इति कविसंकेतः॥ इवाध्याहारः॥ ६६॥ दृतदृति
नलः समस्तायि अपघनाः हस्ताः मस्तकाद्यंगानि तानवलोक्य तेऽएवं शीलानि तत्र स्थितानि तेषां विभूषणानां घनेसा
न्द्रमक्षिमंडले रत्नसंघे स्वरूपस्य स्वाकारस्य रेखां परमां शोभां स्वलावण्यपरमर्यादां वाऽवलोक्य सेवया चित्ताश्रि
श्रितासेवाचतुराना पित्तादयस्तेषां दर्पणार्पणं प्रतिबिंबदर्शनार्थं मुकुरार्पणं निःफलीचकार॥ आदर्शस्तस्य र

नैरेव च तत्त्वादिति भावः ॥ मंगलं आदर्शनार्थं मंगलं आदर्श इति बुद्ध्या तैर्दर्पण आनीतस्तेन च विलोकित इति तेषां
सर्वांवा तुर्थी ॥ स वा च नेति तेन विघ्न इति च पूर्णाः ॥ ७७ ॥ बलोकीति ॥ चलंती — घुघ्घोत्पद्यमानासुतस्य स्फुरिरंतर हर्षेण
लोकेन तदीयानां नलीयानां आभरणानां अर्पणद्युतिः संस्थानविशेषस्थापनजनिताः शोभाः केवलं न बलोकि
किंतु विस्फारिता निःप्रसारितकिरणानि रत्नान्येव लोचनानि येषां एवं विधैः विस्फारितै रत्नलोचनैः कृत्वा वा ॥ अथ
तेन विभूषणैरपि परस्परेण अन्योन्यस्य आदर्शीकृत विलोकिते वा अन्योन्यशोभा विलोकनार्थं विततिनैरपि तैर्नेत्राणि
प्रसारितानीत्यर्थः ॥ आभरणशोभा सर्वैर्विलोकिता मंडनमात्रं च रवस्थितरत्नमिति भावः ॥ ७८ ॥ तत इति ॥ तत
भूषणधारणात् पश्चात्स नलोन्नपञ्चार्धीय नामानियंतासारथिर्यस्य अथ च रुक्मस्मार ध्येयस्तं रथं किरीट
वान्सहजकिरीटयोगात् किरीटिना माष्टयाः सूनुरर्जुन इव आरूढवान् किंभूतो नलोऽर्जुनश्च युधि कृतानंगप्र
पिता अरिक्षितिः कृता वैरिणां पार्थानां जयं तो जयप्रदातारो पिरथयिनेति वा ॥ अर्जुनपक्षे युद्धे हतो निमन्युवधात्तदि
रात्रुभूतः क्षितिनिद्रा जाजयरथो येन कृतोरीणां कौरवाणां संबंधी राजा जयद्रथो येनेति वा ॥ तथा जनीब धूम
र्हति जन्यो वरस्तत्संबंधिन्यां यात्रायां मुदितो हृष्टः ॥ जन्या वरपक्षीयास्तैः सह यात्रायां वा हृष्टः ॥ अथ च युध

संबंधिन्यां विजययात्रायां स्पृष्टः ॥ तथा मुकुटेन मंडितः वरयात्रार्थं निर्गत इत्यर्थः ॥ दृष्टोपरपतंग इतस्थानित्र दृत्तिग
क ॥ नियंत्रिकं न दत्तस्थेति कप ॥ ७३ ॥ इदानीं वरसंदर्शनार्थं पुरनारीसंभ्रममाह ॥ विदर्भेति ॥ अथ रथारोहणानं
तरं विदर्भेति नाम यस्य त्रिदिवस्य कुंडिनरूपस्य स्वर्गस्याप्सरसः सुंदरनार्य एव स्ववेश्मपाठ क्वलं प्रकाशमानं मूर्द्ध
शृंगाररूपं वा तं नलं रसोदयाद्दर्शनानुरागाभिवृद्धिहेतोः विच्छित्तिविशेषेण द्रष्टुं धृतप्रसाधना धृतालंकाराः
सत्यः स्पृहाक्रुद्धहा देत्यागत्या निसर्गरम्यान् राजपथान् अधिकं नितरां व्यराजयन् ॥ तद्योगात् अप्यधिकं शुशुभिरे
इत्यर्थः ॥ तासामिति सौंदर्यमुक्तं ॥ सर्वाश्रापि तद्दर्शनार्थमागता इति भावः ॥ ७४ ॥ अजानतीति ॥ नलस्य विलोकनो
त्सुका ऽत एव संभ्रमेण धूतार्द्धकंपितार्द्धकंपितार्द्धमपि स्तनोत्सुकं कंचुकारम्भे कुचावरणवस्त्रं अजानती अनाहृ
एवती कापि पुरांगना चलते वरयात्रोत्सुखायत स्मिन्नलाय पुरोगं गोक्तत्वेन ज्ञत्वा मंगलकुंभस्य कुंभस्तनत्वं कं
कुंभरूपपूर्णकुंभस्य संनृतिं संज्ञां उपदामकरोत् ॥ सभी धृतेत्येनेन ... तन्स्यापि पुरांगनात्वादपि तुच्छस्याति
सौंदर्यमिति च व्यज्यते ॥ वरस्य च पुरः पूर्णकलशदर्शनं शुभाय भवति ॥ तस्मै क्रियया यमग्निप्रेती नि सं प्रदान
त्वं ॥ ७५ ॥ सखीमिति ॥ सोयं नलः समागच्छतीति एवं करेण सखीं नलं दर्शयमानया दर्शयंत्या कयापि प्रदर्शना

र्थमेवं॥ कतउत्संगात्सकाशाज्जवाद्वेगादुदस्तस्योत्क्षिप्तस्य करस्य सुवर्णस्य हीरकधारा तीक्ष्णाग्रभागे कं-
कणारत्नभूषणे विषज्य वेगात् निघातवशात्त्वग्लग्नात्त्रुटितैश्छिन्नैर्निर्मलविलोकनरसादतर्कितैः रक्तैस्तैर्विच्छेदाध-
पतैर्नैर्हीरैस्तदीयमुक्ताफलैर्लाजत्वात्क्षणमात्रं क्षणउत्सववशात्संबंधिवालाजमोक्षणं कृतं॥ अन्यरमणीनिरंतरक्रि-
यमाणलाजमोक्षणमध्ये मौक्तिकमोक्षणमपि क्षणं तन्मकार्यं भूदित्यर्थः॥ दर्शयामानयान्विच्छेत्ति कर्त्राभि-
प्राये क्रियाफले आन विरुक्तोत्स्पत्राणि वा दृढहो रात्मनेपदे चेति वक्तव्यात्द्विकर्मकत्वात्सखीमिति कर्मत्वे
सखीरिति च पाठः॥१५॥ लसदिति॥ तद्युवतीनां सम्मूहे योवत्स्मेव प्रियासक्तो वरयात्री स्मुखस्य तस्य नृपस्य प्र-
ग्रास्तवस्तूनि श्रुतस्तस्य कर्मंगलद्रव्याणि यज्ञिरे॥ किं भूतं तं नखादर्शा मुखाम्बुजा निस्मितान्येव प्रसूनानि पुष्पा-
णि वा एव मधूनि पाणय एव पल्लवानि इतरेतरयोगद्वंद्वसमाहारो वा लसंतः स्फुरंतः कांतयो नखादर्शनाय
स्पततः॥ एवंविधपुरनारीदर्शनात् भैमीपाणिग्रहे नितरामम्युक्तायेवमन्वितस्य बुद्धिरुदभूदिति भावः॥ अति-
सौंदर्यं तासां सूचितं॥ दध्यादर्श दर्शादि दर्शनं शुभावहमिति वसंतराजग्रंथे ज्ञातव्यं॥ आरोप्यमानस्य प्रधान्या-
यज्ञिरे इति बहुवचनं॥१६॥ करेति॥ एकिकापि विलासिनी पुरनारी करस्थं तांबूलं जिघत्सुर्भक्षयितुमिच्छुः स-

नै०टी०१५

नीकरस्थंलीलाकमलंमुखेनिचिक्षेप॥यतोनलविलोकनेविषयेएकाग्रेतत्परेविलोचनेनोत्पलेयस्याःसा॥तांकुत्र
त्रांत्पाकमलंमुखेनिक्षिप्तमित्यर्थः॥कयेवमुखस्थलक्षणेराजनिविद्यमानेकमलस्यद्वितीयाराजतातयाजातायोरू
द्रुक्रोधस्तयेवा॥उत्तमेममसन्मुखेनसहेनत्स्पर्द्धनइतिक्रोधादिवमुखेचकमलंक्षिप्तमित्यर्थः॥नलसौंदर्यातिशयद
र्शनेनविमनस्कतोक्ताजिघत्सु॥लुङ॥मनोरित्यदेःघसादेशःघस्लृअदनइत्यतस्माद्वामर्नतादु॥नलोकेतिष
ष्टीनिषेधात्तांवृलेजिघत्सुरितिद्वितीयेतियोगविभागात्समासः॥४७॥कयेति॥कयापिस्वैरिण्यावीक्ष्यानलं
नविमनस्केत्यक्तविषयांतरेलोचनेयस्यतस्मिन्समाजेजनसंघेएवसमीडपत्र्यागतस्योपपतेर्जारस्यपरिरभ्य
परिरम्भेआलिंगनविषयेमाहसेनिविचारनिर्णयप्रवर्तनेनैतत्वात्तदानलविलोकनसमयेतदालोकनेन
लदर्शनंघनंनितरांसंधिषुन्नयथातथाश्रवचन्त्यत॥जारकंठकेजारिकर्मकैर्वाह्यालिंगनेर्व्यवधाना॥त्तयानलं
सम्यक्नादर्शीत्यर्थः॥तदातदाकदाचित्कदाचित्वक्लेतत्वान्नलस्यालोकनंक्षतंनतुनिरंतरमितिवा॥देव
यात्रादिकोजारादीनांकामशास्त्रेसमयेउक्तः॥४८॥दिदक्षुरिति॥नलंदिदृक्षुरतएवदर्शनानुरागवशेनविगत
पक्ष्मसंसंकोचेवीक्षणेविशिष्टेनेत्रेयस्याःसातथामृगाणांन्नलोकवासिनामयोग्यांदिव्यांतनुश्रियंदधतीअन्यस्त्री

चित्तनागरीभूयं प्राप्य देवांगतसाम्यापि दर्शनौत्सुक्यात् पदाग्रमात्रेणैव यद्यस्मान्महीं महीस्पृशत् तावता केवलं
तावन्मात्रेणैव नाप्सरोऽनवत्॥ अप्सरसोऽप्यनिमेषनेत्रा मनुष्या नर्हंदिवैकन्योरूपां कायकांतिं बिभ्राणा॥ केवलं पदैक
देशेनापि भूमिं न स्पृशंति॥ इयं तु निर्निमेषदर्शनोत्सुका नयां गुष्ठादिमात्रेण भूमिं स्पृशंती तेनैव धर्मेण तत्तुल्या नाभूद
प्स्वसर्वसाहरूपमेवेत्यर्थः॥ अप्सरोऽनवदिति क्विप्॥ अप्सरः शब्दस्य बहुत्वेऽपि त्वन्येत्यकदृश्या। नवदित्येकवचनमपि युक्तं
आपः सुमनसो वर्षा अप्सरः सिकताः समा॥ एताः स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरे॥ त्रयमिति वचनादेकवचनांतादप्सर
शब्दात्क्विः॥ बहुजनदृष्टपूर्विणो मित्यादि व्यवहितावा पादांगुष्ठमात्रेण तु वं स्पृशतः प्रोत्थमितां गाः पदपंक्तीति
दि दूषणानां स्वभावः॥७०॥ विदूषणेति॥ अपराद्धं तः करणे शरीरमध्ये वा अमांतं समर्दं शरीरमानाधिकमा
बहिरवस्थितं नलदर्शनजं प्रमोदं विदूषणानां स्वं सनस्पर्शं नितवमंडनं गालितमिति प्रत्येकं कथनेति विषये
अर्पितैर्दूतैः करप्रहारैरपि धूननैरपि तच्छरीरकंपनैश्च कृत्वा प्रसह्य बलात्कारेण स्वसखीभ्यः पुरः समापयंती॥
विप्रावी विशादिना विस्मितत्वेन शब्दमस्पृष्ट एवनवकरणेन ताडिते पतित विस्मृतभूषणादिसंवेदनायकैः प्यते वेति॥ तथा
न्यदपि ऊरुस्थलोदावमा ऽभूमादि बहिरवस्थितं सद्वलात्कारेण करताडनैः करतलैः धूननैश्चांतरमाप्यतं ऽ

तिवलौकिकीरीतिः॥ नलदर्शनोनुरागादिति विमनस्काः स्ताजाता इति भावः॥ दुरासमापयतीति दुरित्युच्चास्त
इति स्फुते लट्॥८०॥ विभूषणेभ्यः शत्रुहेन किमिति न ज्ञापितं इत्यत आह॥ वसंतेति॥ नलदर्शने सक्तैश्चेतोयासां मृ
गीदृशां श्रुती कर्णाविपिबंतं सनीलांबुरुहेण कर्णाभूषणनीलोत्पलेनैव दृशा नेत्रेण नलं विलोकमाने सत्ये
यस्माद्विमनी बभूवतुर्व्याकुले जाते तेन हेतुना ते श्रुती किं विभूषणैस्त्वं सनश्रोत्रानं न शुश्रुवतुः॥ वक्तुषी कि
लश्रवणानर्हत्वानाश्रुतुलां कर्णे विश्राठुयोग्यावेत्वेत्यर्थः॥ तासु दृशां यथा तादृग्लोकनेन विमनस्का
जातास्तथा कर्णावपि विमनस्कौ जाताविति वापरर्थः॥ विमनी बभूवतुः अरुमनत्रपि विलोपश्चकाश्चिदि
ति॥ पश्यंतीषु तासु मध्ये कांताः सुंदर्यः काश्चित्सुरनार्थः भूषणानां येमनयस्तेषां भूषणानां तानांनामनी
नां रत्नानां त्रोधिः समूहे॥ आभूडं शिखामस्त्रिव्याप्य निबुक्तितमाच्छादितमिव तत्र ब्रुडितमिव तं नलं वक्तुस्
पान्यां प्रसृतिभ्यां अर्द्धसंकुचित॥ करकुल्फलाभ्यां चुलुकितं पीतं निर्माय कृत्वा प्रसृतिप्रमाणाभ्यामक्षिति वि
शालाभ्यां वक्षुर्भ्यां सादरं दृष्टं कृत्वा इति मोग्ध्यादेवगुणपादर्शकं ततर्कयामासुः॥ इति मोग्ध्यैकि निमिषप
दलसंकोचे श्रं ततमतिशिर निमिषाणि साहस्त्रीणि सहस्रसंख्यानि दिशंदृष्टिनिर्जोति दृक् सराजस्य

दियज्ञानां वेदाद्भुतो यत्फलं साध्यं तद्रूपाया जगतीभुवनं स्वर्गः तस्याः सार्वभौमस्य चक्रवर्त्तीति इन्द्रस्य च
मिनार्थेन लक्ष्म्यालिंगितः। स्पृष्टः किं॥ अथ च तेनेरपरिच्छन्नसहस्रैर्नवनवशादिंद्रोयमिति त्रातृपादं इन्द्रस्य सहनेत्रला
दनेनास्मान्निःसंबंधं युक्तमिति बुध्या समालिंगितः किमिति उत्प्रेक्षा। एतदेक्षमेोरमैत्सौंदर्यैर नवाकुर्ल्वे चा
क्तौ सहस्रशब्दः पंक्तेः परिमितवाची। सहस्रं परिमाणमासां ताः साहस्र्यः तदस्य परिमाणमित्यर्थे अशीतमा
नविंशतिकसहस्रवसनादिनित्यप्रवाञ्छ्यानवन्निति॥ सूर्यतप्यामनो उत्र स्तुघुम्नाख्यो नरपतीराजा पार्व
तीवनप्रवेशनिमित्तेन शिवशापसनेन हेतुनाइलास्यास्त्री जन्नस्त्रीत्वं प्राप्तः। स च बुधाऽऽन्नधारणेन पसज
ननी अभूत्॥ उर्वश्याः प्राणान्तरूपा तिप्रायात्स्वर्वैश्यायाः प्राणाभूतं प्राणवत्प्रियमतिसुंदरं तं पुरूरवसम
पितनुकत्वा कांत्या विजयमानः परान्नाबुकोसोनलः अधुनेदानीं हरेणारब्धन्तः क्रोधस्तस्येधनदाह्यमे
दनः तस्य सिंहासनं दग्ध्वात्वा कामिनमूर्न्यं अलंकर्त्तुं योग्यतया न्नृषितोपि तु अलंकर्मीणा कर्मदक्षमा तिसम
थास्वाना विकीन्नृषणे जनितान्वश्रीः शोनायस्यापो एवं भूतउच्चनवतजातः। इति पौरस्त्रियत्राग्रलिखरितं
तिमस्तोकेतिसंबंधः। जीर्णः कामो दग्धः पुरूरवास्त्वनेनैव जितः। तस्मात् शून्यं कामसिंहासनं नृपः ध्येदेः॥

मर्त्यकाम एवोत्पन्नः अतिसुंदरोयमिति भावः॥ कृतयुगादौ इलो नाम राजा मृगयासंगात् हरनिवारिते
उमावनं एकाकी प्रविष्टः स्त्रीबभूव तामेकाकिनी सुंदरी दृष्ट्वा चंद्रपुत्रो बुधः कामातुरः सन् स्वाश्रमं नीतवा
न् तस्यां पुरूरवो नामानं पुत्रमजीजनत् इति विष्णोत्तरपुराणे कथा॥ विजयमानः विपराभ्यामिति शानच्
कर्मक्षमोलंकर्मीण इत्यमरः॥ ३॥ अर्थीति॥ विशेषज्ञया गुणानामधिकतरत्वं विदुष्या विदर्भराजसुतया
अर्थी मार्गणोऽभ्यर्थ्यमानः॥ सानुरागो यस्तो सर्ववस्तुपर्वणां सर्वदेवानां पतिरिंद्रोपि एतस्य प्रत्यक्षलक्ष्या
ति सौंदर्यस्य पूनः श्रेणीता रूपस्य नलस्य कृते निमित्तं पर्यस्ता क्लिष्टानुरागत्वं प्रस्तुतत्वपि सौंदर्यादिगुणानाम्
नल्पाद्यतिरिक्तं स्वयुक्तं उचितमेव कृतमित्यर्थः॥ नाम प्रकाशे। अपि तु पुनः निर्जराः इंद्रादयश्चत्वारोपि देवाः
शिष्टानामग्रस्तिरूपाः सुमनसः शोभनमनांतःकरणा अपि सुमनसः प्रसिद्धाः संतोपि वा सुमनस इति संज्ञ
या ख्याताः॥ संतोपि तया भैम्या अस्मिन्नले वृते सति दुर्मनसः सविषादमनस्का जाताः, सा तेषां मतो चित
अनुचितकारिता स्तो दुं छेतुं नो वित्ता॥ युक्तान हि सा बुद्धिः कार्यवशादपि स्वधर्मःपरित्यज्यते। एते स्तुपरि
त्यक्तस्तद्वयं न सहामहे इत्यर्थः॥ कृते अव्ययी॥ ४॥ अस्येति॥ अस्य नलस्य चिरकालं वरणमालं लिप्सा

र्थं उत्कंठिते कंठे लोठिन्याश्च लंतया हृदयावलंबिन्या वरणस्रजः साक्षिभिः प्रतस्फुरद्भिर्निःदिग्गैः श्वतुर्भिरिं नृपि
निर्दिग्धे क्वाले त्वयात्रागतां॥ स्वयमास्फुटद्विदीर्यमानमपि स्वं वक्षः परित्याग इति वा॥ छुरिकादिप्रक्षेपेण स्वयमे
ववा किमिति न स्फोटितमिति वा॥ अग्न्यादयस्तावति पुंठलास्फोपहासं कष्टं॥ अद्यैनेम्यां विषये व्यर्थमनोरथेन सता
याहस्यपराहृत्य उपनतेन शचीसमीपे प्रणामवशान्नम्रेण शातमखेन शतयज्ञकरण स्वस्वर्गाधिपत्येन देवेंद्रेणापि
शचीव इंद्राणीपि कथं प्रसाद्यातुं नेतुं शक्या॥ यतः कोपवशाद वज्ञावशाद्भासगवीकृतं वक्रीकृतमास्यमेवांबुजं यया॥
संमुखानवलोकनात्प्रसाधनार्थमनेन कृतमपि प्रणामं जल्पादिकेन दृष्यति॥ ततः कथं प्रसाद्यो॥ नेमीनलह्यासह
त्याशचीव रुष्टा अपत्रोपि जातमितींद्रस्य महत्कष्टं ज्ञातमिति वा॥ दिक्षु नेर्टद्भरैः नृपैः स्वं वक्षः किमिति न स्फो
टितं नृपामनुष्यास्ति ष्टं तु देवेंद्रस्यापी दृष्टीशाजातेति वा॥ उपगतेनेति पाठे शचीसमीपगतेन॥ रूपामिति॥ नोसरूपाः
स्वयं विदर्भजां मुदे हृषलिकान्नातरको त्रिविधयसी श्रेष्ठतरां अविदुषी मृजानंतीमजानीत॥ किं तु हृषपि कृपयाकीर्णिं
प्रशस्यतरेति नेमीवेत्सेवेति जानीत॥ यस्मात्सेयं नैमीमघवता प्रयोजनेन स्वमात्मानं द्वितीयांशचीं लक्ष्य साधुना
वीकरत्न॥ नकारयामास॥ इंद्रे दृष्टे तेलतपत्नीलांछवांशाञ्छवावाप्यतं नवेन्नत्वसोदृष्टेत्र तस्माद्वितीयाशचीनान्नवदि

युक्तमेवानया कृतमित्यर्थः॥ इंद्रे पि इति कीर्त्तिर्न विष्यतीत्याशंक्याह॥ त्वयास्मदरितेकः कविः स्वर्गविवादिरूपेण
वर्णनात्मकं काव्यं प्रबंधं रचयांचकार॥ सत्राची वर्णनकारी नो स्माकं मन्नेस्मत्त्वं वा कथयतां॥ यद्यस्ति अपि त्वन्निरूपणं
नास्त्येव॥ एतस्यास्तु नैषधाः उत रसानां शृंगारादीनामेव रसानां जलानां धुनी नदी तस्याः पात्रे स्थाने भूतिथ च रस
नदीप्रवाहरूपेण श्रीलादिचरित्रविषयैकैः पराशरव्यासशुकादिभिः काव्यं च करिष्यते॥ अपि तु तैरपि नारतादे
तद्वर्णनकाव्यं करिष्यते किं पुनः श्रीहर्षादिकविभिरित्यर्थः॥ इंद्रवरणेन यद्यपि स्वर्गसुखप्राप्तिस्तथापि तत्त्यन्वी
त्वा छवीत्वे पितस्याः कुत्रचित्केनाप्यवर्णित्वादिंद्रापेक्षया अधिककीर्तिर्नलस्य वरणे तु एष श्लोकत्वात्सर्वैरपि वर्ण
नीयत्वात्तत्प्रसंगात्स्वस्यापि वर्णनीयत्वमहती कीर्तिर्भविष्यति सा च स्वर्गसुखदः सकाशाच्छ्रेयसीति विचार्य रूप
रित्यागद्वारः स्वर्गसुखमपि परित्यज्य अनेनानलो वृत इति युक्तं कारेत्वादेतादृशी कापि विदुषी नास्तीति तत्त्वतः दि
व इति पाठे स्वर्गसुखादित्यर्थः॥ करिष्यते कृदंतत्वादिष्ट॥ ग्रावावेदमीति॥ हे सख्यः अवत्पावासः स्थितिर्यस्य स प्रस्त
नायुक्त इव कामरूपोपि नलनामा युवा तरुणो देहश्रिया कायकांत्या कृत्वा पशूनां तिनाम स्माकं नेत्राभ्यां स्वदते रोच
ते॥ किं तु त्या वैदर्भ्या बहुजन्मभिरनेकजन्मसु वा निर्मितस्य लब्धं वा नारायणादिजन्मस्य तपसः स्तु तत्त सत्रिलि

र्थं उत्कंठिते कंठे लोठिन्याश्च लंतया हृदयावलंबिन्या वरणस्रजः साक्षिक्षिप्तस्य हृदयेशितुः दिष्टे टैश्चतुर्भिरिं कृपि
निर्दिग्ध क्याले स्वयाज्ञावात्॥ स्वयमास्फुरद्विदीर्यमानमपि स्वं वक्षः परित्यागइतिजाव॥ छुरिकादिप्रहरूपेण स्वयमे
ववा किमिति न स्फोटितमिति वा॥ अग्रमाद्यस्तावति ष्टं तु हास्योपहासं कष्टं॥ अद्य नैम्यां विषये व्यर्थ मनोरथेन सतो
व्याहत्यपराहत्य रूपेन तेन शाची समीपे प्रणाम वशान्नम्रेण ज्ञातमखिनज्ञातयज्ञकरण स्वस्वर्गाधिपत्येन देवेंद्रेणापि
शचीवइंद्राण्यपि कथं प्रसाद्यानुनेतुं शक्या॥ यतः कोपवशाद्वज्ञावज्ञा ह्यासगवीकृतं वक्रीकृतमास्यमेवांबुजं यया॥
संमुखानवलोकनात्प्रसाधनार्थमनेन कृतमपि प्रणामां जल्पादिकेन इच्छति॥ ततः कथं प्रसाद्या॥ नैमीनल ह्यासह
स्याशचीव रूष्टा अयश्लोपि जातमिति नीरस्यमहत्कष्टं ज्ञातमिति वा॥ दिक्कुनैरैः स्पृश्यैः नृपैः स्वं वक्षः किमिति न स्फो
टितं नृपामनुष्यास्ति ष्टं तु देवेंद्रस्यापि दुःख्याज्ञातेति वा॥ उपगते नैमिपार्श्वे शचीसमीपे गतेन॥ ष्पा॥ मेति॥ नो सपक्षः
स्वयं विदर्भजां मुदा हर्षात्सिकाग्रात्कौ निर्भियसीश्च ष्टतरांश्च विदुषी॥ जानती मजानीत॥ किंतु हर्षपिद्भ्या कीर्ति
प्रणास्यत रेति नैमी वेश्मेवेति जानीत॥ यस्मात्सेयं नैमी मघवता प्रयोजनेन स्वमात्मानं द्वितीयां शचीं लंभं साधुना
वीकरत्नानकारयामास॥ इंद्रेष्टेनेलतया नीला छवांश्च हृद्वा अलं नवेनत्वसौ हृतेन तस्मा द्वितीया शचीनान्नव दि

न फलमूतया॥ अतिसुंदरमस्मै प्रीत्या स्मरेत्रे पश्यत इत्यर्थः॥ विशिष्टया देहश्रिया उपलक्षितो वा॥ अशरीरोपि नैमीठु
एप बाहुल्यवशात्सशरीरः काम इवेति भाव इति वा॥ सोयं नलः भीमजयास्त ह्ययोगमवद्यापत्यसंबंधं अनुरूपत्वविपाकोति
नरानां मन्ये त्रात्यतासविना द्वैत मामस्तम जतो आश्रयतु॥ उभयोरेकत्र मेलनादयमेव कातीनामाश्रयः कांतिस्वरूपो वा
न वस्तु नान्य इत्यर्थः॥ किं नृतयागीर्वाणलये स्वर्लोके सार्वभौम इंद्रस्य स्तुतं तप्ता स्मारः उएपरात्रिस्तिना पिदुःप्रापयाः लभ्य
या॥ सातमखीजन्ये न उएपन स्वर्गविक्रव त्रिंतिंजे नलहं तेनापि दुःप्रापत्वात्तैभ्याः सोन्तागपातित्रायिनलस्पचेदापे दया
सोन्तागपातित्रायः उएपातित्रायतित्रायस्वर्गीर्वाणलयेत्यादिना सूचितः॥ अन्योपि अष्टांगयोगमनुभूय बहु उएप दुःप्रा
पया पित्रीमा प्रराज्ञा तयाइश्वरप्रसादलब्धया विद्यया माद्वैतं परमात्मस्वरूपं भजति॥ नेत्राभ्यां रूपयनिामितिमंप्र
दानत्वा प्राप्तार दुःप्रापियतिर्दृतीयेतियो गविभागात्समासः॥ ७०॥ स्त्रीति॥ स्त्रीपुंसयोः सर्वयोः व्यतिरकं जनैर्विशेषे
णातितरां समेलनं नयतः ऊर्ध्वतः प्रजानां पत्यु ब्रह्मणः पुनः २ संयोजनशिल्पिणलक्षणस्या सतो उभयोर्नलचैम्योर्दं
पत्यसंपत्त्यै जाया पतिभावस्य उत्कर्षायपरिपाकिमः परिपाकेन निर्वृत्तः स्वारस्येन परिणतपाको नूक्तिः॥ सर्व स्त्री
पुंसयोजनाभ्यासः अलुत्तमानुरूपे तदुभयसंघट्टेन फलितः सिद्धमित्यर्थः॥ तथा चित्तोस्तु वः कामस्यापि अभ्यासं स्मारी

संसारं मर्यादीकृत्य सर्गादिमारभ्य प्रलयपर्यंतं पुरंध्रिपुरुषयोः स्त्रीपुंसयोर्मिथः प्रेमाऽन्योन्यमनुरागस्तस्यापरप
मा संज्ञनं तदेवसद्मनो विनोदनरूपा क्रीडा लीला तयापि एवं जंपत्योर्जयोर्नलनैषधीरूपयोर्दंपत्योर्गाढस्य
रिं दृग्गोचरनपनेयस्यरागस्य मिथोनुरागस्य रचना तदुनाम्ना दूतोः प्राकर्षिप्रकृष्टकाष्ठापन्नं याजातं। तत्र अनुरा
गजननक्रीडायाः प्रकर्षे त्रैव विश्रांत उत्तरत्रापि एव मनुरागस्याभावादित्यर्थः॥ एतादृशोरस्वरूपो समानानुरा
गो वान्योस्त्रीपुंसो कालत्रयेणस्तद् इति भावः॥ व्यतिरेकं उनं उपसर्गात्सुनोतीति षत्वं। परिपाकिमन्नावप्रत्ययां
तादिमनि जितेवक्ष्यादिमणिच्चू॥ जंपती जायापतीजं भावः॥ नलो तालमिरिति॥ महत्वात्रीति प्रसिद्धायाज्येष्ठान
न्तत्रयुक्तायाज्येष्ठ प्रार्थमायाः। सा वं धनिमहे उत्तवेम हत्पति प्रसिद्धवाज्येष्ठी महेयष्ट्रशिः यासां नेत्रैः प्राउत्थो
रो अथवान्यापेक्षया प्रथमं मंचं पर्यंकमेव च न्वात्मनःमंच स्थो मार्गगच्छन्स्त्रीपुरुषा तमः परिचितो बउवारं दृष्टः तर्ता
तारिरेवास्त्रिनिः पथि वरयात्रायां यात्वरथस्थ आगच्छन्नेषनलो दृष्टपतएता दृकउएपं यास्त्रिरस्मा दृष्टीस्त्रिरजि
तं तास्त्रिरेवायं दृष्टं त्राक्योन त्वन्यास्त्रिरित्यर्थः॥ अथवयास्त्रिः पुरुषो नेमो दृष्टस्तास्त्रिरेवतत्तुल्यो यमभीति ज्ञातुं
शक्यते न त्वन्यास्त्रिरित्यर्थः॥ तास्त्रिरेवस्तास्त्रिलाषीकटाक्षै दृष्टपते यास्त्रिरेवं प्रकृतं तं तत्रान्यास्त्रिस्तु कोनु केना

पिबीच्छितुंनशक्यःकिंपुनस्तस्मात्तुरागंकटाक्षैरिति।पौषेगुरुःत्राह्मीचैवप्राजापत्येरविस्तथा॥पूर्णिमान्तेहमासस्यम
हाज्येष्ठीतिकीर्त्तितेति॥पुरुषोत्तमतुल्योयमितिमन्महेजानीमहइतिन्यायः॥वाक्यार्थः कर्मा उत्कलदेशेज्येष्ठपूर्णिमा
यांइन्द्रनीलगिरिनिवासिनःश्रीपुरुषोत्तमस्यमहोत्सवःक्रियते।तत्रचश्रीकृष्णबलभद्रसुभद्राप्रतिमाधिष्ठित
विरचितसप्तभूमिकारथयानः पृथक्निर्गच्छंती।तस्यदर्शनंनिःश्रेयसश्रेयसेभवती।तिपौराणिकाःयदाहुः॥दोलारूढ
त्वांगोविंदंमंचस्थंमधुसूदनं॥रथस्थंवामनंजेष्ठ्यांदृष्ट्वापुनर्जन्मनविद्यतइति।तथाययास्त्रियात्रघातिघातिनिपा
तकविनाशिनियमस्तुनागंगोधयोयोगेसंगमेप्रयागाख्येमाघेसत्सुमकरस्थेरवौमाघेमासपविछेदेनस्नानंतन्तस्या
ऽस्पनलस्यपतयालुम्निरतिवंचले।शितासितेगंगास्यधवले।दृक्चामरेनेत्ररेवचामरेनेत्रव्यापाररूपेश्यामरै
स्त्रीराट्स्त्रीराजेवस्याऽभवेतइतिमन्महे॥राजाहितेशुभ्रधवलेश्यामरैवीन्यतिप्रयागमाघस्नानेजन्मनितात॥स्त्री
राजत्वंप्राप्नोति॥तत्रस्नानेनसितासितेतुयेःस्नानंमाघेमासियुधिष्ठिरनतेषांपुनरावृत्तिःकल्पकोटिशतैरपि
तिवचनात्॥स्त्रीपुंश्रेष्ठासेवनेवदितस्पर्धा॥अथचर्यांकटाक्षैःपश्यतिमातुमर्वान्योप्यधिकास्तावत्त्रेभ्यश्चवचनात्
त्रैमासावप्रयोगेसकलमाघस्नानफलंलब्धा।यत्तोनेमीसद्वृत्तीकापिकृत्त्वापिसास्मिन्योर्णमासीतपादिनाज्येष्ठ

मु

नै०टी०१५ इत्यनास्तीतिभावः॥ ज्यैष्ठीति ज्येष्ठनक्षत्रयुक्ता पौर्णमासी। तिनक्षत्रेणयुक्तः कालः इत्यणि टिड्ढा॥ तद्युक्ता मासाभि
धायी त्वेपि सास्मिन्पौर्णमासीत्यादिना ज्यैष्ठी इत्येव भवति॥ ज्येष्ठ इत्येवेति पाठे तु छान्दसो वा स्वित्कः। संज्ञासु सर्वस्य वि
धेरनित्यत्वाद्वा भावः कथंचित्समर्थनीयः॥ स्त्री राडित्यसंबंध षष्ठ्या निर्धारणसप्तम्या वा समासः। पृथग्वापदं
राज्ञो वसोस्त्रीत्यर्थः। कालभावाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणामिति देशश्चाकर्मकाणां कर्मसंज्ञो भवतीति
वक्तव्यमिति वचनान्माघस्य कालत्वादेतस्मात्कर्मकत्वे धातोः सकर्मकत्वात्कर्मणि विहिते न तडागस्यापि हि
तत्वान्माघः स्नस्न इति प्राप्ते माघमिति द्वितीया चिंत्या॥ अत्रार्थे हरिदत्तमिश्रैर्गदिबुध्यादिसूत्रे अकर्मकाण
मितिकालभावाध्वदेशव्यतिरिक्तकर्मरहितानामित्यर्थो ग्राह्य इति सिद्धांतितं॥ अथवा कर्मणि चेत्यः दावपि
यत्राकर्मकग्रहणं तत्र सर्वत्र द्रष्टव्यं। तेनात्र माघस्य कर्मत्वेपि स्नेइति भावे लिङ्॥ सिद्धो भवति यद्वा माघ अर्धं
यस्यां क्रियायां यथा तथा स्नाताया मम सर्वपापक्षयपूर्वकसर्वमनोरथसिद्धिर्भवत्विति संकल्पेत्यर्थः॥ कलु
षं दूजिनैनो घेत्यमरः॥ यमुनागंगेति पूर्वनिपातानियमः पूर्ववत्परिहरणीयः॥ छाया वेदनीति॥ हे सख्य तस्य
नस्य संबंधिनी पूत्त्वान्यधीता नियानि पूज्जानि पद्यानि तेषां क्रमेण नलविषयकवचिरिः कृतेरस्मदादि त्रिश्च पठिते

काव्ये: तस्या भैम्या दृष्टेः रतीति सकलद्वीपाधिपादिराजेंद्रदेवेंद्रादिदिक्पालपरित्यागं रूपस्य चरित्रस्य च
मेः परिपाटीं निर्वाहितवती भैम्या विपुलस्य नलविषयानुरागस्य कलनात् ज्ञानात् अखिलक्षोणीविक्रेतातत्
ताविंद्रो ऽत्रास्मिन् लोके त्रिसंबंधिसकलपरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजमंदिरे स्पष्टं कथितं निश्चित
मस्माराभिरिति यावत्॥ अतिसुंदरी दमयंती इंद्रादीन् परित्यज्य यस्मादेनम् वृत तस्मादयमेव त्रिजगत्तमो नान्य
इति सर्वैर्निश्चितमित्यर्थः॥ भैमी नलं तानलविषयविपुलानुरागस्यांगीकरणाद्धेतोः तस्या वष्टंभस्य नृतस्य च
तुभीत्यादिकामदशास्फुटविरहव्यथानुभूतेः रूपस्य दृष्टत्वस्य चरित्रस्य क्रमेणेत्तेति प्रसिद्धायेन्द्रदूत्य क्रमा
त्तेवाभिगादिति॥ भैम्या अर्पितद्विषयमहानुरागजनितपूर्वोक्तविरहव्यथाभिरेवायं सकलसौभाग्यनि
धानंमिति सर्वैषां पुरस्तात्कथितमिति भावः इति॥ सुखार्थः॥ विपुलानुरागे नलस्य बंधनादिति वा॥ किं
वान्यच्च॥ अस्माकमयमास्माकः स चासौ नरेंद्रश्च नीमस्तस्मात् रूवनितनैमी तस्यास्तु जाता सौभाग्यं तस्मा
त्संततये उत्तमेयमहासमृद्ध्यर्थं वा इंद्रस्यावरणेन त्यागेन समपत्यमभावि न प्रसादितया संतोषितयाग्र
न्यामिश्राणितं दत्तं स्मृत नागादुत्रवत्स विधुवा भैवत्यादिकं आशीर्वादः लयकं प्रतिक्ष्रूरत्नत(न्नावी)दत्ताशी:

महत्त्वलाभेऽप्यपि भुक्तेति निश्चितमित्यर्थः॥ आशीःकृतिरिति पाठे आशिषां श्रवणम् अथवा आशिष एव सत्यत्वाच्छ्रु
तिवदित्यर्थः॥ अयं तु पाठः साधीयान् अनयोरन्योन्यमनुरागोऽचितं सोऽनागपमपि न विघ्नतीत्यनुमानं। दृष्टं पञ्चे
णैरध्ययनेष्टत्वमिति साधु॥ अस्माकमिति संबंधेन तस्मिन् क्षणे चेति अस्मादृशः॥ लग्नकरग्रहोत्सवे सकौपितस्याग्नि
न्याहृतानां जातानां हृतानां हंसप्रेरणादिवशितानां क्षमा॥ परिपाद्यस्तेः निर्जगदद्वितिवा॥ ॥१५॥ आसुत्रामपि
ति॥ जन्मैव आसुत्रामं इन्द्रमपि व्याप्य मरवभुजां देवानां आपमनात्पाणात् हेतोः राजव्रजेति विषये लज्जायामार्जनाप
रिमार्जनं युक्तमार्जितं तत्॥ यत्कृतं न युक्तमित्यर्थः॥ यतः तस्यैव दमयन्त्याः दर्शनस्य भावस्तद्दर्श्यं तेन नैमित्तेन रा
ज्ञामागमनं तन्निमित्तानुरोधी दाक्षिण्यं तत्रपरया॥ यो हि पदर्थनागच्छति स तस्य दाक्षिण्यं कुर्वन् लज्जां मार्ष्टि इत्युचि
तमेवेत्यर्थः॥ मदर्थमागतानामेषां मत्प्राप्तिर्न भूत् लज्जा वजाति तदुक्तमेतदिति राजस्तु मत्प्राप्तेर्न इन्द्रादीनपि नैम
नाहृणोत्॥ तत्र यत्रेन्द्रादयोऽपि त्यक्तास्तत्र मानुषाणामस्माकं का कथेति तेषां लज्जामर्जनं जन्मैव युक्तं कृ
तमिति भावः॥ मनलोत्तर्थः आयाजनं यस्य तस्य भावस्तादर्थ्यं तेन नलप्रयोजनत्वेन नलवरणार्थं यदागमनं त
त्रयः पक्षपातस्तन्निषिद्धया। नलानुरक्तया अत एवेन्द्रादीनां त्याग इति वा॥ तर्हि इन्द्रादीनां लज्जाविशेषोक्तिस्तु

ह्र

मिति देवद्रोहादस्मन्नाशशंकां परिहरति। अनयाभैम्या पत्येन नलायात्मानं वितरद्राप्रसादस्य देवप्रसादस्य फलेनातो व
ररूपत्वं विधाय सुराणामिंद्रादीनामपि स्त्रीरोषाप्ययसशां कथाया। कथामात्रस्यापि अनवसरः अवकाशाभावः स्पृष्ट
कृतः॥ अस्माण्णाहृणे दिति सेर्षं जानीया अपितु स्वस्त्रियश्च प्रतिलज्जा॥ अस्माकं परपत्नीं न लभ दृणादिति रोषः। नलं
स्त्रीकृत्य देवानवमानितवती त्वपयद्भाः। देवैः प्रसन्नीभूय। वरत्वेन नलाय भैमी दत्ता। एतद्दर्थमेव ट च्यां मागतानी
ति भैम्यपि लाषिणेति लोकप्रतीतिः भैम्या देवानामपि लज्जादिमार्जनं कृतमिति सर्वानुरागादनयोः। छम परं परैवं न
वितानत्वमु मत्रां कालि शोषीति भावः। पत्न्येन यत्तेति पाटः समीचीनः। आत्मानं वितरद्राप्रसादफलत्तां प्राप्य तेस
र्थः॥ आसुत्रामं अपिविधावच्यायीत्याव। नश्चेति दृष्टुः॥ धृत्ताभिदादित्वाद्दंड्॥ ए२॥ इतीति॥ अमूः पौराणां प्रिया।
इति स्वैरोक्ति प्रकारेण यथास्फूर्तिर्यथाभिप्राय मन्योन्यं आलिंगुः संवादं चक्रुः। किंभूता। उरवितं वत्सरागव
स्तुदरो स्कोकोकरो यस्य आनंदलं वेगत्वादिर्भिः एण्योगादानं दकारिणीस्पंदनं रयमध्यास्यपतीगछत स्तत्स्यनल
स्यत्रानुप्रतीकं प्रत्यवयवं निलयः स्थानं येषां तेषामलंकाराणां मारश्रियाश्रेष्ठाशोभयान्तृत्वा करसौंदर्यादि
हमधिकमिति हस्तस्यौंदर्यं वदति हस्तसौंदर्यादहमधिकमिति करसौंदर्यमित्येवं प्रत्येकं अहं उर्वादह हेकारं कु

नै॰टी॰१५

वेत्ननुरामणीयकं शरीरसौंदर्यं आलोक्यमानंदाः॥ हर्षपराः कैस्पैव पद्मरागवद्रक्तकिरणस्यंनंदनमपि व्यापि
मर्यादीकृत्यवाछितं नंदनवनसमीपेस्थितं शतक्रतुना हरिदिक्कृतस्याक्रीडादिमुदयावलं अधिष्ठायगछत्तउदि
त्परस्पेदोरिव॥ तत्कायकांतिं विलोक्ययथासानंदा नवंतितथेत्यर्थः॥ चंद्रोदयेस्त्रीणां हर्षः स्पंदनं अधिक्रीडित्या
धारस्यकर्मत्वं पतः इणः शातरिरूपं॥९२॥ ॥श्रीहर्षमिति॥ स्पष्टोत्तरेणातिन्द्र्यपसारसेन स्वादोऽमृतरूपेन लीप
चरिति पंचाधिकानां दशानां सूरणं पंचदशः स्वादगवितिज्ञापित -- स्फं॥९३॥ ॥इति श्रीवेदरकरोपनाम
श्रीमन्नरसिंहपंडितात्मजनारायणकृतेनैषधीयप्रकाशेपंचदशः सर्गः॥१५॥ ॥छ॥ ॥छ॥ ॥छ॥

नै०टी०१६

॥श्रीगणेशाय नमः॥ ॥कृतमिति॥ अथ रथारोहणानंतरं रथैः कुंताः प्रविशंतीति विदग्धनिर्दिष्टं तस्तथा रथी प्रशस्तर
थ्योपेतः सधराधिपो नलः विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ॥ किंभूतः आत्मविज्ञमंत्रं स्मृत्वा निमध्ये श्रेष्ठं गौतमं
गौतमगोत्रं एतन्नामानं वा पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्य अग्रे कृत्वा संस्थाप्य च विवाहकार्यं आरं तस्मिन्ना
रोप्य वा श्रेष्ठं हीनानि स्त्रीकृतानि दध्यक्षतस्वर्णकलशादीनि मंगलानि येन॥ रथैः सह वर्त्मानैः पुरुषैर्वा॥ प्रतस्थे समव
प्रतिनतः॥१॥ चलन्नृपेणेति॥ मृगेक्षणानां वामरक्षारिणां विधुरत्नैः छत्रैः धवलैस्तथा विधूयमानैः चाल्यमानैश्चाम
रैः समस्तुर्नलः समुपास्यि वीज्यते स्म॥ स्फुटमुत्प्रेक्षे॥ विभूषणानां रत्नखचितनिजमंडनानां अंशुभिः किरणैः प्रतिबिं
बितैस्तथा छत्रावदातैः अत्युज्ज्वलैः स्वस्मिन् निवसं त्यवं शीलैः कृतशीलसौंदर्यादिनिर्गुणैरिव प्रत्तं दीप्तैर्दृतेन नल
गुणैरिव चामरैरुपासीत्यर्थः॥ वामरएयपि विभूषणाप्रतिबिंबिनि स्फुटं निश्चितं॥ इद्दक्षो श्चामरैरेव गुणैरिति वा॥२॥
पराद्धीति॥ निषधावनीभुजि नले पराद्ध्यानि श्रेष्ठवेषाभरणानि रूपालंकारा येषां तैः पुरः सरैः समं सह जिहासिन
चलति सति सहकत्रशात्रवद्वंद्वः सुनासीर इति पदस्या ति येतां वाच्यत्वं यदि दधार तर्हि रूढिमात्राद् धारन्नतु योजन
नासीरं सेनामुखं यस्येति यौगिकतया मुख्यतया मुख्यायावृत्त्या न तु एवं दृष्टपतेन विंद्रो॥ त्रिविधाः शब्दाः केव

दी

१

लरौठिकाः केवलरौढिकाः योगरूढाः॥ तदेवं एतादृशाग्रेसराच्चावादिंद्रस्य सुनासीरपदवाच्यत्वं यद्यस्तित
र्हि रूढैव व्युत्पत्त्या तु न लिएवेति वितमित्यर्थः॥ इंद्रादीप्याधिकेन लोतत्सुरः सराश्चेंद्रस्तुरः देवेभ्योप्यधिका इति
नावः॥ परर्द्धिनवानि अर्द्धधात्परावराक्षमोन्नमस्वर्वस्थितियत्॥ शत्रुरेव शात्रवः प्रसाधितास्वार्थेण॥ हृच्छ्रवाः सुना
सीर इत्यमरः॥३॥ नलस्येति॥ नयान्नैमीवरस्य नलस्य वरावार्यायायात्रा तया अदीपिरात्रोस्तुस्तुते॥ किंभूतया नलस्य
नासीरसजं सेनायामग्रे सरीभूतानां महीभुजां राज्ञां किरीटरत्नैः स्वैनैवांधकारनिराकरणात्तु न रुक्का व्यर्था कृता
दीपाय स्यां तस्यां यात्रायां तथा च भूरजोभिः मिश्रा बहुलता नमिश्रसंपन्नतिमिरसंघोयया महांधकारे पिरत्नदीपप्रकाशैः
नैयिष्टप्रकाशात्वाददीपीत्यर्थः॥ महांधकार एव हि दीपाः शोभंत इत्यर्थः महांधकार एव हि दीपाः शोभंत इत्य
र्थः राज्ञां सेनामुखाग्रवर्तित्वेन नलस्य चक्रवर्तित्वं सूचितं॥ अदीपिनावेला॥४॥ विदर्भेति॥ विदर्भराजः पान्नृप्तिं
तिपानेव दूतान् अनुक्षणं वारंवारं नला कारणार्थं दिदेशाप्राहिणोत् तेषां वयः पूर्वमेकः प्रेषितस्तदनंतरमन्यः
स्तदनंतरं चान्यः एवमुत्तरोत्तरमनतिक्रम्य पथिं अमुष्य नलस्य चमूमुपचिकाय नृपस्तोमकृतकिंभूतं स्तुत्य
स्य लक्षणस्य लग्नसमयस्यासन्नतरत्वेनैकदैन मत्वरी विगवान् नृर्यामी नृपाहूताः प्रेषिताद्दूत्यनेनादरा

दि

ति मया सूचितः ॥५॥ हरीति ॥ तरस्वतां वेगवतां आश्वानां ध्वजिनी सेना तरस्वं तेजोऽस्यायस्यां सा वातस्या ध्वजतत्तैरां
शुकैर्वस्त्रनिर्मितैः मथानेन स्वतावायुना कृतं यद्दाधापनं परिस्फुरणं तेन पीनितैः पुष्टीकृतैः सजीवसिंहादि
तुल्यैः हरिभिः सिंहैः द्वीपैः हस्तिभिः द्वीपिभिः व्याघ्रैः कृत्वा तत्सेनाया उपरि ततं नन्तत्राकाशं वनं विपिनः तुल्यमभूत्
तत्र जनितं किंभूतं वनं विचित्राणि नानावर्णानि दिवानि देशोत्पन्नानि सूक्ष्माणि ध्वजसंबंधीनि चीवराणि वस्त्रा
णि तान्येव वृक्षयोः लतास्तानि वेल्लितं वेष्टितं ॥ वनेपि सिंहादयो वृक्षा लताश्च संति ॥ ध्वजपदेन वृक्षात्रापि लक्ष्यंते
तरस्वं तेजोऽस्यायस्य नलस्य तरस्वदश्वावाया ध्वजिनी प्रकृतत्वात्तस्यैव सा ध्वजिनी नत्रसितेनास्य दाधापनपी
नितैरांशुकैः ध्वजैः पताकाभिः ततावनमभूत् ॥ किंभूता ध्वजिनी हरिभिरश्वैः इस्तिभिः द्वीपिभिः द्वीपांतरवासि
भिः सेनावरीभूतैः राजभिरुपलक्षिता ॥ वनमपि सिंहादिभिरुपलक्षितं ॥ विचित्रेति पूर्ववदिति वा ॥ वनपक्षे
नाम मृगविशेषः ऊर्ध्वं विस्तृतत्वाद्दीवरगामिन्यो वल्लयो यत्र ॥६॥ प्रस्थानेति ॥ ततः प्रस्थानानंतरं स महीपतिर्नलः
तस्य भीमस्य प्रतिहारः महीद्वारभूमिं भीमजन्मनो भैम्याः दूतीमिव ददर्श ॥ किंभूतां द्वारेण बद्धा गजास्तेषा
मालिः पंक्तिस्तस्याः कर्णानिलेन खेलत्वा खेलती चलतीति खेला तया निजया स्वीयया पुष्पाभ्रदलरवितया

तोरणस्रजा तस्य स्तनण्यास्तु वानुरागातिशयो ल्लुकतया त्र्याकर्यंति॥ शीघ्रमागच्छेति त्र्निःसंज्ञया त्राकारयंती॥
दूत्यपि च लंत्यास्तु वा कथयति राजगृहद्वारदर्शनेनाति सत्वरो भूदिति भावः॥ स्त्री द्वा द्वारिं प्रती प्रतीहार इत्यमरः॥
खेलापचाद्यच्॥ प्रतीहारः उपसर्गस्य घञ्यमनुष्ये बहुलमिति दीर्घः॥७०॥ स्तंभेरिति॥ सा द्वारभूमिः स्तंभयोः कदल्योः द्वारमंडना
र्थं चरोपितयोः स्तंभयुगस्य छेदवशात् द्वयुवशाद्वा श्लेषे शिथिलैर्दलैः पत्रैः सत्त्वानी लतां बमान चंडातकसंज्ञकेन
वस्त्रेणमंडिताऽनुकारिता ऽस्य नलस्य प्रियाया भैम्याः सखीव चकास्ति स्म॥ किंभूता सा ऽनुरागवशान्मन सि संभ्रान्तं
करण्या नलस्य स्थितिर्यस्यास्तु रुन्मदाश्चिन्न निवासिनो स्य मन्मथः सुखेन गतस्यागमनस्पर्शबंधी प्रश्नः सुखेना
गतइत्येवं रूपः सन्नतः प्रश्रितः सुखागतप्रश्नतां प्रापितस्तूर्यनिस्वनो यस्याः चिरप्रोषिते हि नायके समागच्छ
ति सति प्रियस्यपत्रपया तत्सखी स्थितायां चंडातकमंडिता न सखी सुखागतप्रश्नं करोतीति स्थितिः॥ अत्र दलानि
चंडातकस्थानेतूर्यनिस्वनाश्च सुखागतप्रश्नस्थाने। कदलीस्तंभाभूरुस्थानीयो॥ अर्धोरुकं वरस्त्रीणां स्याच्चंडा
तकमंशुकमित्यमरः॥ हत्त्योपयुक्तं ऊरः पश्चाद्धप्रलं बिवर्तुलभागद्वयेकदलीसदृशं नर्तकी निरंतरं परि
धीयमाणं वस्त्रं चंडातकं॥ प्रश्रितेति तत्करोतीति णिच् ततो निष्ठा न तारकादिः॥७१॥ विनेत्रोति॥ नरेंद्रेण भीमनलो

नै॰टी॰१६ तयोः सेनेतयोः समागमः राजस्य हद्वारि एवं भूतो जायत जातः ॥ किं भूतयोः विनेतृशासकं न लक्ष्मीमलक्ष्मणं
नष्टे द्वयं तस्माद्भीतिस्तया दांतयोः शांतयोः ॥ ताभ्यां नियमितत्वाद्दन्तकलहादि संरंभयोः ॥ अत एव परस्प
रस्माद्दन्योन्यस्माद्दनवाप्तमलक्ष्ययुक्तनिमित्तं वैरं संमरणं येन सैन्यद्वयमिलने हि कलहो भवति ॥ परं सोढ
व्यनियमितत्वात्तयोर्नाभूदित्यर्थः ॥ तथा स्मारीतिमहान्मुखारवस्य स्फुटवर्णविशेषस्य मुखध्वनिरुड्डमउद
याय त्र ॥ १० ॥ निद्दिश्यपति ॥ विदर्भराड्भीमः मुदस्तु विनोजामाततिहर्षेण तमेक्षिष्ट नलमद्राक्षीत ॥ किं भूतं नी
मेनेवसंमुखं गत्वाव धूनस्तु रुदो वान्हन्नवास्वमानापिष्ट संबंधिनोनिर्दिष्टपाज्ञाप्यप्रस्थाप्यइतीनेतयथात्रा
गम्यतामित्यादि प्रकारेरुदीरितमुक्तं बंधुमुखेन ज्ञापितमार्गं तु यथा दृष्टमारव्यनं भैमीत्रात्रा अर्द्धपथेत्तताः हि
णाः घादिस्वजायस्मै तं तथा स्नुकृतवेषत्वाद्विनीतं अतएव द्वास्तेत्राद्वारस्मीमामिवावधीत्सपरथाउत्तीर्य
पदूर्नांपादस्वारीत्वं गतं प्राप्तं ॥ दमेनेवव धूत्स्नुरः प्रस्थाप्य तइत्युदीरितमितिवा ॥ आद्वारतः पदद्वयं पदद्व
तिपादस्य पदाघातिगो पर्हतेष्वितिपादस्य यत्ता ॥ ११ ॥ अथेति ॥ अथ नलदर्शनानंतरं अयं भीमः उत्थाय
प्रत्युत्थानं कृत्वा आत्मनो भैम्याः पार्श्वयोग्यं आगतं तं नलं दोर्युगं विसार्य प्रसार्य मुदाप्रतीयेषां लिलिंग ॥ कं

३

किंकमिव सरित्पतिं समुद्रमिव । त्या नागीरथ्या आगतपात्रं प्रवाहमिव नौकादिकं वा ॥ किंभूता । कृते धृते अभितः
पार्श्वद्वये वीचिगती तरंगपरंपरे येन ॥ वीचिततिरित्यपि पाठः ॥२१॥ यथावदिति ॥ अथ लिंगनानंतरं महीभृतां रा
ज्ञां पतिर्बहुवाहिन्याः ईश्वरः स्वामी सन्नीमः सर्वविदे सर्वविद्याविज्ञाय शिवाय स्तुतस्य वण्एकोत्तनायात एव
पुरुषोत्तमाय पुरुषश्रेष्ठाय । अस्मै नलाय साधुलक्ष्मीं समीचीं यं नकायकांतिं त्र तं एव शिवांस्तु । नरूपां
तां नैमीस्वस्यनंदनां कन्यां यथावद्वेषीं दोक्तविधिना ददे ॥ मधुपर्कात्पूर्वं कन्यादानमित्याचारः ॥ मधुपर्का
त्पूर्वं ददे दातुमारब्धवानिति वा ॥ अथ च बहुनदीश्वरः समुद्रः पुरुषोत्तमाय तां स्वकन्यां लक्ष्मीं ददे तत्साधु ॥
तथा पर्वतराजो हिमालयः सर्वज्ञाय श्रीमहादेवाय स्वपुत्रीं पार्वतीं ददे तिवेतिसाधु ॥ तद्वा मेनकादि पर्वतानां प
लविवास समुद्रः शिवरूपाय विष्णवे स्वतनरूपां लक्ष्मीं ददे न त्साधु ॥ अथ बहुनदीयुक्तो हिमालयः पुरुषोत्तमरू
पाय श्रीहराय पार्वतीं ददे ॥ पार्वतीरूपां लक्ष्मीं लक्ष्मीरूपां पार्वतीमिति वा ॥ नलाय पुरुषोत्तमाय वत्शिवायेव
६ नैमीलक्ष्मीमिव शिवामिव नीमः समुद्रमिव हिमवाम वन्निवेत्युपमालंकारो व्यज्यते । साधुलक्ष्मीमित्यत्र पक्षे
समासांतविधेरनित्यत्वात्कप् नाव ॥२२॥ इदानीं विवाहविधिमाह ॥ अभिस्विरदिति ॥ सनलअर्पितां नीमेनद

नै०टी०६

त्रंसहमिश्रितकांस्यपात्रस्थंदधिमधुघृतरूपंमधुपर्कंयदस्तिस्वदत्त्वान्॥ तदास्वादनंउदर्कःदशिने
विवाहोत्तरस्थेफलपरिपाकस्तत्ताधरखुब्बनादिविचारिणोलोकायइतितर्के ऊहंव्यधत्तचक्रे॥ इतिकिंयद्यस्मादि
षनलः नीमजाधरेरूपंमधुपास्यन्पास्यतितस्मात्तदामधुपर्कदानावसरेमधुपर्कास्वादनमिषेणपुण्याहविधिस्त
ननदत्ताद्दिद्युक्तपुण्याहविधिंछत्तदिनकृतंमंगलसर्वस्यपक्रमं॥ अत्रैत॥ अन्योपिप्रिष्ठितकार्यंकरिष्यन्प्रथमविवाहदि
नादौतदीयमारंभंकरोति॥ तथाऽनेनापिभैम्यधरपानेप्रथमंइष्टंचिह्नकइतिजनेनतर्कितमित्यर्थः॥ अधरस्यापिस्वाद
वस्तुकं॥ असिखदिति॥ चौरादिकोभक्षणेदेशघड्॥ येनमपिपोपदेशीमन्यंतेतैःषत्वाभावःस्थितः॥ असिष्वददितिपाठान्त
वार्थस्यइर्यायत्वाच्चचौरादिकएव॥ पास्यतल्ट्॥ तदेतिशाता॥ इत्यपंचतहस्वराजाहइतिटस्विदुणपस्तुदिनास्यामहं
कीवतष्टेतिपुण्यार्तंतेविधिरितिविग्रहः॥ ६४॥ वरस्येति॥ वरस्यपाणिःपरधातकौतुकीशत्रुमारणकुतूहलीवधूक
रःपंकजकांतितस्करःकमलश्रीचोरःयस्मात्तस्मात्कारणात्किंसुदुराज्ञिनीमेनराजत्वतितत्रतस्मित्रविदर्भमं
डलेविदर्भराड्भीमोवरवधूकरौकरकृत्रिः कृतैःनितरांबद्धौ॥ उभयहस्तयोःकृता बंधनसर्वपाणिग्रहणमन्त्रतत्रकृता ४
बंधनेकारणोत्रेदृशाक्रियते॥ एकोहिंस्रोपरश्चोरइतिसापराधत्वात्किंसुबद्धाइत्यर्थः॥ अन्यत्रापिसोराज्येअन्यघातक

तत्करौ कौतुके ह्विनैर्दरैकैर्बध्यते॥ पाणिग्रहणजातद्धर्त्तिभावकं कृतवैः पाणिर्बंधनं देशाचारः। यथाक्रमं करयोः शौर्यमा
र्दवं च सूचितं॥ सुराष्ट्रीराजाह दूतस्य नियतत्पुरुषविषयत्वादत्र च बकुत्री हि विषयत्वादत्र प्राप्तत्वाव॥१४॥ विद
र्भीति॥ विदर्भजायाः करवारि येन यत्ततदा पाणिग्रहणसमये नलस्य पाणेः परिस्थितं। तदुपरिस्थानं किल निनिक्षि
तं विपरीतरतेनैर्विघ्यतः॥ पुरुषायितस्य विपरीतस्येति यावत् सूत्रं सूचनार्थं कारि विद्रां कृत्वा विशेषेण संभाव्य कौतुक
विलोकनार्थं निकटस्थिता निस्तदालिभिर्भैमी सखीभिः अस्माभिर्द्दइषद्धस्मितं॥ विपरीतरते हि स्त्रीपाणिरुपरि भवति॥ वि
वाहे च धृतकरो करकरस्योपरि भवति। सूत्रं तु सूचनार्थी॥ ग्रंथ इति विश्वः॥१५॥ इदानीमित त आरभ्य नतेन च वाहे द्वितीया
वधूविवाहो चितं योतकं प्रतिपादयति॥ मरुदेति॥ नाम संज्ञया नाम इति नाममात्रेण सखीतस्यापि नाम नामत्वात्किलो
त्रिरूपायां मनवो महेश्वरः अस्मै भीमाय पद्मेन कुबेरेण सह यत्सख्यं मैत्री तेनाधिगतं प्राप्तं यचितामणीनां दाम
मालां ददौ॥ एषस्य सुरोनीमं तत्का मदं सकलाभिलाषितदापि सुरातामुचितं देवधार्यं चिंतामणिदाम जलाय
र्दे॥ उत्त्रैरूपायामेव तात्पर्यं सुतो चितमिति पाठे नैस्पुष्टितं॥१६॥ तदेव वर्णयति॥ वहारिति॥ यच्छितामणिदाम
बभौ तरां किंभूतं वहोरपरिमितस्य तथा उरापस्य दुर्लभस्य दिवस्यवराय नामात्रेदातुं चितस्यपुरः पुंजीभूत

नं॰ टी॰ १६

वे

स्यरत्नहेमवसनहस्त्यश्वादेर्वस्तुनः पदार्थसमूहस्य स्वस्मिन्प्रतिबिंबस्य केनवा द्वाजान्नअंतरवस्थितं स्वस्य म
ध्येस्थितं अर्थिने याचकाय अभ्यर्थितं प्रार्थितं सन्नदानीमेव दातुमर्हे अर्थं वस्तुजातं दधत् धारयदिवा तद्दृष्टावि
तिस्र चेनसंबंधः यदाय घोयान्वयिष्यते तदैव तद्वस्तु तस्मैदानवांमिति बुद्ध्या स्वनाम साध्यकी कर्तुं वस्तुजातमंतः
स्थापितमित्यर्थः ॥ वहोरितिभाषितपुंस्त्वं ॥२४॥ अत्रासिमिति ॥ नीमः ॥ हंतः कामरारव्यो महिखास्व्यो ऽसुरोयेन तेना
सुरं देदीप्यमानं नवविधिया दुर्गया अस्ति खड्गं वराय ददाति स्मात स्मात् खड्गं स्तेन कथं प्राप्त इत्यत्राह ॥ हियस्मात्
स्फुरं वा शंभुनाम सह संजोगस्तत्र निमग्नयासुरतरसासक्तया अनया दुर्गया वैरिदलनानं तत्स्य प्राप्तो जनान्न
वात्सुरतासक्तत्वे खड्गधारस्यपरसन्त्यंज कृत्वान्धवनाम धारिणी नीम इति शिवनामधारकाय तत्रांस्तुस्तेव काय
तस्मै नोमाय ददौ ॥ शंभो सम्यग विच्छेदेन निरंतरं संभोगाय निमग्नयाद दक्षिणार्द्धेन प्रविष्टया वा ॥ तत्वतस्तु तयाप्र
साघ दत्तं ॥ तुलायो महिषो वाहद्विषत्का सरस्सैरिभाइत्यमरः ॥ सासुरं तं जघासेति घुरव्व ॥२५॥ अधारीति ॥ म
हिषासुरद्विषा दुर्गया प्राकृत्य खड्गो ऽधारि ॥ कर्कंदः कन्यादाता नीमः तंत्रपानं खड्गं सत्कारः सर्वं सालंकारं अस्मैत्र
दत्तं ॥ कथं तेन लब्ध इत्यशंकयाह ॥ हियस्माद्दर्दनारीत्वात् धवस्य नंदुः शिवस्य अर्द्धेन त्रिना अष्टे प्रविधि हेन तस्याः

५

पार्वत्याः दक्षिणार्द्धेन शरीरं दक्षिणभागेन परांगदारणं ॥ वैर्यंगदाहरणः सखड्गं अहायित्पक्षः सखड्गेन ध्वेवाच्च
मार्द्धविश्रातामदीयदक्षिणार्द्धेन तद्धारिष्य । तद्धतिनियात्पक्षः ॥ अदापितिपाठे अनर्थड्डी तेन तस्माद्दक्षिणार्द्धेन तस्मै
यस्मा ददायीत्यर्थः ॥ अयं पाठः साधीयान् ॥ सत्कपोलफलिंकातां कन्यां यो ददाति स कुकुंदरः इत्यमरः ॥ १९ ॥ उवाहेति ॥
यः खड्गः स्वस्पत्नीमस्य खड्गस्यैव बाहोर्यः प्रतापरूपोयः सूर्यस्तस्योदयस्तत्संबंधी पर्वत उदयाचलस्तस्य व्रतं नियमं
तदास्त्येदयकारित्वलक्षणं उवाह धृतवान् किंभूतः मां द्रुतराणि अल्पाणि सूक्ष्माणि अंगान्यंगकानि मुकुरपत्रीवल्लीरू
पाणि तेषां मननं जीवनं यत्र तदाधार इति यावत् ॥ मां द्रुतराणां वा श्वेविक्रान्तानामिवांगानां काननं समूहो यत्र उदयाचल
पक्षे सांद्रतराणि अंगेष्वधोधो भागेषु वनानि यस्य तथा ॥ आननेन लोहकारस्वक्षधर्षणेन धौतया उज्ज्वलीकरणेन दक्ष
णीयया धारया स्वत्वा स निर्झरः सप्रवाहः धारेव निर्झरीभूतेत्यर्थः ॥ उदयाचलोपि स निर्झरो भवति ॥ तथा हते त्वः खं
डिते स्वः शत्रुस्तेजा जातिना स्तजारक्तेन तत्वासम्यक् कूटः भूतो प्रातः संध्यायेन प्रातःसंध्यास्तोनिरक्षमेवयेन धृतमि
त्यर्थः उदयाचलोपि ढप्रातः संध्या उदयाचल तुल्योभूदित्यर्थः ॥ नमदन्नैतत्सवर्णेनि संबंधः अंगकेति पद्धे अल्प
इति कन्ना ॥ २० ॥ यमेनेति ॥ स्वनीमं नाम स्त्रिपुत्रिकां दुरिकामपि अस्मैददे ॥ नकेवलं खड्गमित्यपरर्थः नकेवलं छत्र

मप्युलं छुरिकामपितां कां॥ स्वस्रामर्पि नात्मेम्यामनुरागिनाय मे नतंनीमंनैमीमह्यं देहीति आत्मजां याचिते
सूनीप्रेषणावसरे स्वीया प्रहिता प्रेषिता या जिक्के च। नियतं प्राणहारित्वाद्यमजिह्वातुल्या तां तीक्ष्णां॥ सोयंनि
तुष्टो यमो यामी नामायदत्तवान्॥ किंभूतां परिवारस्यालिनीं वर्मकोशेन स्वर्णेन मानां अथ च सखीलक्षणपरि
जनशालिनीं॥ करयहार्हां हस्तधारणयोग्यां साधुमुष्टिदेशां अथ च पाणिग्रहणयोग्यां पूर्वं यद्यपि नैमी दत्ता
तथापि परिवारसहितत्वेनेदानीं दत्तेदं तथार्थः छुरिकां सखीस्वरूपोतकत्वेन ददौ इति भावः॥ छुरिका वासियु
क्तिकेत्यमरः॥ यावद्विर्द्धिकर्मा॥८१॥ यदिति॥ यस्याः राज्ञ्याः अंगस्य भूमीपट्टिकायां उर्ध्वाधोदेशौ स्वयोषितां स्व
स्वस्त्रीणां मुरोजं भपत्रावलिः कस्तूरिकालिखितस्तनपत्रवल्लीनेत्रकज्जलं च एते इव बभतुः शुशुभाते॥
किंभूते रणस्थलिया स्थंडिलशायिता व्रतवशाद्यो वेदिकायां शेते स स्थंडिलशायी तद्भाव एव व्रतं तद्वि
षये रहीता दीक्षोपदेशी कृत नियमविशेषेण भूपतिना शत्रुभिः दक्षिणी कृता इति व्रतांगदक्षिणात्वेन रास्त्रैर
त्वा॥ दीक्षोपदेशिनो हि स्त्रीणां रम्यमलंकारादिदक्षिणात्वेन दीयते॥ छुरिकयैव स्वकृतमारण द्वारा शत्रू
णां रणस्थलस्थंडिलशायिता व्रतमुपदिष्टं तस्मात्तस्मै तेदक्षिणात्वेन दत्ते पत्रपह्नी कज्जले इव॥ लोहमुखः

रूपामवर्णोस्तनपत्रवल्लीनेत्रकज्जलत्वेनोत्प्रेक्षितेति ॥ इयं छुरिका निश्चितपरविदारणा वैरिनार्यश्च वैधव्याय क
कज्जलपत्रावल्ल इति। स्थंडिलशायीति स्थंडिलाच्छयितरि व्रतइतीति ॥२२॥ धुरेति ॥ तस्यन्नीमस्य सुतायां त्वन्नि
केनानुरागिना तथ नैमीदात्तव्येति बुध्यायं तप्रेषितः किंतु शत्रुनराज्ञां तत्संसारनिराकरणद्वारा त्वमस्माकं सु
हृदिति प्रेषित इतिस्तोहार्दंस्तेहं नाटयति। एवंशीलेनाग्निनाधुरैव दूतीप्रेषणव्यसरएवयोरथः तस्मिन्नीमे
समदेशि प्रेषितो दन्नः रूपः नलायतं रथोविश्राणयति स्मा किंभूतं मुलं घ्यात्रनायासेन व्रतिक्रमणीयात्र
रूपः त्रैस्तुच्चपर्वताः समुद्राः कापथ्या विषमानि म्नगर्तरूपामार्गाश्च यस्य सर्वत्रसंधरणसमर्थे कर्दवीकापथः प
माइत्यमरः ॥ कापथ्य इति कापथ्यरूयोरितिकादि ॥ कुगादिनाम मासांतः ॥२३॥ तमेववर्णयति ॥ प्रसूतेति ॥
त्रैस्यापि त्नीमेन नलाय त्नीमस्यापि महतो जवादिगुणयुक्तस्य रथस्य प्राक्ष्टा सूतवती। सूतो विद्यते यस्य म
सूतवान्नस्तद्भावः सूतवता सारथिमन्नाप्र कृष्टश्वासौ सूतश्चत द्वत्वाय यस्मान्नलस कूबरेणयुगंधरेणस
हयोन्वयः संबंधः नलेनसहवायः कूबरस्यान्वयः तेन प्रकाशिता प्रकटीकृता ॥२४॥ ततस्तस्माद्धेतो
नस्य रथस्य उष्यकवत्कामगामि धनदविमानवत्पुष्पकत्ता उत्कृष्टपुंगुणयुक्तता पुष्पकान्सकावाद्धजवा

नै०टी०१६

द्विगुणैरधिकता कुबेरस्य दृष्टान्त उदाहरणं तस्य बलेन सामर्थ्येनानुमीयते अनुमानज्ञानस्य विषयीक्रियते । न केव
लं कुबेरस्य महारथस्य किं त्वस्यापीति समुच्चयेन व्याप्तिप्रदर्शनेऽपरः तरमुपनयनिगमने स्वयमप्यूह्ये ।कुबे
रस्यापि महारथस्य सुतसंख्यायोधमहायुधनः पुष्पकविमानेन कृत्वा प्रकृष्टता प्रकृष्टवस्तुमत्ताप्रकर्षेणोत्कृष्टता तेनोद्य
मानतावान् भवति।एवं कुबेरदृष्टान्तबलेनाग्रे एतस्य पुष्पकप्रकृष्टता भविष्यतीत्यनुमीयते॥यतोऽस्यापि कुबेरस्य नलकू
बराख्येनान्वयेन संतानेन पुत्रेण प्रकाशिता प्रकटिता शोभिता प्रसूतवत्ता जनयितृता॥इति साधर्म्यदृष्टान्ते श्लेषब
लेनात्रानुमानं त्वेवं विमतो महारथः पुष्पकप्रकृष्टो भवितुमर्हति नलकूबरान्वयप्रकाशितप्रसूतवत्तावान् सत्पु
ष्पकप्रकृष्टः यथा कुबेर इत्यनुमानवशादितत्सर्वमुच्यते यथाश्रुति कथंचिच्छ्लोको व्याख्येयः॥प्रकृष्टः सुतः पुत्र इति
वा पुष्पकस्य नलः।सारथिर्नास्तीति तेन तुल्यता नास्ति किं तु तत्पतिना कुबेरेण तिरस्यस्तु नलः सारथिरित्यर्थे रथोऽव
मणीय इति नाव: कुबेरस्तु पुरंधर इत्यमरः॥२४॥महेंद्रमिति॥सिंधुः समुद्रः नाम्ना उच्चैःश्रवसा अयं वीतकर्णेन म
लक्षणेनाथ स्वदीर्घकर्णेन दुर्लक्षणेनाश्वेन महेंद्रं प्रतार्य यद्वयरत्नं निजेन पत्न्या स्वस्वामिना वरुणेनान्वितं युक्तं मत्वा
वरुणायादत्तेत्यर्थः।सा श्रीमतदस्त्वरत्नं अश्मेन लायददौ।अनेन कथं लक्ष्मी मित्स तत्राह किंभूत वरुणेन बंधुना म

७

नै

मलीकमैत्रीमनुबंधुं वर्द्धयितुं पुरा दूतीप्रेषणावसरे अर्पितं नीमाय दत्तं। उच्चैःश्रवसोप्याधिकं अश्वं तस्मै ददाविति
भावः॥ ४५॥ जवादिति॥ योश्वः लोकानां अक्षियुग्माय नेत्रद्वयोपदिदृक्षायाः स्वीयरूपदर्शनिच्छाया आदरस्तस्य दासतां व
शात्वं दद्दानः पारवश्यं कुर्वन् जवाज्जितोखारी ऽतः अर्वाक्कीराऽत्तो दूरी बभूव यो जनो दक्पथो नेत्रपथो येन दूरं गत्वा ने
त्रयोरविषय इति यावदेवं विधः सन् यथा नेत्रयुगाय मुदं प्रतीतिं न ददे दर्शनाभावात् प्रीतिं नोत्पादितवानित्यर्थः। तथा पुनरा
गमनसमयेपि तस्यैव दिदृक्षादरदासतया तस्य नेत्रयुगस्यापांशुलं रेणुयुक्तं कंठनालं यस्य तस्य नावसतां तालकर्णयोः के
ष्ठितवं ददन्मुदं न ददे। तमश्वं ददावितिपूर्वेणसंबंधः॥ यथा तथा न्यूद्धो व्यस्य स्तोयोज्यो॥ रूपादिविलोकनकौतुकिनिः याव
दृष्टो दृष्टुमारब्धस्तावदेव गच्छन्ना दूरं गत्वा न दृष्टः। इदानीं यद्यपि न दृष्टस्तथापि वाल्युद्यागमनेः वद्रूपं द्रष्टामइतिबु
द्ध्या व्यापारांतरपरित्यागपुरःसरं तद्रूपादिविशेषदर्शनादरान्नेत्रेप्रसार्य तत्रैव यावत्स्थितास्तावत्पुनरागमनसम
येपि खुरपुटक्षुण्णक्षोणीरेणुसंबंधान्न दृष्टस्तथा चोन्नयथापि दर्शनाभावात् उत्कंठया अपरिपूर्णत्वान्नेत्रयु
गस्य हर्षमानंदितत्यर्थः। इति जवनोश्व इति भावः॥ जवादतिशीघ्रो दूरीदृक्पथो येनाति दूरं नेत्राभ्यामनुगतमार्ग
इति यावदेवंभूतो यो नेत्रयुगाय दर्शनहर्षं न यानादत्तं यथा दिदृक्षादरदासतां ददानः संस्तथैव तस्य नेत्रयुगस्य

नै॰टी॰२६

दृष्टुर्वापि तु कंकं गत्वं ददौ॥ निरंतर दर्शनाभावान्नाहृष्टा प्रीतिर्न जाता किं तु पूर्वोक्तप्रकारेणानेन त्रयोः दृष्टुर्वारिरेणुसं
बंधात्तु कंकं गत्वमेव जातमित्यर्थः॥ दृष्ट्वा दर्शनाधिरूढमार्गस्य प्रतिषेधो भवति। अत्र तु वेगाश्रया दर्शनाभावा
दप्रतिषेधः कस्येति वा॥ अथवा जलरहितः अतो दूरे दृष्टिगोचरो यो मार्गः स पिपासितो नैत्र युगाय हर्षं न ददाति किं
तु जलावलोकने पारवत्रूपं। तथा पिपासितः स्तु कंकं टत्वं वैत्तु क्तिरिति वा। दाशानमिति पाठे दिदृक्षा दस्य दानपात्र
त्वं ददर्शेत्यर्थः॥ दाश्ट दाने दाशगोघ्नौ संप्रदाने इति निपातनात् दाशपते स्मै दाशा दानपात्रं पारावारे पारावारवीती
रद्वयमरः॥ पक्षेनास्ति वारि यस्मिन्न मावारि० पक्षे वारणं वारः एणं तान् घञ् मनात्वस्य लावारः। अवारः शब्दाच्च
छि॥२६॥ दिवस्पतेरिति॥ दिवस्पतेरिंद्रस्येतेरिंद्रस्य नेमाः अनुरागवशात् श्रीमे आदर दर्शिना विश्वकर्मणा यत्नोमंत्र
तु दिशपादरात् दौ किं उपदारूपेण प्रेषितः॥ सन्नी मस्तेरेकं महापारिमाणं माणिक्यं तन्मयं तद्रूपं तन्निर्मितं वा महो
न्नमत्तुच्चं पतंग्राहं पतद्ग्रहं षजलतां बूलोकरादिस्ट क्रानीतितं नलेन प्रयोज्येन ग्राहिवानं गीकारितवान् नलाय
ददद्वेत्यर्थः॥ प्रतीर्य स्मिन्नादरस्तं तत्कृज्जो विनः स्वस्वशिल्पेन सेवं तद् इति लोकरीतिः॥ पतंग्राहः पतद्ग्रह इत्यमरः।
दिवस्पतेः तत्पुरुषे कृती तिर्वा अलुक्कात्व— अलुकि कस्कादित्वाद्विसर्जनीयस्य सः॥ षष्ठ्याः पतिपुत्रे निर्छंदो

८

विषयत्वात्॥ टौकेर्गत्यर्थत्वात्सकर्मकत्वात्कर्मणि चिण्॥ ऋक्षाणीति पश्चाद्यविपततो ग्रह इति समासः॥ रुचा नलेनेति॥
उदंचदुद्यारुणवारुणउदित्वरीत्वनतगरुडाग्रजउचउदित्वरीत्वनतसूर्यवद्यामुंदरादतिरक्तात्ऊर्ध्वप्रसरत्किरणेति
शायिनीयं स्त्रीयोरूपगुणस्तेन वारीवरिक्ततरान्स्वमहस्पमंडलात्तं घाद्वेनोः तांबूलविलासिनातांबूलरसमात्रश्ला
हिना स्वर्गनागवल्लीदलखंडत्यागिनानलेन गृहीतरसमत्वाडुहिनेस्य क्रमेण किंचसकलसहस्रीमुखरवो ज्ञारस्तैः स्वर्ग
कोणैः क्रमुकाल्पशकलैः अयंच्युतः स्फरितो नवाश्वरित इतियः पतग्रहः चिराल्लसाकालेन नस्तद्रूपेण किंक्रया क्रमेण पुंजकस्तं
शयेलोकैर्व्यवचिनिश्चितस्तं ग्राहितवानिति पूर्वेण संबंधः समीपं गत्वा स्वरूपेण किंक्रयाऽयमिदानीं स्वर्गकोणैः च्युत इति नि
श्चितः॥ कदाचित्कदाचिच्चेदानीं च्युत इत्यपि निश्चित इत्यर्थः॥ च्युताच्युतत्वसंदेहे रक्तमयूखमंडलं हेतुः॥ मालिक्य
मयत्वादतिरक्त इत्यभावः॥ तदानीं तांबूलस्यानवसराज्जातविन्यापि विचारिस्तूतवडुपचारैः॥ यद्यानस्येवारक्तत्वाज्ज
नस्फोज्ञारस्तागत्वमः॥ अमी स्वर्गकणाः किंवा किरणसमूह इति संदेहः स्थिरानिर्णीत इतिवा॥ स्वदामयेनेति॥ भ
गवंतं षड्गुणैश्वर्यसंपन्नं जीमं शिवमश्चोदि निरूपचारैः सर्वतात्प्रजयतात्रौ वेन मयनाम्नाः स्वरेण प्रस्तुनात्रि त्रिविना
मधारयेन्द्रूपेपित्नामिपिया स्रजाऽन्तताउपदाकारितत्नीमोपितां स्रजां स्रजारूपैः हरिन्मणिगारुडिमणिसंबंधि

विषापहारसमर्थं अतिविस्तृतं भोजनार्थं भाजनं नैषधायादत्त॥ मयेन तस्मै दत्ते सोपि नलायादत्तेत्यपि शब्दः
समुच्चयार्थः॥ अर्वतिर्नैवादिकः॥२०॥ छदइति॥ अस्य भोजनपात्रस्य छविं नीलां द्युतिमदेव छेदेपि छेविन्नत्वं ताके
किनां मयूराणां सर्पविषं न प्रसर्प्यति॥ न शरीरं नाक्रामतीत्यर्थः॥ मरकतमिव॥ अत्र पात्रे विषनरूपेण कृते सति त
ज्जीर्णतया नीलकंठत्वं तस्यादित्यर्थः क्रियाति पनोल्लंङ॥ भुजो नवनइति लंङ॥२१॥ विराधेति॥ सनामस्मिनला
यमदच्छलात् दानजलव्याजात् सदा वर्षणशीलयं हस्तिनं अदत्त॥ मदुर्वासिसं विराधरोषयित्वा तत्कायादिंद्रमिंधुरि
ऐरावतो दिवः स्वर्गात् अस्वलत्पतितः किं॥ भुवमागत ऐरावतः किमित्यर्थः॥ विरोधेहेतुः अस्य दुर्वाससः स्रजं
स्रजं मालां त्यजन्नुत्क्षिप्य॥ अत्र पौराणिकी कथा कदाचिदैरावतमारुह्य गच्छते इंद्राय दुर्वाससा प्रसादेन
मंदारपुष्पमाला दत्ता सा च तेनैकरीकुंभे स्थापिता सतां शुंडादंडेन धृत्वा क्षिप्तवान् ततः कुपितेन मुनिना त्वमपि मा
लावदधः पतेति शापः मन्मूलेयमुत्प्रेक्षा॥ वर्तुकत्वे पुनरुत्प्रेक्षेति॥ अत्र मातंगतया ऐरावतत्वेनेव ऐरावतो हि
सदामदजलं वर्षस्वयमपि तावत्स्वर्गात् इतः स एवेति॥ मदाद्दानजलं मुंचतीत्यर्थः अत्र च मातंगस्तत्र यावान्नाम
त्वात् सकलघनतुल्य इत्यर्थः॥ अस्य नाम स्य संबंधित्वेनास्वलत् इति वा॥ वर्तुकके कषपतेस्तु कस्माच्॥ मदादिति॥ यो

गजः स्वकर्णयोरागतैरागनेर्गमनैश्चकृत्वा वर्णसृजं वर्णमालां विनैव दिक्करिणः दिग्गजान् प्रतिद्वन्द्वाहस्मेव दु
तिर्जितो दिग्गजान्नवतां बलाभिमानस्य दर्शितं हि मदान्धयुद्धं कर्तुं मूर्यं मदग्रेनवतम ममुरस्तान्निष्टत॥ अथवा
येन्मदो नास्तित हिं त्रया दिगंतस्थायूर्यं दिगंतादपि परं दूरं यात गच्छत पलायिताः श्चमंतस्तत्रैव सुखेनजीवतस्वत्रां
णान्नरक्षतेति॥ इयेवं खलु ब्रीं स्विच्छा॥ २४॥ बनारेति॥ योगजः निजकीर्त्ये यैरदोर्दंतौ बीजं कारणं बन्नार॥ द्विषामकी
र्त्ये दानविधुषः दानोदविंदून् बकारणं बन्नार॥ खलु रूत्र्यैरवीर्यां॥ दंताभ्यां परविदारणात्स्वस्य यशः मखुसत्त्वे
स्तयोः कीर्तिकारणत्वं॥ अथ वकीर्तिलक्षणस्य कार्यस्यष्ठत्वात्कारणे नापि तादृशेनैव भवितुं युक्तमिति दं
तौ कीर्तिबीजत्वेन कल्पितौ कंदाविव॥ मंदजलगंधघ्राणमात्रेण परगजानां भंगादानं बिंदूनां तदकीर्तिकारणत्वं कार्यस्य
रूपामत्वात्कारणेनापि तादृशेनैव भवितुं युक्तमिति त्रपामदानबिंदवएव अकीर्तिबीजमिवे खलु त्रिच्छा॥ तथा
पु ऊर्ध्व ऊर्गता गतैः स्रवः स्वमेः कर्णप्रयासैरेव व्यजन चालनैः त्वनाऊंभावे ऊर्ध्वोयस्यास्तां मदस्वेदवंती दा
नरूपधर्मोदकयुक्ता श्रिरः श्रियं धर्मजलापहरणद्वारा तस्या एवमुदेहर्षयितुपास्तसिषिवे॥ एवं कृतोश्रिरो दधा
ना॥ प्रीतिमुदपादयदित्यर्थः॥ कामकेलिखिन्नां ऊर्ध्व ऊर्ध्वां कामिनीं स्वेदपनयन्कामी तालवृंतचालनेन बीज

यति इति मुदस्य स्वेदरूपणां श्रिरः श्रियः स्त्रीत्वरूपणां॥ अधत्तेति मुदेत्यपि पाठः॥२३॥ नेति॥ तेनत्नीमेन नलाय वि
वाहदक्षिणीकृतेषु कन्यादानदक्षिणात्वेन दत्तेषु वाहेषु तुरगेषु वास्तेरव्यानुत्वेव संख्याज्ञानेप्रयत्नवानपि
कोपि कश्चिदपि क्रमः इयंतो वाहा दत्ता इत्येवं संख्यापरिच्छेदे समर्थो नाभवत्॥ तथाज्ञातर्के नेषुत्रनेकरूप
णीकृतघटिताघटितकांचनेषु न॥ तथा मत्तकेलिषु गतमदमातंगेषु च न॥ तथारत्नराशिषु नक्रमो भूदितिम
वेत्र विवाहदक्षिणीकृतेष्विति विवाव कृतरं यौतकं दत्वमिति नाव॥२४॥ करेति॥ यत्राश्रुश्रुरूणि रश्मिस्तयोः करग्र
हे विवाहे विषये वाम्यं वक्रत्वं अधत्त निजे॥ नेम्यभिलाषात्रलाकार धारणादि द्वारा सर्वविरुद्धोऽभूत् अनुचय
श्चानल वरणाच्चमरे नैम्यास्तुतिध्यानादिना प्रमाघसं तोषादक्षिणीकृतः अनुकूलं नीतः सोग्निः ततः पाणि
ग्रहणानंतरं नलेन भुरस्कृत तृल्लेखनादिसंस्कारपूर्वं अग्ये प्रतिष्ठाप्य तत्क्षणे तस्मिन् विवाहसमये प्रदक्षिणः
प्रकर्षेनापि सव्यः ततः दक्षिणभागे नवलयाकारेण वेष्टितः॥ अथवयं पूर्वं यौतकदानकाले वामभागे कृत्वा
पश्चात् नैम्या फूत्कारादिना प्रबोधात् नुकूलः एव क्रियत इत्युक्तिः॥ अत्र कश्चित् कश्चित् विक्रम्भ गोदेशाचा
राछारवाने दात् कुलाचारविशेषा बोधव्याः नतु न श्रीहर्ष कवेरज्ञानलेशोपि॥ अतएव यथाविधीति प्रा

युक्ता। आशो ऽहमिच्छति आङि श्रुषोः सनस्छंदसीत्यनिः॥ शिष्टप्रयुक्तत्वा भाषायामपि सा धुत्वं ज्ञेयं॥ ३४॥ स्थिरे
ति॥ अनेनात्र अस्मत्स्थानमारोहेतु स्वार्थत्वं अस्मेव स्थिरा भवेति नेलेनो च्चाशिर्ता मंत्ररूपा वा कृता नेमी माहात्म्यस्य
सिलावत्निश्चला भवेति तस्यै आशिषं दत्वा अस्तु अनेनात्मनः नाशः॥ वर्णोत्रुच्चारिताः प्रभवा भवति॥ तत्रोत्पन्नं कृते
क्रियाकिं किमिति तस्या लक्षोत्पत्त आह विलामन्यते नृणा जसामपि नृणां प्रेरणयाकरचरण व्यापार मात्रेन
चले त्वस्थानादन्यत्र गच्छेत्॥ सा तु नेमी पुनः अतिप्रभाविना विडोजसं द्रेणापि स्थितेः मनो व्यापार मात्रस्वान्न
तन्नलपनित्वरूपायाम् मर्यादायाः सकाशात् न चलिपनि व्रतासीमां न त्याजि ते ति स्थिरतरत्वेनाधिकायां नेम्या
न्नहं ही ने तिस्वदोषं विचिंत्य लज्जयेव नष्टेत्यर्थः॥ वैधमस्मोरोधिनं। तेन कारितमिति भावः॥ नराश्च दर्शने अस्मा
त्तुं ङि- कुषादित्वादङ् नशिमन्योरलिङ्घे त्वमिति एवेत्वे रूपं॥ ३५॥ प्रियेति॥ तदाव्क्रिसंन्निधिके लेऽपुरोधा गो
तमो विदर्नतो प्रियस्य नलस्याप्युत्कूलसहग्रेथिनानि बद्धवासो यस्यास्तामेवं विधां विदधे चकार। उत्संस्वते
पटं विछिद्य कर्तित्वा रणे नेमी विहाय प्रयासतो गमिष्यतो न ना त्सकाशादेषपुरोधा अविश्वासं विश्वासा
भावं नगादेव। वस्त्रं छित्वातां हित्वा यं गमिष्यती तेन तस्या विश्वासो न कार्य इति अस्य वस्त्रेण सह स्ववस्त्रस्य ग्रंथिं

नै॰टी॰१६

दत्तैवानेन सह विवरणीयमित्युवाचेवेत्यर्थः ॥ कलिना पराजितो नलो द्यूतहारितसर्वस्वः स्वीयैस्त्यक्तो द्वापरेण
कलिना पक्षिरूपेण तद्धारणार्थं छिद्रस्य वस्त्रस्यापहारात् वस्त्रं तदा ज्ञात्वा भैमी वस्त्रार्द्धधारी सन्निद्रा
णायास्तस्या वस्त्रार्द्धं विच्छिद्य तां महारण्ये तत्याज इति भारतकथा ॥ चैवमुत्तरीयवस्त्रग्रंथिबंधनं तेन कृतमिति
भावः ॥ विदर्भेति पाणिग्रहणसमये इति योजना ॥ ७१ ॥ ध्रुवेति ॥ तस्य ध्रुवस्य दर्शनार्थमुन्मुखी ऊर्ध्वस्य तेन पत्या
नलेन विदर्भजा लिङ्गिताऽपि ध्रुवस्यावलोकनार्थं भ्रमिं दधे उक्ता ॥ तदुन्मुख्या त्रुवाक्तत्वा मं ज्ञाप्येति वा ॥
ननु स्थूलस्य ध्रुवस्य स्वयं दर्शनयोग्यत्वात्सा स्वयमेव तं पश्येत् ॥ तेन किमिति दर्शनं कारितमित्यत आह ॥
अस्य ध्रुवस्यातिमात्र सूक्ष्मप्रमाणत्वं अदिमार्द्रिके नेत्रगोचरः किं न स्यात् अपितु स्यादेव यद्यपि । तथापि स्व
यं दर्शनयोग्यत्वेपि आगमेदितो महिमा वेदोक्तं गौरवं सत्योस्त्विति विशेषः श्रुत्युक्तं हि प्रमाणमित्यर्थः ॥ अ
तिर्हि तत्तो वधूं त्वमुदीक्षस्वेति ध्रुवे दर्शिते ध्रुवं पश्यामि प्रजां विंदेयेति सा ब्रूयात् तस्मात्त्वयं द्रष्टुं शक्य
त्वेपि नल एवादर्शयदिति युक्तमित्यर्थः ॥ वैधं ध्रुवदर्शनं कारितमिति भावः ॥ एतत्सर्वं क विषयः अथवा वध्वा
प्यस्याणुत्वं प्रत्यक्षदर्शनेच्छया ॥ तथापि ज्योतिःशास्त्रोक्तं ध्रुवमंगलस्य महापरिमाणत्वं सत्यमेव ॥ ७२ ॥

दि

११

वेनेति॥सा च पूर्वं वेन नलेन अनुतां अतिसूक्ष्मत्वं गतामिमां सतीं पतिव्रतां अरुंधतीं त्वं पश्येति उक्ता अदर्शि
दर्शिता॥नत्वामुत्विं त्वेदृति। वरणात्पूर्वमेव कुदिक्षत तस्य मनोरथमात्रेण हृदये कृतस्य नृपतेः कृते अनेन कृत
स्वर्गपतेः एण व ध्यायवेनस्पकं इंद्रोये नैवं कृता जनादिव लज्जयेति शेषः॥अहं हि परिणीतास्मीति इदृणप्रायम
करवं नैमीतु कृदिश्वारणमात्रादेवेति मन्तोपीयमेवाधिकासतीति भैम्याः सकाशात् लज्जयेव कृशाभित्यर्थः॥स्वत
कृशात्वमेव प्रमुखे क्षितं॥नृपतेर्जनादिति शब्दद्वयं सामान्यवाच्यपि नलभैमीलक्षणविशेषपर्यवसाति॥वेधम
रुंधती विलोकनं कारितमिति भावः। अरविंदेण ताद्विण। अग्निवादि हक्षो रितिअणो कर्तुर्लौकिकमर्त्त्वं॥तस्याव
हितत्वान्न दुष्टितेति भावः॥४७॥प्रसूननेति॥तस्याः भैम्याः करयोरेव पल्लवयोः स्थितैः वर्त्तमानैर्लाजैः प्रसूनतापुष्प
त्वं अप्रापि प्राप्ता॥पल्लवे कुसुमपाणि युक्ता नि॥तथा अनया भैम्या उडितेः कराल्मुक्तैर्व्योमनि विहरद्भिर्लाजैः
नडिः पथिकराग्यं नगालरूपे मार्गे उडुभिवन तत्त्वशोभाजितो व्योम्नि न कृत्वा पिप्युक्ता नितथा मराली मुखे
न लाजैः भौ अनया कृतैर्दावलैर्दंतपंक्तेर्द्युतिशोभा नैजे॥मुखे च दंतपक्तिर्युक्ता॥वैधो लाजहोमस्तत्या
नइति भावः॥४८॥नयेति॥तया भैम्या मतीष्टाकरकुड्मलात्पांस्वी तता अकृति धूमपद्धतिः क्रुपमानलाग

नै०टी०११९

दिव्यसंबंधिनी धूमपरंपरा कपोले मृगनाभिशोभितां कस्तूरीशोभां प्राप्ता॥ ततऊर्ध्वं गच्छंती दृशोश्चक्षु
षोरंजनतां ययौ प्राप॥ ततोप्यूर्ध्वं गच्छंती अलिके ललाटे श्रुतो कर्णयोः तमाललीलां वतंसरूततमालदल
मादरूपं श्रिता॥ ततोप्यूर्ध्वं तरंगच्छंती अलिके ललाटे अलवूयिता चूर्णकुंतलवंदाचरितां तत्तुल्या जानीत्यर्थः
कपोले कस्तूरी दृशोरंजनं श्रुतौ तमालो ललाटे चालका इति पुंस्त्वं॥ वैधर्म्यमग्रहणं तनमिति भावः मृगनाभि
निष्कर्तुं धूपमान इति निर्णो मृगनाभिशोभिनी तस्याभावात्तत्ता॥ त्वत्नलोशति पुर्वत्॥ ५१॥ अपन्हुत इति॥ त्व
याजुर्षोल्लजावतोस्तयोः करे वर्त्तमानः स्वेदनः सात्त्विकधर्मजलसंघः दानजलैर्ब्राह्मणेभ्यो दक्षिणा दानार्थ
मुत्सृष्टैः संकल्पजलैः सह मुहुर्वारिमिलनसंबंधं प्राप्य तत्र अपन्हुतः अलपितः॥ दानजलयोगात्सात्त्विकं
स्वेदोयमिति लोकेन न ज्ञातः इत्यर्थः॥ करे मुहुर्मिलितं पुनः पुनरुद्भवन् दानजलैरपन्हुत इति वा॥ तत्रापि
कामविकारवशात्स्वेदं लोको ज्ञास्यतीति भिया वा॥ दृशोरपि संबंधि प्रस्तुतं गलितं सात्त्विकं कामविकार
प्रमभ्यर्थनैः सांद्रैः धूमलं घनैः धूमाक्रमणैः कृत्वा समाधीयत परिहृतं तास्यामित्यर्थः॥ तैरेव कटुत्वनिरय
तं घिनं वा॥ परस्परसंस्पर्शान्नियोः स्वेदादयः सात्त्विकाः प्रवृत्ता इति भावः॥ ५२॥ वक्त्रनिति॥ वक्त्रनिवसन्नि

१२

दक्षिणां प्रयच्छतो दक्षिणत्वेन दक्षतो नामस्य सत्वं दानशौंडत्वं च वेत्स्यत तत्स्वरूपं च व्यक्तिरेव वक्ष्यन्ते आश्चर्यतिश
या ज्ञेमां वमितेषु प्राप्तेषु जनेषु मध्ये नयोर्नैमीनलयोरपि कंटकं कुड्मलश्रियः कंटककलिकारोमाभिश्रितां ए
कं यपुः सात्त्विकोपि रोमांचो न्यजनवदाश्चर्यादयं जात इत्यपलपित इति भावः॥ ४७॥ वन्द्ववेति॥ कृतिक्रियायां वेदृष्टि
हितलाजहोमाग्निपरिक्रमणादिकायाः वारेनस्य परं पराएकस्माद नंतर मन्यस्य अपारं च तस्माद नंतरमन्यस्य
वंमव्यवहितेपि उत्तरोत्तरत्वात्वत्वाद्धिषयात्वरावेगितावयोः सात्त्विकत्वाव जनितस्यां गावलनात्मकस्य स्तंभस्य
विजित्वरीत्वय नत्वीलाने वेद्गुवातिनापलपितेत्यर्थः॥ अत्र वद्रूपापेक्षितायामपि कर्मवेगितायां सात्त्विकस्तंभस्य व
त्रातो किमपि कर्मशीघ्रं कर्तुं समर्थो नाभूत् तामिति भावः॥ तथा समिधाकोष्टैः समेधितः संवर्द्धितोपि आयत
स्थितोपि तयोः कंपसंपत्तिं सात्त्विककंपवाकल्पेन नालुंपन समयति स्म॥ प्रीतजेति॥ कंपं विस्ताहोग्निः शमयति स्म
तु सात्त्विकं तस्य तत्राधमर्षत्वादित्यर्थः॥ तयोरन्यसात्त्विकापलावेपि स्तंभकंपौ लौकैर्ज्ञातावेवेति भावः॥ आवर्त्तेन
स्तंभेनेति न स्तंभविजित्वरीति भ्रमत्समासः॥ अलुंपत्‌ त्रासमुंचा दीनामिति तु॥ ४८॥ दमेति॥ दमस्वसुः पाणिग्रहकौतु
कस्तुष्यनलस्य संबंधिनो वैवाहिकस्य श्रौतस्य विधेः सांगतांग साहित्यं पुरोधसामविदधेनतरां नितरां साकल्ये

नवकं प्रधानमार्गनलेन कृतं अन्यानि तु पुरोधमाकृतानि तिनावकः कस्यकेनेव ॥ पुलोमयासुद्वहतः परिणतयः प्र
तत्कृतोसंबंधिनो विधेः सांगता आंगिरसेन महर्षिणा बृहस्पतिनेव ॥ ५९ ॥ स इति ॥ तत्र वैवाहिकविधेरनंतरं सन
लः पुरंध्रिभिरंतःपुरनारीभिरालिंगितुं वधूवरवेष्टादिदर्शनार्थं सहस्रं धीकृतं क्षणकाल्पदिरचित बकुलिंद्वाग्या
छं वधूवरस्थं वेशार्थं रचितशृंगारं वैदिककौतुकागारं कृत्वहलावहं दूर्वायवांकुरादिनवमंगलद्रव्यसहितं गृ
हं आगात् ययौ ॥ यद्गृहं जिष्णुना जयनशीलेनामुना नलेनाधिष्ठितं सत् विलोकितुं नेत्रसहस्रावकाशादायि रंध्रस
हस्रधारिणा सहस्राक्षस्य नेतुत्रेण कवचेन सह मित्रतां सामर्थ्यं अधात् बभार । तदपि जिष्णुर्नेंद्रेणाभिलीयते ॥
खलु उत्प्रेक्षायां निश्चयेन ॥ ६० ॥ तथेति ॥ वरेण वध्वा च अज्ञानया बुद्धेन्द्रियान्कृत्वा तथा दृष्टवन्नो निरंतरोपि
निःशोषित ॥ आदृष्टिं न मुक्तमित्यर्थः ॥ तथा परस्परक्रिया अन्योन्यं चेष्टादिव्यापारो पिक्रियैव संपर्क संमुख
दर्शनेन नालोकि न विलोकितः किंतु दृगंतमात्रेणेत्यर्थः ॥ तथा त्र्यहं दिनत्रयं यथाविधि विलुक्कसंजोगं तत्कृत्स्ना
रतं यथा तथा परं संस्पृष्टं स्फुरति छाम हितं यथा तथा ऽज्ञापितायितं त्र्यहमिति सर्वत्रयोज्यं ॥ विध्वंतिक्रमर्यादि म
नत्रयतास्यां सहस्र्तकं अन्योन्यं विलोकितं सहनिद्रितं च परं लज्जया न यावत्स्पष्टितं सुक्तं । नात्रोपांगं दृष्टं । न

वधुंबनालिंगनादि सर्वं दर्शयितमित्यर्थः॥एकत्रत्रायनं त्रिरात्रं ब्रह्मचर्यं चेन विधिः। अत्रानायाञ्जनयोरन्यधना
या॥इति साधुः॥१५॥कटाक्षेति॥भोजकुलस्य भीमस्य सर्वज्ञस्य भोजाख्यक्षत्रियवंशस्यांकुरो बालो दमः क्वचिद्भीम
द्वयथागेहे कस्मिंश्चिद्देशे जन्यजनैर्वरयात्रिकैर्नलपक्षीयैः सह निजप्रजाः परिहासपात्रभूतपौरवारस्त्रीमुखा
नाभिः प्रयोज्याभिरित्यर्थः॥कटाक्षणात् नेत्रसंज्ञया परिहाससंश्लेषवक्रोक्त्यादिनाऽर्थान्तरोपदर्शनरूपं उपहासं
अविकरत्तरां अतितरां कारयामास॥तथा क्वचिद्वरयात्रानिमित्तेनागतान् नलपक्षीयान् अन्योऽस्य राजलोका
न्वधूराभरोभिः दासीस्वैरिणीसैरंध्रीप्रभृतिभिः पुरसुंदरीभिर्वारांगनाभिर्भोजयन् परिवेषणार्थं काश्चित् सहभोजना
कनं तच्चैतत्सर्वं दिविशाकाशे स्थित्वा कौतुकेनावलोक्य आनंदेन परमहर्षेण सांद्राः पूर्णाः। प्रणिदधुरिषे
तिपाणिग्रहयोर्गृहप्रवेशानंतरमित्यर्थः स्वयंवरानंतरमेव देवा निर्गता इति चतुर्दशे सर्गे यद्युक्तं तथापि
त्रसे निर्गत्य नलपुरप्रवेशावधि तैर्यतं नलभैमीकौतुकविलोकनार्थं गगने स्थिता इति दिविषदेन सूचितं॥ इदा
नीं पुनः स्वर्गं प्रतिनिर्गता इत्युक्तेन कोपि विरोधः॥ किं वानंतरसर्गसंगत्यै कलिनलद्वेषारंभस्याप्रस्तुततां परि

हर्तुंनलस्वरंप्रविष्टेदेवाश्चस्वर्गंजग्मुः।गच्छतांचैतेषांमध्येमार्गेकलेरुत्तर प्रत्युत्तरदानादिप्रसक्तानुप्रस
क्तयवतारणायपद्युक्तमुक्तं॥२०॥श्रीहर्षमिति॥किंभूतेकाव्येचतुर्दशतयींविद्यांविद्युर्द्विर्जानद्भिःसरस्व
तीजाग्रदधिष्ठानकश्मीरदेशोद्भवैरपिविद्वद्भिःपरिष्कृतासर्वंमहितेस्पूजितेदोषलेशेन।परिहितेसर्वगुणप्र
र्णेतथातत्कुविंतस्माच्छ्रीहर्षाद्भवतीतितत्कुतस्माद्भूरुत्पत्तिर्यस्यैवंविधेवा॥नैषधेत्रेतिपाठेनैषधश्चासावी
यश्चेतिव्याख्येयं॥काश्मीरैरितिप्रज्ञार्थक्तयोगेक्तस्यचवर्त्तमानइतिषष्ठीविधानात्कर्तृतीयाचिंत्या॥पूजितो
यःसुरैरपीत्यादिशिष्टप्रयोगदर्शनाद्वर्त्तमानेर्थेविहितस्यक्तस्ययोगेषष्ठीभवतिचकारात्प्रयोगानुरो
धेनान्यापिभवतीतिसूत्रार्थेनिर्वर्णपवर्थ्यर्थेचबहुलंछंदसीत्येतोबहुलग्रहणंवानुवर्त्यकाश्मीरैःकरणभूतै
महःप्रज्ञासंजातास्येतिमहितइतितारकादेराकृतिगणत्वात्क्तांतत्वात्तत्पुरुषावंवासंपद्यक्तांतत्वेपिकलहं
सराममहितइत्यादिशिष्टप्रयोगेसमासदर्शनात्मतिबुद्धिप्रज्ञार्थेभ्यश्चेतिचकाराद्भूतेपिशिष्टप्रयोगानुसा
रेणप्रत्ययसंगः॥तत्रक्तस्यचवर्त्तमानइतिषष्ठीप्राप्ताभावात्कर्तरितृतीयैवेतिवा॥यथाकथंचित्समर्थनेपि
वतुर्दशतयीमितिसंख्यायाअवयवेतयप्इतितयपिटित्त्वान्ङीप्॥विद्यांविदद्भिर्नलोकेतिषष्ठी॥तत्कुविता

नै०टी०१६

षितपुंस्कत्वान्नुमन्नाव॥षोडशः पूर्ववत्॥३०॥ ॥इतिश्रीवेरकरोपनामश्रीमन्नरसिंहपंडितात्मजनारायणकृतेनैषधीयप्रकाशेषोडशःसर्गः॥ ॥१६॥ ॥समाप्तः॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥

नै॰टी॰७

॥श्रीगणेशायनमः॥ ॥अथेति॥ अथ स्वर्गगमनचिंतनानंतरं धरित्रीप्रतिधावनेन जनितं प्रायसं वृथैव
वृथा प्रायं व्यर्थमिवास्य विधाय॥ ध्वनेनासुपलक्षितहर्षविषादनया अथ च तटं भूमिं प्रति निःप्रयोजन
मागमनेन ततः पुनर्यथागतं व्यावर्तनेन वसरस्वतः समुद्रतरंगोलास्तरंगास्तद्वल्ली लोयेषां ते तुल्या सुरा
आगतमननिक्रम्यय यथागतं स्वर्गं जग्मुः। नैमीमप्राप्यैव जग्मुरित्यर्थः॥ नैम्पलाभात् श्रमस्यैवेयथ्यं निलनैम
वरदानद्वारात्म गौरवरक्षणात् भापत्राद्धः प्रायो जिनतु वृथैवेत्युक्तं॥ वृथावृथात्वं प्राप्ते प्राप्तो निवावृथा
प्रायं॥ यथागमच्यपीनाव॥ यथा आगतं तथा जग्मुरितिवा॥१॥ तदेवाह॥ नैमीमिति॥ तदेवाहचिरं चित्ते धृताम
पि नैमी तस्मै नुवः पत्येनलाय प्रादात् पदत्वानविषेदुः पश्चात्तापं न प्रापुरित्यर्थः॥ कस्मै कामी वयतो विनीताय
शिष्याय स्थिरं चित्ते धृतामभ्यस्तां विद्यामिव दत्तापि विद्या चिन्ताय यथा नोपरमति तथा तस्मै दत्तापि सा सगुण
तयातेषां स्थिरता जोपरतेति॥२॥ कांतीति॥ तासुरास्तेजोरूपाः सुराः कांतिमं तिरत्नैर्वर्धिताणि विमानानियदृच्छा
गामिनो रथान् नेजिरे॥ आरुरुक्षुः। केकानीवविवस्वत ता सुराः प्रतिबिंबाः स्फटिकाद्रेः कैलासस्य तटानीव
प्रति तटं प्रतिफलितत्वात् प्रतिबिंबानां बहुत्वं॥ तासुराः नं जग्मासे तिद्युस्त्रं॥३॥ जवादिति॥ जवान्निजवेग

ग्नातेनवातेनत्वराबलात्आलिष्टाःसहचारीन्ततामिघायैरेषांदेवानांरथैस्वसनाभयोःसकाशात्स्वस्या
त्मनःशीघ्रगामित्वंद्रष्टृणामग्रेअकथीवकथितमिव॥आलिष्टवलाहकस्याद्योःपश्चाद्गामित्वात्तुरस्खलिता
नांरथानांशीघ्रत्वमि[illegible]र्थः॥शीघ्रशब्दोत्रधर्मिवचनः॥वेगजेनवातेनेतिवा॥बाधातोन्नविवेकः॥स्वसनात्पंचमी
विभक्तेरितिपंचमी॥५॥क्रमादिति॥क्रमात्क्रमेणदवीयसांदूरतराणांतेषांतदानींअणिमाअणुत्वंस्पष्टंप्रक
टंसमदृश्यत॥किंभूतःतद्वक्रेअष्टानांगुणानांअणिमादीनामैश्वर्यैदाधिपत्यात्पर्यवस्यन्निवपृथग्भूतइवसर्वे
भ्योमहिमादिभ्योगुणेभ्यःपृथग्भूतादिवादिवस्पष्टंदृष्टइत्यर्थः॥स्थूलमपिवस्तुदूरत्वात्सूक्ष्मंदृश्यते॥तेषा
मष्टैश्वर्यगुणविशिष्टंतेतन्मध्येअणिमैवतस्मिन्समयेस्पष्टोदृष्टःनत्वन्यइत्यर्थः॥तस्मिन्कालेपर्यवस्यन्स्फुर
न्नवन्इतिवा॥स्पष्टमुल्लेखे॥तेषांरथानामितिवादेवनामअष्टगुणैश्वर्यान्नित्यस्वधान्येष्वप्यणिमासमागत
इतिव्याख्येयंअतितरांदूराणांईयसुनिस्थूलदूरेतिपरयणादिलोपोगुणःअणिमापृथ्व्यादि॥६॥
ततानिति॥कश्चित्कस्मिंश्चिदाकाशप्रदेशेलग्नःकेतुस्त्रीरथस्यध्वजाग्रेणाह्नेवायोर्गोपयातस्संबंधान्मूलवि
घुन्माकृष्टेतियावत्एवंविधाजलमुचेमेघस्यपलेस्वापंक्तिस्तेषांदेवानांरथाविद्युतास्वच्छापीतापताकायस्य

नै०टी०१७

तन्नावं तततान ध्वजायसंबंधात्प्रकटिता विद्युत ध्वजायेपीतापताकेवान्वदिस्पर्धः॥ ६॥ पुनरिति॥ इतस्ततो
गमनवशात्स्पर्धितुं पुनः पुनर्मिलंती पुंसंबध्यमानास्तु पाथोदा मेघास्तेषां पंक्तिषु वर्त्तमानं धनुरिंद्रधनुर्म
र्गसंबंधवशान्नाकनाथरथमालेवेति एवं शीलं संबंधं सदिंद्ररथस्य वा॥ नरएणं नृपएणं वन्नृवाइंद्ररथे वर्त्त
मानं धनुरागच्छंती पुंमेघपंक्तिषु चलं नृपएणमन्वदितिवा॥ मेघादिस्पेंद्रचापानुशोभेते॥ ७॥ जलदइति॥
जलदाजालानां जलेतस्मिन्काले इंद्रागमनसमये जातैर्वज्रिणो वज्रस्तस्यानुबिंबनैः प्रतिबिंबैः नानाधे
षांमेषजालानां अशनिनावज्रेण सनाथनासस्वामिकता जाते निजातातदाकन्हतिप्रायेणमेघानांस्व
त्वमित्युत्प्रेक्षा॥ ८॥ स्फुटमिति॥ यदंडच्छन्नतोयसस्पदं डकचिदाकाशदेशे चंडरुचिं सूर्यं चुवन् स्पृशन्
सन्नतं सूर्यमेवसावर्ण्यनाद्वैर्वशे जातानां महीभुजांकुलछत्रं कुलश्रेष्ठं अथवा कुलक्रमायातेराजचिह्नं
तं स्फुटमिव चक्रे॥ स्वयं हि तन्नादधोदंडसंसंबंधाछत्रमिवेत्युत्प्रेक्षा॥ तिसूर्यमंडलं प्रासादितिनावः ७द
ये ऽस्तमये वसमानो वर्णोस्य सवर्णः सूर्यस्तस्यापत्यं सावर्ण्यः अतइञ् ।वंशादिगणादि॥ ९॥ पाशीपाशोवरुणा
पाशान् नलश्री मत्तु बोर न स्पतुल्य प्रेमिणो विषयेवि स्मितायादिवः विस्मयवशा देवशिरः कंपेनस्तस्तां नृपा

न्दूषणं यस्मादेवंविधस्य श्रवसः कर्णस्य श्रियं लक्ष्मीं दधौ स्तनस्यास्तनाटंकरहितः कर्ण इक्षुस्तुत इत्यर्थः॥ अ
नेन द्विवोनायिकात्वं मंज्यते॥१॥ यवनेति॥ पवनस्य वंद्रस्य सर्पाद्या धारेषु आवाहादिष्ठ सप्तसु स्कंधेषु मध्येत
राश्वकोधारस्तं स्कंधमारुह्यन् तस्तरा उज्झंतः कराः किरणाय ज्वालारूपा यस्य स शिखी वह्निः अनेनानैमीप्रा
पीतिनन्नः सदा देवानां श्रमं चक्रे॥ नैमिप्रात्तिहृषदिर्यैन्तस्माति किमिति सर्वेषां देवानां त्रां तिर्जातेत्यर्थः॥ अन्यापि
नवबधूलाने कस्य विनिमित्रस्य स्कंधमारुह्यन्त्यत्तकं रोजवति॥२॥ नत्कर्णविनि॥ भारतीवाणी नैमजागि
रांत्नैमीवाणीनां विरहात् दूनो संतप्तो तेषां देवानां कर्णौ अध्वनि मार्गे अन्तुकल्ले नैमीवाण्याः सकाशान्नूनै
र्षणि वीणासंबंधिनि निर्ध्वनिनिर्व्यनोदयन् सुखिनौ चकार॥ सुख्यानावे अनुकल्पोपिकार्यार्थमंगीक्रियते॥ स्त
नादीनां दित्वात् द्विष्टाजातिः प्रायेणेति वृत्तौ वचनात् कर्णक्षितिप्रतिनियतापेक्षा द्विवचनं॥२॥ अयेतिअ
थवाणी वीणाक्वनितश्रवणानंतरं ते देवी देवाश्च आसितविषं खड्गल्पकोतिंचायायांतं संसुखमागच्छंतं
जनोघं अवैक्ष्यं नापश्यन्॥ तत्र हेतुः तेषां देवानां प्रत्युद्गमनस्य प्रात्याकांक्षया मिलद्युज्यमानं स्फूर्तिमत्सरी
रं व्योमाकाशमिवं यतः स्कारीरस्पक्रियावत्त्वं युक्तं। जनौघं मखीत्विषामित्यपि पाठः॥३॥ अप्राप्तुरिति॥

तिसुराः अये स्वरं पुरः स्मरमाजिहानमागच्छन्तं स्मरं अश्राक्षीः। उत्प्रेक्षते तज्जनो यस्त्वामिनाकलिनाऽन्वेषणे
दिव्याणामथस्व द्यूतपात्रकाणां संबंधिनो विनयस्याविनीतस्य स्पन्त्राक्रान्त्वार्थं पुरस्कृत मिवाग्रेकृत मिवायस्थ शूजि
तमिव।। स्मरो हि प्रियवेदनं तत्कर्तुं जानाति इति इंद्रियार्थः। किम्भूताः छलेन द्यूतपात्रकेषु विषयेन लमवि
नयं शिक्षयितुं पात्रकाऽज्ञान हारान्नलं निगृहीतुं कलिना स्वजितः पुरः प्रेषितः प्रायेणेत्युत्प्रेक्षा।।१४।।
आगम्येति।। एवंभूता जनाः यस्य कामस्य परितः पार्श्वयोश्चरंतीति पारिपार्श्विकाः वयस्या इत्यर्थः। सेव
कास्ताः।। किंभूताः गतं मत्रकाद्यानां मन्त्र हीनानां च राज्ञादीनां मातादीनां वसं इंदो गार्थे दृष्टेण मिवानायासम
ज्याः प्राणा येषां ते अत एव दृष्टदृष्टस्त्रीकृते पश्चात्कृतपरित्यक्तेत्री। क्रियो येस्ते। वधजयं पापभयं लोकलज्जा
चैतत्सर्वं येस्त्यक्तं ते ता दृशा निर्भया निर्लज्जाश्चेत्यर्थः।। तथा प्राप्यानेन धृष्टत्वे नेदनलकृतप्रतिज्ञास्विलुम्पल
निःयुक्तं सर्वस्वं येषां ते संतीति विशेषः।। पारिपार्श्विकैः पूर्ववत्।।१५।। क्लिन्नत्वीति।। यः स्मरः लोकान्वज
यतीति लोकजित् तस्य भावं सर्वजनविजयितां बिभर्तीत्युत्प्रेक्षते।। बुद्धस्य स्पर्द्धयेवाजितो हि मारजिदिति
स्वशत्रुस्पर्द्धयेवमारजिल्लोकजिन इत्यपि पिधाना लोकजित्यर्थाद्वाच्यत्वं बिभर्तीत्यर्थः। तथा यस्याऽऽरा

रिणः शरीररहितस्यदक्षदेवत्वादनंगस्यात्रलोकेकामिनीनांमनोविकारंप्रतिमैथुनद्वारासर्वजनात्प्रतिवाकर्तृत्वंस्र
ष्टत्वं।अवाप्नुत्त्वंकृते।।विश्वकर्तुरीशस्यतुल्येयवस्पर्द्धयेवाईश्वरोहिस्मरत्वात्स्मरस्यशत्रुःतस्मात्तस्पर्द्धयेवतस्या
शरीरकर्तृत्वंस्वयमपिप्रतियेनांगीकृतमित्यर्थः।।यथाऽशरीरिणएवेश्वरस्यकर्तृत्वमितिन्यायविदस्तथाऽयम
प्यनंगएवसत्कार्यकारीत्यर्थः।।जिनमहेशाभ्यांजितोपिलोकजितत्वेनाशरीरिकर्तृत्वेनचवयःइन्नत्वात्पांसमएवंवि
धोसीतिवलवानितिभावः।।रहाईश्वरस्येति।।अस्त्रीकृताःशास्त्रीकृताःस्त्रियोयेनएवंविधोयःकामःईश्वरस्येमांस्र
ष्टिमीश्वरेणनिर्मितंसत्स्वंजगदाकुलयत्रन्यथाहन्निवतःस्ववशंकुर्वन्नथचपीडयन्नस्तिउत्प्रेक्षते।तस्येश्वर
स्यदेहदाहजनितवैरंस्वरंश्चितयन्निवदेहदाहममानेनकृतस्तस्मादेतेनस्वितमेतदीयंजगत्पीडयिष्यामीतिबु
द्ध्याईश्वरस्यकिंचिदपकर्तुमसमर्थः।तदीयंजगत्स्त्रीरूपेण।।अत्रतेकियंतिश्लोकानत्रुटितनितिविद्धुदेवाश्च
यागोपानष्टेनहरितानि।।ईश्वरस्येति।यःकामस्तस्येश्वरस्यवैरंविरोधमनुस्मरन्अस्त्रीकृताःस्त्रीकृताः।।अनस्त्रा
णाअस्त्राणिसंपादिताइत्यस्त्रीकृताः।।स्त्रियोयेनकामिन्यायुधःसन्अस्तिजागर्त्तीअस्तेनिरूपद्रवस्थिति
रूपसद्भावाचित्वात्।नतुईश्वरवैरंकृदिकुर्वतःस्त्र्यायुधत्वेनतस्यकिमनिष्टंस्यादतआह।ईश्वरस्यइमी

स्त्रीपुरुषरूपां सृष्टिं निर्मितं रूपं कुर्वन् समग्रमपि जगत्॥ आकुलयन् स्ववशीकुर्वन्॥ अथवा र्धाछलेन अ
स्त्रीलता न स्त्रियः अनारीरूपाः लताः स्त्रियो येन ईश्वरविरोधात् तस्य स्त्रीत्वं लतमिति विपरीतमुचितं॥ अ
न्योपि विरोधी बलवतः स्वविरोधिनः साक्षात् किमप्यनिष्टं कर्तुमशक्नुवन् तत्कार्यनाशद्वारेण तत्कृतिविपरीतं
वा पौरुषमाचरन् वैरं निस्तरति यथा तथेश्वरकार्यं स्त्रीपुरुषरूपस्वायत्ततया विनाश्य पर्यईश्वरं मुर्द्धेल्यत्वात्तेद्व
रं सफलयन्निरूपइवस्तिष्टतीति भावः॥२७॥ वक्र इति॥ स्मरः कामः शक्रादिनेत्राणां अरोचके अरुचिव्याधिवि
शेषं च दैवतवैद्यास्तां नासत्यास्यामपि॥ अचिकित्स्यमप्रतीकार्यं चक्रे॥ कुत एतद् तत्राह॥ पीतनलश्रियां पीता
सादरं दृष्टा नलश्रीर्यैस्तेषां पीते तृप्तिनिष्ठां तेन अनलवियोगात् अतीतनललक्ष्मीदर्शनाभामिंद्रादिनयना
नां नलभिन्नस्य सुंदरांतरवस्तुनोऽदर्शनात्॥ उत्पन्नमरोचकमिति सुंदरः कामः॥ सौंदर्याद्वैतवद्दृष्टिस्त्यामप्य
नयने यं चक्रे॥ स्मरात् त्स्ववैद्यास्यामपि नलो अतिसुंदर इति देवनयनानामतिसुंदरनलवियोगजनितम
रोचकं सुंदरकामादिदर्शनेपि न निवृत्तमिति भावः॥ वयं तु स्मरं कामः शक्रादिनयनानां चक्रे समूहस्त्वयं
मरोचकनासी त्वं यतः दीतनलश्रियामिति ब्रूमः॥ इत्परस्तुल्यं॥ तस्याधनां कर्त्तरि वैवेकल्पेदेवं तवैद्यास्यामि

तिद्वतीया॥१८॥यत्तदिति॥अथानंतरं विबुधा देवाः यन्नत् अविमृश्य पयदेवछरेण नयनगोचरांतेदेवद्वि पंतंतथात्र
वैराग्यात् उद्धृतः कंपो यस्य तं॥तथा उच्चायुक् मुच्छानशीलं अतएवारुणं रक्तरूपं तथा आक्रोशा आक्रोशा घोषणं आ
क्रोशं आक्रोशपर्यंतं आक्रोशस्य निंदाया घोषणा गालिदानादिरूपा यस्य तं उत्कंपमिति पाठे उत्कर्षेण कंपनशीलः
तथाविधं क्रोधं बुबुधुः॥दद्दृशुः अद्भुतस्येत्न ह्रस्वलक्षणं भवति॥तिष्टते रूपं सर्वस्य उदर्कः संज्ञोः सर्वस्येति सर्वसवर्णे
लक्षपतपदस्थेति ताच्छील्ये उ कत्रि उच्चायुकमिति साधु॥१९॥यस्त्विति॥कुकुद्द्वे वर्षे नीतस्यानादर्शितानि
त्राहृत्तुल्यानि निश्वासर्वं धानि फूत्कृतानि येषां तथा दंतैः ओष्टदृंतं तस्य तत्र वायदस्य रुधिरं तस्य शिष्यक्षतेन त
स्मादन्यस्तलोहितस्य च कुषायेषी ताद्दृशा जना लोकाः यस्य पार्श्वं तत्र जिंकिरे॥ वां कला खंडइति वस्तृतीया तत्कृतार्थेने
तिसमासे दंतोष्टतेतिसाधुः॥२०॥दुर्गमिति॥यः क्रोधः कामाश्लेगेनापि स्मरदारणापि दुर्लंघ्य मनतिक्रमनीय
दुर्वासोहृदयं रुद्रावतारस्य दुर्वाससोनाम्नो मुनेर्हृदयं तदेव दुर्गमवलिं व्याश्रित्य संभ्रानपिद्वंद्वसहितानपिलो
कान्दिधक्षति दग्धुमिच्छति॥कामपेदस्यापि महास्नावद्रतिमावः॥२१॥वैराग्यमिति॥यः क्रोधः उद्वेरति त्रायेनरे
जनेराजा मथवलोहितं नेत्रस्युग्मा दिद्वर्यान्तिन नयन्नपि वैराग्यं रागीनावमथव अरुच्चिविषयेषु करोति॥विरुच

चेतत् रागजनकत्वं वैराग्यजनकत्वं च॥ तथा यः प्रज्वलन्नपि प्रकाशमानोऽथ च सर्वांगीणं तत्तैवल्लते पितमोंधका
रंअमोघं हं यस्तते जनयति॥ कीदृशं तमः सर्वेंद्रियाच्छादि सर्वाणि षडपींद्रियाणि आच्छादयति मुद्रेव॥ तानि इतरु
द्दृत्ति विरहितानि करोतीति तच्छीलं अन्यत्रापि विरोधपरिहारः॥ स्पष्ट एव॥ २२॥ पंचेषुमिति॥ ये क्रोधेनल्वसर्वेश्वर
स्य जयात्॥ अन्यविग्रहीतारिजयकाललनयः अनेन विरोधिना विग्रहवान् यः शत्रुस्तस्य जयकालसंबंधिनत्तयोनी
तिशास्त्रोक्तोपायः श्रितः आश्रितः॥ कथंनीतिराश्रितातदाह॥ पंचेषुविजयार्थक्तोऽस्कुमतः पंचेषुकामोऽत
स्य विजयी विषयेयाऽस्वाक्तिः तस्याकुंधस्यक्रोधवशतांगतस्य॥ अन्येन विरोधिनासह यत्क्ष्दा विगृहीतोरिउस्तेदेव
स्वयमपि विग्रहस्तु त्याघते व्याकुलीनत्पविजयते तिनीतिशास्त्रोक्तो वैरिविजयोपायः॥ तयेनेकामविजयास्य
समस्यमहादेवस्यस्ववशीकरणेनानुष्ठित इत्यर्थः॥ २३॥ हस्ताविति॥ तैर्देवैस्तत्रलोनो व्यलो किं किं ऊर्वन् इत्या
धनिनि जने हस्तौ विस्तारयन् प्रसादयन्॥ धनार्थमित्यर्थात्॥ तथा चिन्यत्॥ ताडनबहिर्निष्काशनादेः सकाशात्
अंतथा अर्थपथास्या अरुद्धा रिक्ता वा क यस्य सः तथा आकृते र्निजदैन्यज्ञापके श्लिष्टितेः काकुशोकनयादिजु
त्वं धनिविकारं सूचयन् ज्ञापयन् यत्तु धनिनिविच्यादिति तदपव्याख्यानं॥ नीनार्थनानितिपंचमीप्रसंगात्॥

स्यत्राद्यो धनी स्वामी॥ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरिति वामरः॥२४॥ दैन्येति॥ यस्य लोकस्य
दैन्यं स्तेन्य भयात् दैन्यं दीनत्वं स्तैन्यं चौर्यं च प्रभुरमेषां ताहृशास्तथा नित्यं वै मनवरतं अत्याहाराश्च ते आमया विनश्च ब
कुलत्वकारो गिनश्च॥ तथा तुं जनाये ज्ञानास्तान् स स्पृहं यथा भवति तथा पश्यंति तथाविधा अनुजीविनः। सेवकाः।
॥२५॥ धनिदानानामिति॥ यो लोकः पात्रपाणौ धनिनां दानोत्कृष्टिं दानसंबंधिनी उत्कर्षस्य विद्याविनयशालि विप्रस्य
हस्ते अवग्रहः प्रतिबंधः किं वयः स्वर्थ वित्तं धनिषु निःस्वान् निर्धनान् हा कष्टं च स्वान् स्वीयान् दासानिव विक्रीणीते
अधीनान् करोति। यद्यपेवं ग्रह पदार्थान्तर्गत दृष्टि पदार्थालोचनेन दृष्टि पदमनर्थकं तथापि दृष्टस्य विशेषणपद
संनिधौ विशेष्यमात्रपरता नास्त्वहं शाकरीरन्नामित्यत्रेव बोध्या॥२६॥ एकद्वीति॥ यो लोकैर्जनः कोपकामो दृष्टेन न
मन्यते तृणत्वेन गनयतीत्यर्थः॥ कोपकामाभ्यामपि विशिष्टो वक्तनर्थ कृत्वादिति भावः॥ वैशिष्ट्यमेव प्रतिपादयति
किं कुर्वन् पंचकारयन्॥ पंचमहापातकान्यपि कारयन्॥ कथं कृतो कोपकामो महापातकपंचके ब्रह्मवधसुरापण
स्तेयगुर्वंगनागमनेतच्चतुष्टयकारिसहसंवासानां पंचके पंचकमध्ये एकस्य द्वयो स्त्र्युरुषेण करणेहेतुकार
कृतोपकारे एनः पापावपिनमन्यते॥ तृणं नमन्यतइति पिपासा॥२७॥ अत्रवदंति॥ एकं वद्वे वेति समासे त्रि [illegible]

नै० टी० १७

प्रयोगो न भवेत्॥ एकं चैवा प्रमाणं येषामिति समासे बहुव्रीहौ संख्येयेड ज्बहुगणादिति डच् प्रसंगः। तस्मादके
ति पाठो युक्त इति॥ समासमाधानं तु समासांतविधेरनित्यतया पाक्षिकोऽनुज्ज्वावड् इति॥ प्रकारांतरं तु क्लिष्टत्वा
दुपेक्ष्यम्॥ १२॥ यद्गिति॥ योलो नः सर्वेंद्रियाणि षडिंद्रियाणि स्वस्य स्यैवं बाधः। घ्राणं गंधलुब्धं चक्षुरूपलुब्धमित्या
दिप्रकारेणेत्यर्थः॥ बहु यथा न्नवति तथा॥ जिह्वा मे बलं वेत्ति किं कर्तुं तस्यां जिह्वायां याक्षा वटवे याज्ञार्थं
वटुं ब्रह्मचारी शिष्यः तस्मै पाटवे नैपुण्यविषयया आज्ञा चाटूक्तिकौशले आचार्यकं नर्जितं। लुब्धस्यैषा रीतिः॥
सोपधादिति वुञ् आचार्यकमिति साधु॥ १३॥ पथ्यामिति॥ ते देवाः तथ्यां सत्यां पथ्यां मायते सुखावहां वधूनां
प्रबोधनां सदुपदेशमात्रकं न मत एवाधमविवेकिनां तथाश्रन्यमकांडं निर्हेतुकमाक्षिप्यावलेव्यनो जंतं न
तर्जनं॥ कलनिर्हितुककलकारिणां तत्र तस्मिन्कलिसैन्ये मा हमे रुं तद्दृष्ट्वं तः। हंतेति पाठे हंतेति खेदे सुरा
देवा अपि मोहं दह्युः॥ १४॥ यदुपास्तिर्नायस्य मोहस्यतु पास्तिनः सेवकान्वः स्मः प्रातः प्राणप्रयाणे प्रा
णगमनकालेपि स्मरद्विषं कामद्विषं त्र्यंबकस्मरणं स्मरः स्मृतिः तं द्वेष्टीति स्मृतिविलोपकमित्यर्थः। अतएव
वकालिशाः मूर्खाः॥ तथा कुटं बजं वालिकुडुबलक्षणे कर्दमे मग्नाः त्रुटिताः स्वप्राणेति वा पाठः। त्र्यंबकप्राणेन

६

पिकस्वित॥निषद्वरस्तुजंबालःपंकोस्त्रीःशादकर्दमा॥वित्यमरःसमयेपिकुटुंबचिंतामेवकुर्वंतीत्यर्थः।इदमपि

मृदलक्षणं।जंबालेनिमग्नोन्यापिकिमपिनस्मरतीत्यर्थः।स्वप्राणेतिपाठेस्वस्यप्राणानामित्यर्थः।द्विषमितिकर्मत्वविव

वक्षयाद्वितीया॥द्विषइतिपाठेश्रधीगर्थेतिषष्ठी॥२०॥तुंसामिति॥येमोहंनलब्धंनिर्वाणंविनाशोयेनसज्ञा

नरूपोदीपस्तन्मयस्तत्स्वरूपआत्मामनोयेषांज्ञानिनांवसिष्ठादीनांपुंसांउज्ज्वलमप्यंतःनिर्मलमप्यंतःकरणं

मलंकंप्रकटंजायमिमलसहितंकरोति।मोहमोहिताःकामादीनां संतोज्ञानिनोपिविश्वामित्रादयःमनोमे

नकादिदेवांगनाप्रवणंचक्रुःसर्वसुखलस्यापिमनसोमोहेनमालिन्यंकृतं।ज्ञानिनामपिचेतोसीतादिमार्कंडे

यवचःप्रमाणं॥नलब्धःसाक्षात्कृतःनिर्वाणोपयोगीमोक्षोपयोगीज्ञानदीपरूपःस्वप्रकाशज्ञानरूपःस्वप्र

काशज्ञानरूपआत्मायेषांतेषामद्वैतज्ञानरहितानामितिवा॥किमिव॥कज्जलवत्॥यथास्पदीपस्यकज्जलंसु

धाधवलितानांघटादीनांमध्यमलिनयति॥२१॥ब्रह्मेति॥ब्रह्मचारीवनस्थायीवानप्रस्थःयतिःसन्यासीःएतेत्रयोप्या

श्रमिणोगृहिणोगृहस्थंयथाअन्नाछादनार्थंउपजीवंतिसेवंते॥यस्मात्त्रयोप्याश्रमिणोज्ञानेनान्नेनवान्वहंगृह

स्थैरेवधार्यंतेतस्माज्ज्येष्ठोगृहाश्रमीतिस्मात्तवचनात्॥नलक्ष्मीस्तपवा॥प्राणधारणंकुर्वंति।तथाक्रोधेहेतोनमा

स्त

नोलवायं मोहं सेवते।। यं लक्ष्मीस्त्यक्त्वा स्वरूपं लभते। मूढ एव कुबेरो लुब्धः कामी च भवति।।३१।। जाग्रतामिति।। योमो
हः जाग्रतां सावधानानामपि निद्रा अविवेकरूपं निश्चितम्।। तथापि यः परपतां भ्रान्ता चक्षुषज्ञानवतामपि अन्धता
वस्तुराच्छादनात्।। दृष्टव्यदर्शनाभावरूपं संसारसमुद्रस्य ग्रहणं।। संसारस्यानित्यदुःखस्वरूपतां जानतामपि
तत्परित्यागहेतुत्वाद्ज्ञानरूपमित्यर्थः तथापि श्रुते वेदशास्त्राधिगमेऽप्यपि मूढत्वेन ज्ञेया ज्ञानरूपं जाड्यं विधि
निषेधाद्यनिर्णयरूपमित्यर्थः।। तथापि यः प्रकाशो मोरा नैयमवा कुषाया। लोके सत्यपि द्रष्टव्यघटपदाच्छादनरूप
तयांधकाररूपः प्रकटेप्यर्थप्रतीतिप्रतिबंधक इत्यर्थः।।३२।। ऊर्विति।। तमोगुणयुक्ता श्री। श्रितमो गुणेन संहारके
नरुद्रेण हरेण प्राप्तकालतया प्राक् हतं यत्स्मं कुरुसैन्यं पश्चादश्विनाशायत्त स्तुनद्रवमयी हत मित्यभिमानेन
लज्जाय थाना प।। अन्येन हतस्य पश्चात्त्वेन हनने नैव हि लज्जायुक्ता सा तु कामस्य न तु तामित्यर्थः।। मूढ एव काम
परवशो भवतीत्यर्थः।। ईश्वरः प्राक् कुरुसैन्यं शूलेन हंति पश्चाद्द्रौणिरन्ते मुनरत्ति द्रोणपर्वकथा।।३३।। ऊलूकेति।। अमीका
मादयः कतिपयैर्दिवैरिंद्रादिभिः प्राच्यः सर्वज्ञात्वपरिचयात् प्रदुतरां तस्मामाश्रित्य विज्ञिता विद्वद्भिर्निश्चिता देवता
नपि कामादाय त्वं यत्प्राचीनः परिचय।। अन्ये तदुपजीविनो बोधादयः केवलविशेषेण न ज्ञाताः। यत आ

चूडां शिखामणिवाप्यमर्यादीकृत्य चाएनसापापरूपेणकंचुकेनमेचकाः श्यामवर्णाः ॥ यो हि नीलवस्त्रादिना आच्छा
दितः स विशेषतो न लक्ष्यते श्यामत्वान्न बुध्यत इत्यर्थः ॥२५॥ तत्रेति ॥ उद्धूर्णेत्यक्तमर्यादे। अलंघ्येऽस्मिन्समुद्रइवातिगंभीरे
तत्र तस्मिन् कलिसैन्ये अभ्यर्णे सामीप्यं उपेयुषि सामीप्यं गते सति देवाः कस्यापि पुस्तकस्थितां कारस्य वाचां कस्यक
र्णिकर्द्गान्ववर्णनि श्राकर्णयामासुः। अभ्यर्णं अत्रेस्मा विदूरं इति नैद्गा ॥२६॥ तामेव वर्णनाहा ॥ ग्रावेति ॥ ग्रीवोन्मज्जन
वत्सर्वावीणाः प्लवंत इति श्रुतिप्रतिपादितपाषाणतरणवत् ज्योतिष्टोमादियज्ञानां साध्ये स्वर्गादौ फले पि ज्योतिष्टोमेन स्वर्ग
का ॥ मोयजेतित्यादिश्रुतीनां सत्यता यथार्थता ॥ ग्रीवोन्मज्जनवाक्यस्य प्रत्यक्षबाधितत्वाद्यागानंतरमेव स्वर्गादेर
दृष्टत्वाज्ज्योतिष्टोमादियागप्रतिपादिकाश्रुतिरपि प्रत्यक्षबाधिता ॥ तथा च यागश्रुतिरपि प्रत्यक्षबाधिता ॥ तथा
च यागश्रुतिरप्रमाणं प्रत्यक्षविरुद्धत्वात् ग्रीवोन्मज्जनश्रुतिवदिति प्रयोगात् यागश्रुतेरपि स्वर्गादौ सत्यतेति वा
च्येयं ॥ अत्र विरुद्धलक्षणया सत्यतेत्यसत्यतेत्यर्थः ॥ एवमन्येषामपि वेदवाक्यानां श्रुतित्वाविशेषात् प्रमाणत्वे हे
धीहरा बुद्धिमंतो देवाः तत्र फले श्रुतेर्युष्माकं का श्रद्धा कथमास्तिक्यं ॥ अपि त्वप्रामाणिकेऽर्थे श्रद्धानकार्याप्यत्र
नकारणेन यद्वशात् वेदोक्तविध्यातिक्रमणक्रियाकामाधाय यदृच्छाचारमार्गः खिलीकृतो बहुस्य क इत्यर्थः ॥ श्र

त्र

नै०टी०७

तिमात्रस्याप्रमाण्याद्वाघट्टेयजमानत्विजांकतिचिदहानियद्धस्तुचर्यंतदप्प्रामाणिकत्वात्यजंते तिना
व॥धीष्ठाद्वाइत्युपहासेश्रुतिमूरवीनवंतइत्यर्थः॥३॥केनेति॥किनातज्ञातनाम्नाबोधिसत्वेनातिप्राज्ञेनजि
नन्नष्टारकेनवेदस्यमर्मन्नेदायरहस्यंगायज्ञात्प्रमुत्पन्नंवेदमर्मन्नेदः कर्तुमारब्धइतियावत्॥कथमत्राह
॥यद्यस्मात्सत्वेनहेतुनासत्वस्वरूपेणलिंगेनयत्सत्तत्क्षणिकंयथापदइत्यादिरूपेणजगदस्थिरंक्ष
णिकंजगदेवत्त्वपादि॥सत्वलिंगेनविश्वस्यक्षणिकत्वसिद्धावुभयलोकगतंस्थिरमेककर्तारमधिक
रणमाश्रित्यवेदैर्विहितानांविधिनिषेधानांनिराश्रयतयावेदस्याप्रामाण्यापादनाद्वेदमर्मन्नेदः॥त
र्थः॥बौद्धसिद्धांतस्तुयथांतराद्धाधर्म्यविस्तरस्यापाद्वनोक्तःत्र्यचक्राः सर्वस्माद्भिन्नः चार्वाकिएवबा
ह्यमतंवेदाप्रामाण्यंबौद्धसंवादेनद्दृढयतिकेनेति॥सत्वेनहेतुनायस्माज्जगदस्थिरंजगदितस्मात्के
नापिलोकोत्तरप्राज्ञेनतेनैवचार्वाकेनवेदमर्मन्नेदायबोधेनजातं॥तदीयमतांगीकरणात्॥तद्रूपेणै
वजातमित्यर्थः॥यगादितिपाठेयद्बोधिसत्वंजगदस्थिरंजगदितिव्याख्येयं॥क्षणिकत्वेसिद्धेयेनपापंकृतं
सनष्टएवेतिकिमितिपापाद्भयमित्यादिप्रकरणंज्ञेयं॥श्वा॥त्रयीति॥नित्यंकाम्यंवसायंप्रातर्हेमिरूपै

८

अग्निहोत्राख्यंकर्मत्रयीचर्मेत्रंमीमांसावेदत्रयसंबंधिवाप्यत्तंत्रंवेदविहितोन्योपिकर्मकलापः।तथा
त्रयोदंडायस्वतंत्रास्तुपतत्रतं।।तथानस्मनःपुंड्रकस्तिलकोयत्रैवविध्वंशोवादिव्रतमेतत्।।सर्वंप्रज्ञाय
बुद्धिःपौरुषेणसामर्थ्यंनतीदृशायाप्रज्ञयानिस्वमानांहीनानांप्रज्ञयापौरुषेणचवाहीनानांचवचनेनचोर्यएतच्च
ब्लाह्यग्रहीतुमसमर्थानांपुरुषानांजीविकाजीवनोपायःतद्द्वेषधारणाधर्मेणद्रव्यमर्जयितुमेवनतु
तात्विकोधर्मः।परलोकसाधनमिववेदप्रामाण्यवादिनांभवतीदृशीतिजीबृहस्पतिर्जल्पतिवदति।वाक्या
र्थःकर्म।।तदुक्तंतेनैवअग्निहोत्रंत्रयोवेदास्त्रिदंडंभस्मगुंठनंबुद्धिपौरुषहीनानांजीविकेति।तस्मा
दग्निहोत्रादिप्रमाणमेवेतिनावःजीविकेतिधात्वर्थनिर्देशोएवमुल।।२५।।इदानींब्राह्मणादिजातिध
र्मानसहमानोजातिदूषयति।।शुद्धिरिति।।विशुद्धमातापितृजत्वंहिब्राह्मणादेर्लक्षणं।मातृशुद्धिंदुर्नि
रूपा।यद्यस्मात्पित्रोर्मातापित्रोर्यापितरोमातामहपितामहौमातामहीपितामह्यौचतयोरेकत्रा.प्रत्येकं
वंशाद्द्वयीशुद्धौसत्यांएवंतयोरपिपितृपितॄमातृपितामह्यादिमातामहमातुःपितामहादिमातामही
मातुःपितामह्यादिशुद्धौसत्यांएवंब्राह्मणंयावत्प्रत्येकंवंशद्वयीशुद्धौसत्यांशुद्धिःपरीक्षणीया।।तत्तस्मादं

नो ५

नै०टी०२७

तत्कुलाएवम परिमितवंश्यास्तेदाऽतएवदोषादुर्विज्ञेयस्त्रुद्धिसंततानस्त्रीपुंसनिपातं पर्यंतयाशुद्धेः संदेहादिदं च चंद्रा-
दीनामहल्यादीनां च पुराणप्रामाण्येन व्यभिचारदर्शनात् स्त्रीष्वनिश्चयाच्च जातिसंकररूपाद्दोषात्का जातिरदो-
षास्ति अपितु न कापि। यदाहुः। अप्येतु मंत्रास्तानाश्नीयास्संयतैः स्वजनै रपि। कोहि जानाति किं कस्य प्रच्छन्नं
पातकं नवेदीति॥ तथा अनादाविह संसारे दुर्वारे मकरध्वजे। कुले च कामिनीमूले का जातिपरिकल्पनेति॥ तस्मा
त्संकीर्णयोनित्वात्सर्वा अपि जातयो दुष्टा एवेति जातिधर्मान्विहाय स्वेच्छाचारं कुरुतेत्यभिप्रायः। यद्वा तस्मा

ना९

दाब्राह्मणेभ्यो नंतानां कुलानाम् दोषाद्दोषाभावाद्व्यभिचारादिदोषरहिता जातिः स्यात्सा कास्य पितुर्न का
पि पूर्वपूर्वपित्रादिव्यभिचारादिदोषात्सर्वापि जातिर्दुष्टैवेति व्यवस्था॥ यद्वा तदेति च पाठः सम्यक्। तयोः पित्रो
रनंतकुलानां दोषाभावेन कृत्वाऽदोषा जातिरस्ति अपितु महति कुले कस्यापि दोषसंभवात्सर्वापि जाति
र्दुष्टैवेत्यर्थ इति वा व्याख्या॥ यच्छब्दसामर्थ्यात् किंछब्दाध्याहारः एकशब्दः संख्यैकवचनादिति शास्त्र॥ ५७॥ अन्यद
प्याह॥ कामिनीति॥ यस्मात्कामश्चाष्टगुणः स्मृता इति वचनात्स्त्रीणां पुरुषापेक्षया अष्टगुणकामानां का
मिनीनां नानाजातीयानां वर्गः संघस्तस्य संसर्गैः योनिः संबंधैः कृत्वा कः पुरुषः संक्रांत प्रविष्टपातकं य

५

स्यैवंविधो नापि तु संवत्सरात्तु पततीति इत्याशास्त्राकृतपातकः स्त्रीसंसर्गस्तत्सेवी पि प्रा॰ ल्लीसंक्रांतपातक एव तत्
स्मात्कामयते कामः फलं तेन कामेन रहितं एकादश्यामुपवासादिव्रतं नियमो यस्य मदनेन हत्वा क्षीणं निःफलं व्र-
तं यस्य वा तज्जगत्सेवी पि लोकमोहात्स्त्रियारानावात वृथैति यावत् तस्मात् इति निश्चुंके एकादश्यादौ हव्यैव बस्नाति
तीर्थादौ। हा कष्टं स्वयं स्त्रीचित्तेपि स्त्रीव्यभिचारादिदोषसंसर्गात्क्षीणं शुचित्वेपि दुष्टसंसर्गस्तिर्वर्षांपातकित्वा
दुपवासादि वृथैवकरोति॥ केवलं प्रयास एव तत्स्य जनवतीत्यर्थः। तस्मात्त्वेच्छाचार एव कार्य इति भावः। बा
चकिमते विधिनिषेधाभावान्नैष दोष इत्यर्थः॥ तेषां सदोषत्वाज्ज्ञानिरपि सर्वसिद्दोषैर्वेष्टमुक्तैर्वैनवति। अभि
लाषेण हत्वान् नष्टं व्रतं यस्य एकादश्यां तो जना निलाषेसत्यपि निश्चुंके। अभिलाषेसत्येवामावास्यादौ स्त्री निवृ
त्तिः स्त्रानिवृत्ता यदि तौ तत्सर्वं वृथैव। कामोपहतत्वादित्यर्थः। बहिः शोषयंतं तरशुद्धो क्षामन्त्रायोम॥४२॥ ईर्ष्य
यति॥ ईर्ष्ययासहनत्वमात्रेण हेतुना नारी रक्षिता तस्याः स्वां परपुरुषदर्शनमपि कर्तुमप्रयच्छतं। कुलस्थितिर्व्रा
ह्मण्यादि जातिरसौ कार्येनावस्थानं तद्रूपेण दर्शनेन चरंतिये नान्यपुरुषान् स्त्री रक्षणे एव कुलस्थितिं मन्यमाना
नधिकृते निंद्यः॥ निंद्यत्वे दांभिकत्वमेव हेतुः किं नतान् स्त्रियः पुरुषान् विवेकस्यापतः अतः स्मरांधत्व

नै०टी०२७

स्याविशेषेसाधारण्येपसत्यपि तथा नारीवन्निर्वेशेन नरं प्रत्यस्मरकृतः परदारसंज्ञोगादनिर्वारयतः। न हि जाति
संकरो नारीणामेवव्यभिचारेणायतस्तएव रक्षणीया। किंतु पुरुषाणामपि व्यभिचारेण। यदि रक्षणीयंतर्हि
द्वयमपि नचैवं क्रियते तस्मादन्यतरस्यैव रक्षणे जातिकेसं रस्यनादकस्ठात्कुलस्थितिस्वभावान्नारीमात्ररक्षणेन
षां दंत्र एवेत्यर्थः॥ तस्मादीर्ष्यालिप्तकानरस्य वेश्यादाविवस्त्रीणामपि नवांतरे प्रवृत्तिप्रतिषेधं मा कुरु इत्यपि
वः॥ ईर्ष्ययैव तन्ने नेर्ष्यैवात्र हेतुर्नतु धर्म इति सूचितं॥ अथ च स्मरांधत्वा विशेषेपि नारी रहतोऽनेकपतिरप्यः किं
त्वेकमेव तस्याः कुर्वतो नरं तु स्त्रीवद्रक्षतः। स्त्रियाय थाएकएव पतिस्तथा नरस्यैकैव स्त्री तिन किंतु बह्वः
कुर्वीत तस्मादपि निंद्यास्ता॥ अत्रापि ईर्ष्यैव हेतुः॥ धर्म॥ परेति॥ परदारेष्योपानित्तित्वनिस्ताः सादरं न द्रष्टव्याः
किंपुनः स्प्रष्टव्या इति एतदर्थप्रतिपादकं शास्त्रं सोयं परवंचनरूपो दंभोऽहल्यया गौतमस्त्रिया सह केलिं
कामक्रीडां तत्र लोलेन तत्परेण इंद्रेणालिपाशिनेंद्रेण यमात्मनैव आदृतं उपेक्षितं॥ परदारगमनप्रायश्चित्त
विप्नोगाप्येतेन दूषितः अन्यं प्रतितन्नकार्यमिति उपदिष्टं तिस्वयं तदेवकुर्वीत। तत्पुपहासोपि सूचितः॥ अत्र
हल्यासंभोगलंपटइंद्रएवादांभिकोन्ये परदारपराङ्मुखाः सर्वेपि दांभिकाएवे तिभावः॥ वज्रहस्तत्वात्सर

ते

दारमन्वनिंद्रत्वात्॥ तस्माद्दियं शास्त्रीयनिषेधो न भवति किं त्वयं लोकवादं एव न वेत्यपि॥ धर्मशास्त्रमन्यद्बाह॥ गुर्विति॥ गो द्विजाः
स्वयं गुरुमल्पगतौ पित्रादिनायसिंधोगविषये पापकल्पनो ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः महापातकिन इत्या
दिवचनानुरोधेन महापातकसंभावनोत्पजनाय स्मात्त्वयेषां वो युष्मादृशं प्रत्युः स्वामिनो द्विजस्य चंद्रस्य देवानां गुरोर्बृ
हादिपाठयितुर्बृहस्पतेर्दाराः तारा तेषां गृहे संयोगे अस्तु च्वैरतितरां गृहो ऽपि निवेद्यः॥ श्रूयत इति शेषः॥ वेदादिपाठ
त५ नाबृहस्पतेर्देवगुरुत्वं। तस्मात्तद्भार्यागमने चंद्रस्य दोषलेशोऽपि न तत्सिवकाः पूयमपि गुरुतल्पगमनं कामं कृतेति
नावनीयथा अंकुरादिधर्मिणि धर्मिष्ठाः पापे पापाः समे समाः॥ राजानमनुवर्तंते यथा राजा तथा प्रजा इति॥ अयमप्यु
पहासः॥ गुरुराह् छले नैवमुक्तं॥ महतीति पाठे तत्त्वं वः॥ अथ स्वतेजः समूहे गुरुतल्पगमनेपि प्रत्सह मुदे त्वे वनतु
पतित इत्यर्थः॥ इंद्रादि निकृष्टवाल्मी॥ कि प्रमुखा द्विजास्तिष्ठंति स्तेषां संबोधनं॥४७॥ पुण्ये वै पुण्ये न कर्मणा पाप
पापेनेत्यादिश्रुतिं दूषयति॥ पापादिति॥ परागतात्रसबोयस्यस्पृहं तस्येत्यर्थः॥ तस्य प्रापणिनः इहकृता निषिद्धाचरण
जात्पापाद्धेतुदुःखानि उत्पादिह कृताद्विहिताचरणाद्धर्मान्निदुःसुखानि संभवंति इति श्रुतिः आह॥ सा दात्सत्य
ण्डुतंत्री॥ प्रवैपत्यं दृष्टपत इति शेषः॥ प्रयाणदेशात मार्ग स्नानं कुर्वतो नवदतिमतस्तु कृतकारिणः पुरुषस्य

नै०टी०१७

तदानीमेव दुःखं भवति॥ न च दत्तात्रिमितपरदारसंगमादिपापकारिणस्तदानीमेव सुखं भवतीति वैपरीत्यं अनु
भूयते॥ अथ चैवं स्यादिति श्रवणमात्रं न तु किं वित्प्रमाणं किं च मृतस्य किं वा भविष्यतीति को वेद। जीवतस्तु वैपरी
त्यमनुभूयते॥ तत्रास्माकं श्रुतिप्रत्यक्षयोर्विषये भूयोबलाबले स्वयमेव व्याख्यातं कथयत। न चैवं तत एव विचारयेत्विति
चेत्। प्रमाणयोः परस्परविरोधे सबलत्वेन दुर्बलत्वेन च व्यवस्था क्रियते। तत्र च यथा प्रत्यक्षानुमानविरोधे प्र
त्यक्षं बलीयः तथा श्रुतिप्रत्यक्षविरोधे प्रत्यक्षमेव बली। यद् इति निश्चित्य पापात्सुखमनुभूत इति पापं सर्वैः का
र्यमिति चार्वाकाः॥४५॥ संदिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैरित्यादि प्रतिबंधाद्दूषयति। संदेह इति। तत्र तत्रत्य
त्रिचरितत्वाच्छ्रुतिप्रामाण्यानिश्चयात्पापं न कार्यं जन्मांतरे भिरय्यादिदुःखजन्यादित्येके वदंति। अन्ये चयेन ते
मतुदेन्यदेह प्राप्तिस्तस्य स्यादित्यत्र का प्रत्याशेति वादिविप्रतिपत्तेश्चान्यदेहस्य देहांतरप्राप्तेः संदेहे सत्य
पि पापाद्धि कोऽपि दोषः परिहर्तव्य इति न्यायेन यदि देहांतरं स्यात्तर्हि पापफलं दुःखमनुभूयेतेति बुद्ध्या यदि
तेन पापं वर्ज्यं सर्वथा न कार्यं तर्हि हे श्रोत्रियाः शुद्धोध्यायिनो वसिष्ठादयः। स्वयं सत्रं अनेककर्तृकं यागं तन्न त
मिवं त्यक्तं॥ कुतः पशुहिंसायाः संबंधिनो दोषस्य संशयात्सर्वदेहांतरा न हिंस्यात् अहिंसा परमो धर्म इति श्रु

त्यादि।

११

तिस्मृतिवशाद्यागेपिहिंसा न कार्येत्येके॥ विधिवलादशांकितपापोत्पत्तिः सा कार्यैवेत्यन्ये॥ इति संदेहे यागीय
पशुहिंसा चेत्पापहेतुः स्यात्तदानेष्टप्राप्तिः किं त्वनेष्टमेव स्यादिति पाक्षिकोपि दोषः परिहरणीयः॥ इत्यनेनैवन्यायेन
यागमपित्यजत एवैदैवं पापमपिकुरुतेति नाव॥ संश्रयादिति पाठे संबंधादित्यर्थः॥ कलुषं वृजिनेत्यमरः॥४ धीता
त्मेवाश्रुतं बुद्धैरित्यपि सव्यभिचारमाह॥ यइति॥ यस्त्रिवेदी विदो वेदत्रयवेदिनां वो युष्माकं वंधः नमस्कर
णीयः सव्यासोपीति नारदादीञ्जल्पोक्तवान्॥ इति किं जातकामायाः कामार्त्तायाः रिरंसोः रामायाः अज्ञात
कुलशीलाया अपि रमण्याः हस्तधारणाया लिंगग्रहणं अंगीकरणं च प्रशस्तायुक्तैव। न केवलं वाल्मीकिः किं किं
तु व्यासोपीत्यपि विज्ञाह्यार्थः॥ तद्वचनं नवद्भिः सम्पत्वादंगीकर्त्तव्यमित्यपि मन्यते। स्मरार्त्तां विकलां दीनां यो न
कामयते स्त्रियं। ब्रह्महा स तु विज्ञेयो व्यासो वचनमब्रवीदित्याद्यर्जुनं प्रति॥ तीर्थयात्रावसरे उर्वश्यपादिभिः प्रसंगे च न
रतादौ॥ रामायणे च॥ सूर्पणखा युक्तो प्रसिद्धः॥ ततश्च पापं वर्ज्यं कार्यमित्यप्युच्यते उत्तर यथापि दोष इति ना
वः वेदविदामिति सत्पात्रानामिति षष्ठी॥४७॥ युक्त्यंतरेण सर्वांत्तमाह॥ सुरतइति॥ सुरते त्वां न्यायेण द्वौ वो
युष्माकं कथं केन हेतुना त्रपस्थातास्तिकता अपि त्वतुवित्तमेतत्॥ सान्वश्रुवा सुरतेकामिनीरति विषयेक

थंनकिमितिनअपितुतयातत्रभवितव्यमित्युक्तं॥यस्मात्पुरुषस्तत्कर्मव्यापारंकुर्यात्येनकर्मणाकृत्वात्रंते
कर्मविपाकएवसुखमेधते वर्द्धतेनइतेअनुभूयतेपुरुषेणेत्यर्थः॥जन्मांतरेअन्तादिजन्यंसुखंदिग्धं॥सुरत
जन्यंवसर्वस्यानुभवसाक्षिकंतस्माच्चांद्रायणादिसुकृतंतत्कासुरतमेवांगीकर्तव्यमितिभावः॥एतेनमामै
रष्टानिरकाव्यस्थैर्येणवयस्तामुषा॥प्राज्ञस्तत्कर्मकुर्वीतयेनांतेसुखमेधतइत्यादिविडंबितं॥दुरितेत्येतिपाठे
परदारगमनादावित्यर्थः॥परदारगमनाद्यनंतरमेवसुखंदृश्यतेयतः॥४८॥बलादिति॥नोद्विजाः॥यूयंपापानि
परस्त्रीगमनादीनिबलात्पुमतावसत्यामपिकृतंता॥तानिपापानिवःसंबंधीनिद्विजातान्यप्यकृतानिस्वेतुफ
लदायीनिमाभूवन्नित्यर्थः॥यतोमनुःबलेनकृतानिसर्वाणियन्व्यापारान्कृतानेवाब्रवीत्॥मनुवचनप्रा
माण्याद्बलात्पापंकृतेत्यर्थः॥४९॥स्वागमेति॥नोस्तीर्थिकाःसंप्रदायागतविद्या॥यूयंअस्मिन्पूर्वोक्त
मनुवचनरूपस्वीयागमप्रतिपाद्येर्थेप्रमेयेआत्मारामःस्यादितिविषयेवर्षिविचित्विकाःसंशयालवो॥मास्थ
नवषइदंकार्यंनवेतिसंशयःपरित्याज्यइत्यर्थः॥मनुनाकृत्याबाईद्रकथंप्रतिपादितमितितत्रयच्चाप्यना
दर— वामाभवत॥तर्हिकिंकार्यमित्यतआह॥यूयंयंयमानंदंपरदारगमनादिइच्छथतंतंस्वछंदंस्वेच्छया

निःसंशयमादरेणैव आदरणं॥ तन्मा राम इत्यादि॥ श्रुतिप्रामाण्यात् पूर्वोक्तस्मृतिप्रामाण्याच्च संशयं परित्यज्यादरे
णैव हृच्छयासुखं समुपैतु दुःखमिति भावः॥ अस्मदाद्यागमेभ्यः परनिन्दादिपरास्तथापि स्वागमे निंदानयुक्तेत्यपि नास्त्येचि
तं॥ मानि रत्नबंधकस्तन्नेतोन लुङः॥ तीर्थनागमे नवरतिठक्। स्तदुपाध्यायो वातीर्थं तस्मादस्त्येर्थे ठञ्॥ ५०॥ पूर्वोक्तश्रुतिस्मृ
तीनामर्थमज्ञात्वा वेयक्तमुक्तं व्याख्यानमप्रमाणमित्याशंक्याह॥ श्रुतीति॥ श्रुतिस्मृत्यर्थबोधेषु महाधियामप्येकम
त्यमविसंवादः॥ कात्स्न्यपि तु सर्वत्रापि विसंवाद एव॥ बुद्धिबलेन परस्परविजयात्॥ एवं सति व्याख्यापदार्थवाक्यार्थ
निरूपणं बुद्धिबलं प्रज्ञाबलमपेक्षते॥ एवं च सति॥ यस्य यथा स्फुरति स तथा व्याख्याति॥ अत एवाद्वैतवादिनः श्रुतीरभे
दपरत्वेन द्वैतवादिनस्तु भेदपरत्वेन व्याचक्षते॥ तद्व्याख्यासु खोल्लुखी अनायाससाध्यं क्लिष्टं वा यत् सुखप्र
दं स्यादिति नो पेक्षानानादरेण यासैवांगीकार्येत्यर्थः॥ श्रुतिस्मृतीनामस्मद्व्याख्यात एवार्थोंगीकार्यः॥ स्वेच्छाचारमे
व कुरुतेति भावः॥ एकास्मानाः विसंवादिनी मतिश्चातुर्वर्ण्यादित्वात्वेऽर्थे ष्यञ्॥ ५१॥ त्वन्मतांगीकारे निरयादि
प्राप्तिः स्यादित्यत आह॥ यस्मिन्निति॥ यस्मिन् देहे अहमस्मीति धीः गौरः कृशः इत्याद्याकारप्रत्ययः॥ तस्य शरीर
स्य देहस्य मतिवायुभाक्रमेण स पापेन किं अपि तु पापे निरयपातादि किंचिदपि न कार्यं॥ अयमाशयः देह एवात्मा दे

नै०टी०१७

ह्यतिरिक्तो वा॥ यथाद्यः कल्पस्तर्हि यत्तद्देहेन यापं कृतं तस्य विनष्टत्वाद्देहात्मवादिनां वः पापेन किं कर्तुं शक्यते अपि तु
न किंचिदित्यर्थः॥ अथ देहातिरिक्त एव देहे विनष्टेपि देहांतरे देशांतरे कालांतरे स्वकृतपापफलानां भोक्तास्ति। त
त्राप्येवं वक्तव्यं॥ स किं स्वसाक्षिको वा॥ नाद्यः। अहंप्रत्ययस्य देहविषयत्वेनैवासिद्धत्वाद्देहातिरिक्तालंबनकल्पनान
वकाशात्॥ ततश्च तद्देहे वः किमेनसेति न दैवतुनरायातं॥ द्वितीयं दूषयति। परो वेदादिः साक्षी यस्य तस्मिन्देहांतरे
क देशांतरे कालांतरे स्वफलभोक्तरि देहातिरिक्ते वेदप्रतिपादिते आत्मनि तस्य पापस्य निरयादिफलत्वे तस्य केव
लस्य भोक्ता तद्दुःखिते हेतोरात्मत्वाविशेषाद्यज्ञदत्तेनापि द्वितीयावत्तस्मात् काप्यात्मांतरेपि तत् किं न स्यादपि तु
भवितव्यमेव॥ तेन देहेन यात्मकेन कृतं तदतिरिक्तेनात्मना चेत्फलं भोक्तव्यं तर्हि देवदत्तेन पापे कृते आत्मत्वावि
शेषाद्यज्ञदत्तेनापि तत्फलस्य भोक्तव्यमित्यप्यापद्यते॥ किंच पापफलदुःखानुभवालंबनस्य देहस्य नाशितत्वा
त्तत्फलं देहव्यतिरिक्ते परप्रत्ययवेद्ये आत्मनि चेदुक्तं तथापि न दोषः। दुःखं ह्युपभुज्यमानं प्रतिकूलं न वेत्ति उपभो
क्ता वाहं कार्स्यस्य संदेहो विनष्टः। आत्मा तु न भोक्तेति फलसंबंधेति न दोषः॥ ततश्च पापकारिणो देहस्य विनष्ट

१३

त्वान्मृत्योरेव चापवर्गत्वो न कश्चित्फलभोक्तेति स्वेच्छाचारमेव कुरुतेति भावः॥ यद्वा परस्यात्मा साक्षी च परसाक्षी एव

परसाक्षिकं आत्मेति आत्मा लक्षणे परे देहातिरिक्ते साक्षिणि तत्स्थ एव तत्फलं तर्हि कापि जन्मांतरीयपाषाणादौ यज्ञ
दत्तादौ वा तत्फलं किं न स्यात् अपि तु स्यादेव अन्यत्वाविशेषात् ॥ तस्माद्देहातिरिक्त आत्मा नास्त्येव देहे च नष्टे कस्य पाप
फलं स्यादिति भावः ॥ यद्वा क्वापि जन्मांतरीय देहांतरे आत्मास्तीति पापफलं चेत् स्यात्तर्हि परो दत्ताद्यात्मा साक्षी यस्य
तस्मिन्नात्मांतराधिष्ठिते देवदत्तादिदेहस्य साक्षिण्यात्मनि किं न स्यादपि तु विशेषात्स्यादेवेति अलमतिप्रसंगेन ॥ पु
नरपि देहातिरिक्तात्मवादिनामुपहसति ॥ मृत इति ॥ गतप्राणेन ह्यस्मारित्वा निरन्वयध्वस्तस्त्वकृतनवसंस्कारो ध्व
स्तोपि प्राणी सर्वजन्मानि अनेकजन्म तत्कर्मजात्यादीनि सर्वमहं ब्राह्मणोऽभवमित्यादि स्मरति ॥ मृते च कर्मणां सुकृत
दुष्कृतरूपाणि फलानि सुखदुःखरूपाणि तेषां मूर्खः परंपरा लोगा वाल्पवंति ॥ तदधिकरणत्वेन तत्सर्वं ॥ तथान्येषां
ब्राह्मणानां तु कैर्जैनैः कृत्वा मृते ध्वस्ते देहे प्रेतत्वे तृप्तिर्भवतीति भक्तानां परवेव वचनमात्रेण स्वोपजीविनां वा वि
याऽप्रमाणिकेन वाक्यमात्रेण लंपानकार्येत्यर्थः सर्वमप्येतद्व्याधिकरणत्वादनुपपन्नं ॥ स्वभोजनादिलाभाय प
रं प्रतारयंति ॥ तस्माद्देह एवात्मेति भावः ॥ अन्येषां तु क्तानां समासः ॥ ५० ॥ देहातिरिक्तात्मप्रतिपादिकां श्रुतिम
प्युपहसति ॥ जनेनेति ॥ अति सत्यामि नरो परवचनपरयात तत्त्वमसीति सर्वा एषमहान्निज आत्मेत्यादि श्रुतिः प्रयोजन

नै॰टी॰१७

ककर्त्र्यकायमस्मीति अहंप्रत्ययविषयं जानतां स्थूलोहं कृशोहमित्याद्यहंप्रत्ययविषयो देह एव न तु तदतिरि-
क्तः कश्चिदिति देहमेवात्मानं जानता जनेन न श्रयोऽन्येनायमस्मीति प्रत्ययविषयत्वेनानुभवसि । तेनासौ देहस्त्याज्यते अ-
हंप्रत्ययविषयत्वेनेति शेषः । लोकेन देहोऽहंप्रत्ययविषयत्वेन न त्यज्यते । अतः पातुं तेन त्याज्यत इत्यर्थः । अन्यच्चानुभ-
वविरुद्धं दृष्टं तयावेदकमशक्यमप्रामाणिकं अहंप्रत्ययविषयमात्मलक्षणं ॥ वस्तुयाघ्यते अंगीकार्यते अहो आश्चर्यं
कष्टं वा । महदनुचितमेतदित्यर्थः ॥ देहेऽप्यात्मत्वाभावे परित्यज्य तदन्निस्मिन्नात्मनि नित्यत्वोऽस्टहीत्वादीन्द्रान्तपरादिमि
देहं कर्षयतादिति शिक्षात्मवेदनं कैवीतिश्चात्यालोकउपदिष्टपत इत्यर्थः । विप्रलंभकवाक्यत्वेन श्रुतिमात्रमप्रमा-
णमित्यर्थः ॥ अन्योपि धूर्त्तैः अन्योऽरत्नादित्याजयति कावादिश्यहयति ॥ कर्ष्टद्वयस्याप्यनभिहितत्वादुक्तमत्र तृतीया ॥
५४ ॥ नबुध्ने इत्या पुत्रस्यप्रत्यक्षोपलंभात् अन्योऽतिष्ठामादेरपि फलस्यानुमानात् केतिमात्रस्यप्रमाणएपकथं धूर्त्तत्वमि-
त्याशंक्य दूषयति ॥ एकमिति ॥ नवनान्नवनास्यां संदिग्धयोरर्थयोः । पुत्रादिलाभस्वर्गलाभयोर्मध्ये एकमिष्टं मनिष्टं वा
तावन्निश्चितं नापि न विप्यति ॥ तत्र तयोर्मध्ये तथास्तिवाइष्टस्य पुत्रादिजन्मनि लाभे सति विटाः धूर्त्ताः परवंचनच-
तुराः स्वमंत्रादीन् हेतुं कारणं ख्यापयंति ॥ अस्माभिः रुद्रजपादि तदर्थं कृतं तेन तव या पुत्रादिलब्धमिति वदंतीत्य-

५४

र्थः॥ अन्यथा पुत्राद्यलब्धिवत्तानेव मंत्रादीन् सांगानंगविकलयाँतयाफलस्यासाधकान् अप्रवीन पुत्रवियोगादिवि
परीतफलकारिणश्चाकः॥ सामग्रीसाकल्याभावाद्यथाऽकृतदक्षिणाऽभावात्फलं नजातं विपरीतंवजातमिति चूर्णः
परान्वंचयतीत्यर्थः॥ तस्माद्दृष्टपुत्रेष्ट्यादिदृष्टांतेनादृष्टफलेष्वपिफलकल्पनानिरवकाशेतिश्रुतिरप्रमाणमेवेति
भावः॥ ५५॥ श्रुतिप्रामाण्यमभ्युपगमवादेनांगीकृत्यापि एकात्मवादिमतमनिष्टापत्त्यादूषयति॥ एकस्येति॥ द्विषे
ष्टां सर्वेषां परदारागमनादिजनितेन पापेन हेतुनाऽनंतेऽन्वयेत्पापे निरयादिदुःखे निमज्जति। अत्र तु न दुःखमस्तु न
वेत्। सतस्सौतस्य एकमेवाद्वितीयं ब्रह्मणेहनानास्तिकिंचनेत्यादिश्रुतिसिद्धस्यैकस्याद्वितीयस्यात्मनः हेमीये
यमाश्रयत्वीहेतिन्तयैवकस्यदुरितेन कोपमारोगौरवं स्यादपितुसर्वलस्यचराकरस्यश्च्ये ऐवनकश्चित्स्वर्गोनेवत्॥ एका
त्मवादिमते प्रामाणिकस्यैकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसंबंधस्तदा तत्फलानंत्यान्निरयादिदुःखा
नुभवावस्थायामेकस्यैकपापे न कृत्वापापाद्यराशिर्भिन्नस्य न कोपिपारःस्यात्। किंचैनैर्यस्तु एवंकृतं तत्त्वयैव
कृतमिति पापिष्ठेनापि तद्वेषिणीति यथेष्टं पापं कुर्वित्यर्थः॥ अपिचात्मैक्यात्स्वपरस्वव हरिणपरदारत्वपर
स्वत्वाद्यभावात्परगमनादौ पापलेशस्याप्यभावात्स्वेच्छाचारमेव कुर्वित्यर्थः॥ नीरोगान्यायोपर्यालोचनया विनान्य

नै०टी०२७

श्रीलेस्तुपहासः॥ तस्मादिकामस्कृतिरुपासपराङ्मेयानन्तुताश्चिकीर्षितिभावः॥५६॥ देवपूजादिबुद्धिं निराकरोति॥
किमिति॥ जो देवपूजकष्टं तातमसर्वधनात्सकाम्। कृतं अवधितंचंपकादियुष्मंतस्माद्धेतो स्तेतवकिंप्रजेयो
जनं प्रस्तुतदोषएवेत्यर्थः॥ हि यस्माद्दःपुष्पं तन्मात्रे हृत्वाग्रहे तेवर्त्तमानमेव फलतिफलरूपेण परिणमतेन
तुतेन विना॥ पुष्पेच वितफलोत्पत्तिप्रतिबंधएवभवति नतत्वन्यत्फलमित्यर्थः॥ अथदेवपूजादेर्विनियोगात्त्माफ
ल्यमिति चेत्तत्तदप्पसत्॥ अश्मनः शालग्रामशिवलिंगादेः पाषाणस्यैव मूर्त्यैन्यासंयदिचेत्तत्तत्रन्यस्तेसत्फल
नविष्यतिइत्याशयः॥ हि अनन्यस्य शिलातो भिन्नस्यपाषाणस्यमूर्त्तिन्यसंनिषेधहि॥ अनन्यसेवेतिवा॥ न्यास्यमेवे
तिवा॥ किंचनवन्मनेनेदस्यप्रायं विकल्वात्परमेश्वरस्यसर्वत्रसत्वाच्छालग्रामादिस्त्वं किरमस्त्रैक्यादेवपूजपिष्ट
घटृष्टेतिस्वशिरस्येवपुष्पानि निक्षिपेत्युपहासइतिभावः॥ न्यासंहलंतत्वाएपत्॥५७॥ वैराग्यजनानार्थमन्यद
प्याह हृष्णेति॥ हि उरुषमुखेश्लेष्मागारंस्तनौमांसग्रंथीइत्यादिकं स्मनिवधूरूणैस्त्रीरूपेघृणावादान् तु
गुप्सावचनानि निःसारत्वेनदृष्टेणानीवविघ्नन्यसजायतस्त्ता हन्नास्यमांसादिमयस्यैवतवापि गर्हि तस्यापिस्त्रि
यार्जनप्रकारेण निंधाइतिचिरंजनवंचनालोकप्रतारणाकाङ्क्षापितुनकार्येतिभावः॥ स्त्रियोमुग्धविद्यारिएणप

२५

पमिरनाइतिनिंदावाक्यानि तवापि ब्रह्मचारिणो न युक्तं इति वा ॥५०॥ कुरु धर्ममिति ॥ हे अज्ञा मूर्खा ब्राह्मणा प्र
यंत्रेऽहल्याजारः सुरपतिः सूर्यात्मतनयां प्रजानाथो यास्तीदित्यादिस्मरणाद् ब्रह्मविष्णुमहेशादिभिरपि लंघितां
काम एव देवस्तस्य स्त्रीपारवश्यलक्षणमाज्ञां कुरु धर्म्यं यस्माद्वेदोपि श्रुतिस्मृती ममैवाज्ञे इति श्रीभगवद्वचना
देवकीयाज्ञा ॥ नत्त्वत्र वेदरूपायां देवाज्ञायां कामोऽज्ञातोऽधिकार्हेणाप्रज्ञामान्यता का ॥ पितृदेवत्वाविशेषा
द्वेदाज्ञेव कामाज्ञापि माननीयैवेत्यर्थः ॥ आज्ञाद्वयमतिसमानं तस्मात्कामदेवाज्ञामपि कुरु धर्म्यं ॥ नत्वेकत्र पक्ष

अ

पातः कार्य इति भावः ॥ यद्वा तत्र तयोराज्ञयोर्मध्येऽधिकार्हेणं किमिति यूयमेव कथयत यस्याः सा काज्ञा पितृसर्व
वेदविशेषाद्वे अपि समे एवेत्यर्थः ॥ द्वयोर्मध्ये धिकार्हेण किमिति यूयमेव कथयत ॥ ब्रह्मादिभिरप्यंगीकृतत्वाच्छि
ष्टपरिगृहीतत्वलक्षणप्रामाण्यात्प्रत्यक्षसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हेणा ॥ वेदो हि ब्रह्मादीनामेवा

२ कारी

ज्ञा ब्रह्मादयश्च कामदेवाज्ञाकारिणस्तात्पर्यं यदीयाज्ञा नवज्ञैरनुश्रीयते तैरपि यानुष्ठीयते सा भवतां सुतरा
मनुष्ठेयेति भाव इति वा ॥ पक्षपातात्तारतम्याज्ञानाच्च मूर्खत्वं ॥ वेदो हीति च पाठः ॥ कामदेवाज्ञामेव कुरु धर्म्यं यस्माद्वे
दोपि देवाज्ञा तत्र वेदाधिकाकामाज्ञापि तु कामदेवाज्ञैवानुष्ठेया ब्रह्मादिभिरप्यनुष्ठितत्वादिति वा ॥ का विगर्हणे

तिपाठेतत्रकामाज्ञायांकालिंदाकोनादरइत्यर्थः॥ देवकीयागहीदिग्जनपर्यायाः ऊक्तवेत्यत्र देवस्येतिववक्त्र
व्यमितिविवक्षव्याहः ऊक्तं च॥ पापा॥ श्लोकत्रयेण मीमांसकान्परिहसति॥ प्रलापमिति॥ महताप्रयासेन यस्य प्र
माणप्रमुपपादितं तस्य वेदस्यैव कंचनभागं मंत्रांसो रुद्री मदरोदी दित्यात्यर्थवादमंत्रनामधेयात्मकं प्रलापमि
वानर्थकास्य विधिनात्वेकवाक्यत्वादिसादिना सिद्धांतस्तत्रेण श्लाघ्यत्वप्रर्थत्वादिनार्थवादादेरुपयोगे सिद्धेऽपि
पिश्रुतिसार्थक्याभावादिनिराकृतत्वादर्थवादादिवेदभागमनर्थकवचनप्रायं जेन्मन्यध्वे॥ तर्हि बहुधनव्ययायास
साध्यत्वाद्दुःखजनकान् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादीन्विधिभागानपि केन भागप्राभावेन न तथा प्रलापरू
ते छध्यन्तां ऊक्तं तथापि तुतानपि प्रलापरूपान्येवस्वः ऊक्तं इत्यर्थः॥ सर्वोपि वेदो विधिरूपः प्रलापरूपो वास्तु
नत्वर्द्धजरतीयन्यायः समाश्रयितुं युक्त इति भावः॥ वेदत्वाविशेषेप्यन्नागमेववैषम्यहेतुरित्यर्थः॥ दुःख
शब्दस्य नपुंसकत्वेपि दुःखं करोतीति ण्यंतात्पचाद्यचि दुःखानिति ज्ञेयं॥ ६०॥ प्रकारांतरेणापि मीमांसकान्प
रिहसति॥ श्रुतमिति॥ हे मीमांसायां देवविचारे मांसलौ परिपुष्टा प्रज्ञा बुद्धिर्येषां हे श्रुतिवेदं प्रत्यर्द्धस्य दृन्ध्व
आदरेण स्वीकुरुध्वं अक्षरमात्रमपि सार्थकं मन्यध्वे॥ तथापि शिष्टाः वादिभिर्निराकृतात्वांस्तचित्ताः पूर्वमी

उसंधानविकल्पाःसंतस्तामिवश्रुतिंस्वरूपसंबंधिनंद्विपंदायिनींदापयंतीस्वयमात्मनैवांगीकृतप्रामाण्यात्
पिप्रच्छिषोकेनविद्वंस्येकेनखिलरूपांनिश्छिलांवभूथाय्वकार।पूर्वापरविरोधद्योतनार्थः॥पूर्वापरानुसंधान
विकल्पाइदंविचारचतुरासाधुलिखितांबुद्धिरिलुपहासार्थमीमांसेत्यादिसंबोधनं॥मांसलेत्यनेनस्थूल
दृष्टयःआपातग्राहिणोयूयंनतुकेऽस्यबुध्यध्वइतिवस्तुचितंरुत्विजःयज्ञमध्येयजमानंयज्ञसमापनाय
हस्तीलंममाप्युत्तरकालंनाविस्वाच्छंद्यं विदित्वाकार्यवत्तावेलायामेव॥स्वयंयूपेयूपेहस्तिनावध्नास्वितिश्रो
दयादित्येतत्प्रतिपादकानिवेदवाक्यानियजमानस्यश्रद्धाजननार्थमुपन्यस्यंते॥प्रत्यक्षश्रुतिविहितजदे
यांतरनिज दर्शनव्यामोहितस्ययजमानःश्रद्दधानतयातथैवप्रतिपद्यतेस्मःप्रयच्छति।तितेरेवैषास्मृति
प्रवर्तितास्यादित्यार्हांवचनेयंवेदमूलेतिलोकसर्वकर्मनिरुक्तमितिवेदवाक्यानामर्थवादत्वमंगीकरोति
ततश्चकानिविद्वाक्यानिप्रधानानिकानिविदप्रधानानीतिअर्धजरतीयन्यायस्तदवस्थएवेत्यर्थः॥यूपहस्ति
नोदानमाचरंतीतिस्मृतेर्मूलभूताश्रुतिरभिधीयतेकल्पितश्रुतिमूलत्वात्स्मृतिर्न्वेनोच्यते।यूपवदस्त्वा
द्विषायूपद्विषास्तान्दापयतीतिवाजपेयादौहिरण्मयदक्षाहस्तिनोरथांदास्यश्वदक्षिणाइत्युपलक्षणमेतदि

नै०टी०१७

तस्मा॥ इत्यो कोहीति॥ को हि तद्वेद यदमुष्मिँल्लोकेऽस्ति वा न वेति दिग्हस्ती काण्वाः करोति तत्प्रादिर्याः श्रुतिरमुष्मिँलो
केपरलोके विषयसुखादिकमस्ति वात्रास्त्येवेति वा हि निश्चितं को वेद अपि तु न कोपि इति आह ब्रवीति तस्याः
श्रुतेः प्रामाण्यात् अमुं लोकं परलोकं लोकः परीक्षको अस्मदादिः कथं वा कथमिव प्रत्येतु विश्वासेन निश्चि
नोतु अपि तु न कोपि॥ यदीयास्तित्वनास्तित्वयोः श्रुतेरेव संदेहः तत्प्रामाण्यात्तस्यामरोन्वा दृष्टय एव परलो
कं मन्यते न तु प्रामाणिकः कश्चिदिति भावः॥ इत्यास्मृतिप्रामाण्यमपि दूषयति॥ धर्मेति॥ बकुष्ठेन क्ष्यायाया
समाधत्वाछीतन्नयाद्वीर्थस्नानाद्यशक्यतया तथा तन्दिंद्रियवेगस्य परिहर्तुमशक्यत्वात्सुखतनुत्वमू
लत्वाद्ध्क्रमेणाशक्यं अर्जनं करणं वर्जनं त्वयोः तौ धर्माधर्मौ बुद्धिपूर्वं जल्पन्वकुधा प्रतिपादयन्मनु
मुख्यस्मृतिकर्ता ब्रह्मलुब्धः व्याजाधर्माधर्मोपदेष्टा कस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चि
त्तद्वारा मंडलस्य दुष्टलोकस्यापराधं निमित्तं त्ववदंडार्थी द्रव्यमपिलाङ्कुकोयत स्तस्मात् बुधैः पंडितंमन्यैः
सुधाहन्येथ वञ्चकुधा न यित्राद्धृतं ते धर्मा विशणां सुकरं एवं दुष्टधर्ममेव सर्वः करोति तन्न श्रेयेन केनाप्युपायेनार्थग्रह
णोपाय एव दंडो मनुना विहितो न तु धर्म इत्यर्थः॥ अबुधैरिति वा मनुक्वन मूलत्वात्स्मृतिमात्रस्याप्रमाण्युक्तौ

१७

॥ द्दश॥ व्यासस्येति॥ पुराणप्रामाण्यं दूषयति दाशदारिकाव्यभिचारजातस्य भ्रातृजायायां पुत्रोत्पादितुरित्यादि
शीलस्य व्यासस्यैव कवित्वरूपया गिरा तस्मिन्धर्मे परलोके व्याप्त एव वा श्रद्धाभावना आस्तिक्यबुद्धिः इत्येतस्मा
द्धेतोरस्माभिः शिथिलं तं श्रयंतां त्रिकायुक्तिरेवाक्यविचारचतुराः स्थ नवधर्मविरुद्धलक्षणया एवं विगीतेन व्यासेन प्र
तिपादिते न षधर्मे परलोके तस्मिन्नायि षामास्तिक्यबुद्धिस्ते श्रयंतं सर्वतमा इति भावः॥ अथ च तां त्रिका कविंदतुल्या
मूर्खः इत्यर्थः॥ व्यासस्येत्येकवचनेनैवकारेण विगीतत्वं सूचितं॥ तत्र परिशिष्टाभारतादीनां पुराणानां चोपहासं
कृतः॥ मत्स्यपुराणं तु मत्स्यरूपधारिणा श्रीविष्णुना मनवे प्रोक्तमिति तत्र ष्टपरगुपहसति॥ मत्स्यस्योपदेशपाश्चात्येषु
ध्मान्मनुस्मृतीनं को नाषतां॥ पुष्मानिः सहस्रं वारेकः करोतु यज्ञो मत्स्यानपि को नाषतां॥ मत्स्या अपि संवादाहि-
नो भवंति तदुपजीविनस्तु क्षिणा भवंत सुदूरे इति को नाषतां॥ पुष्मान्मत्वादी मत्स्यान्त्र को वादत्व पितु नको पिय
नो मत्स्यस्योपदेशपानरजलस्थलवारिणो हीनो यो मत्स्यस्तस्यापि शिष्यास्तन्निदेशकारिणः॥ तत्तस्योपदेशकापे
क्षयोपदेशस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः॥ एवं कूर्मपुराणादीनामुपहासः॥ अथ च मनुसंबं
धित्वेन सर्वपि मानवशब्दवाच्या यथा तथा मत्स्यसंबंधिनो मत्स्यशब्दाभिधेयत्वमेव युक्तं न तु मत्स्यशब्दाभिधेय

त्वमिति को मत्स्यान पित्रा षतामि तियुक्तमुक्तमिति व्याख्येयं। तत्रमधीते वेद वेत्यर्थे वमंतादिराद्य निगणत्वा वृकः
मात्मस्य क्रतानामिति कर्त्तरि षष्ठी॥ १४॥ पूर्वोक्तिमेव व्यासस्य प्रमाणत्वं श्लोकद्वयेनाह पंडित इति। पंडितो इति बुद्धि
मानत एव कविरोत्रे इ कस्यार्थस्य वर्णकः तथा पांडवानां युधिष्ठिराधीनां वा इति प्रियवचने पटुः एवंभूतः समर्थ द्विरा
सतमत्वेनांगीकृतो व्यासः। तेषु पांडवेषु दुर्योधनादौ निंदत्सु तत्सतुनानि निंदकिं तथा तेषु स्तुवत्सु स्वयमपि श्रीकृष्णादी
न स्तुवत्सु सत्सु तत्स्तुतवान् किं। तिष्ठनिं दत्सु स्वयमपि ननिं। दतेषु स्तुवत्सु स्वयमपि तुष्टावेति पूर्व विन्नाषण युक्तस्याभि
ज्ञासस्य पराधीनत्वाद्दनाश्रवत्वाच्चेनत्प्रणीतं भारतादिप्रमाणमिवेति भावः। अन्योपि पंडितः प्रभुचित्तानुकूलमेव व्यव
हरतितद्वद्यमपीत्यर्थः॥ १५॥ नेति॥ सत्यवदीपो व्यासोत्र तु विचित्रवीर्यस्य देव्यां महिष्यां कामात्स्मरपरव
शत्वाद्वस्तुरागरतं समासज्जत्संगतः॥ किलेति उपहासे श्रुतौ वा॥ अस्य तु धातावत्कामादिव संगतः॥ पौराणिकास्तु
दिवरात्सुतोत्पत्तेधर्मत्वात्तस्यां सुतोत्पादनार्थमात्रङ्गसस्त्वासक्त इति वदंति। तस्मात्तेयथातथास्त्विति त्यर्थः॥ तद
उक्तो त्पादनोपलक्षितैः कालिदासादि तत्रासीदिति यत्प्रसिद्धं तत्र दासी रतेपि मात्रासत्यवत्या देशात्रादि इष्टः॥ किं
कथयतेति प्रश्नकाकुरुपहासार्थः॥ अपितु तत्र तावन्नादिष्टस्तस्मादन्यत्रापि स्मरपरवशत्वादेव प्रवृत्तः॥ एवं वि

धर्म्यानाश्रितत्वात्तद्वचनमप्रमाणमेवेति भावः ॥ समासजनतदेशसंज्ञेति ङ्गौपः ॥ ४२ ॥ इदानीं देवद्विजगोभजनं दूषय
ति ॥ देवैरिति ॥ देवैर्ब्रह्मादिभिः द्विजैर्याज्ञवल्क्यादिभिश्च कृता ग्रंथाः पुराणानि स्मृतयश्च त एव येषां नवाद्द्याः वैदिका
नां तदाहतेऽ तेषां देवानां द्विजानां वा हृतौ आदरणे विषये पंथाः देवा ब्राह्मणाश्चाक्ष्यं न जननीया इत्युपदेशपराः प्रमाण
मिति यावत् ॥ स्वप्रज्ञार्थमेव तैर्ग्रंथा निर्मिताः तद्वचनं प्रमाणं पादेवादीनां द्रियंते एवं कृताः स्वयितेषु आनि स्म कुथ
प्रामाण्यं देवगणं पशुरूपं सुरानिनं ननैः स्म जितैः प्रयोगैरपि सकाशादात्मस्वरूपं वक्तुं स्पष्टं न ऽधरीकृतः किं
नम्रो ऽ अथ वहीनो न कृतः किं त्वपितु नमस्कार्यापि कृयानमस्कर्तुं हि न तावात्परोऽपि सकाशात् इत्यं ततो मूर्खतमा
इत्यर्थः ॥ व्यक्तं मन्य इति यावदिति च ॥ स्वार्थपरपरवचनस्याप्रमाणत्वात् देवब्राह्मणसुरनिनजनं निर्फलत्वात्याज्य
मेवेति भावः ॥ देवैर्द्विजैः कृता ग्रंथा येषां वः पंथाः प्रमाणं तैर्लविस्तिस्तस्पपथ्यस्तेषां देवादीनां वाग्रंथादीनां वा आद
रणे निमित्तं गां नतैः तत्पोप्पाः स्वेति पूर्ववत् ॥ ४३ ॥ इदानीं परलोकमार्गीकृत्यापि यज्वनां ब्रह्मचर्यादि परिहसति ॥
साध्विति ॥ शांतं विषयत्नोगपराङ्मुखं स्वांतं चित्तं येषां तैर्भरवोऽन्यः कैर्न हीनतरादैरपि यज्ञेषु प्रोत्साहं प्रवृत्तैः या
ज्ञिकैः कामुकता संभोगलोभिताय दत्तुक्ता तत्साधुयुक्तं यद्वा साध्वी सुखकारिणी सा चासौ कामुकता संभोगलो

नै०टी०२७

वसानन्तुक्ताशांतस्वांतैर्यज्वभिः कामुकतासाधुमुक्तात्पर्थी क्तासाधुकाका विरुद्धलक्षणयानैवमुक्ता किंतु
संभोगैकनिष्ठा एवतेइतिवाव्याख्येयं। सर्वत्रापिहेतुगर्भविशेषणमाह॥ किंभूतैः सारंगलोचनाभिः सुंदरीभिः सा
रांश्रेष्ठांताएवसारः श्रेष्ठः पदार्थोयासांताहशींवादिवंप्रेत्यापिस्मृत्वापिलिप्सुभिः। स्त्र्यादिकाम्यैवबहुधनव्ययास
साध्यात्मज्ञानयेऽर्जयंतितैः कामुकतानैवत्यक्ता॥ अन्येषांतुजावज्जीवमेवकामुकत्वंयज्ञानांतुमरणानंतरमपाति
प्रेत्यापीत्यनेनसूचितं। तस्मादीहक्समयेपिब्रह्मचर्यांगीकरणेनात्मानवंचनीयइतिभावः। दिवंनलोकेतिनषष्ठी
॥९०॥ एवंदेवोपदेशमाह। कइति॥ हेप्राज्ञाः प्रकर्षेणज्ञाः अज्ञोमूर्खाः तस्माद्भ्रमः भ्रांतिः कः अपिनकोपिवामांगीक
रणेऽत्रपरलोकसाधनेपिकाम्यकामजानकमनीयकामिनीसंभोगफलत्वाद्द्व्यर्थेविज्ञांनिस्तस्मान्नकार्यस्तर्थः॥
तर्हिकिंकार्यमित्यतआह॥ प्रियायास्तरुणरमणीपरमएषाप्रीतौप्रेमणितस्याः सुखैकत्वाद्नेनविषयेपरिश्रमः प्रपा
न्प्रयासः क्रियतांकर्तव्यः॥ शांतिः कापिनकापिभोः प्राज्ञाबुद्धिमंतः तारतम्यविचारचतुराः प्रियाप्रीतौप्रयासः
कार्यः सद्यः सुखहेतुत्वादितिवा॥ परस्त्रीगमनेऽल्लोकांतरेनिरयादिप्राप्तिभयंनविषयतीत्याशंक्याह॥ नस्मीन्नतस्यच
तस्यन्नतस्यदेहस्यजातस्यदेहिनोवापुनरागमनंलोकांतरेकिम्यादिदेहप्राप्तिरितियत्संक्रमः परलोकेसै

२९

वात्मावात् तत्सद्भावेपि वादिहस्यैवात्म त्वां तस्य वक्तस्मीकृतत्वात्केन नरकादिदुःख्यन्ते॥ तस्माद्यावज्जीवं यथेष्ट
मुपभोक्तव्यमितिभावः। प्रियाप्राप्ताविति चपाठः॥ दृष्टा॥ मोक्षेऽधीकाराभावात्। ब्रह्मचर्यादिपरित्यागेन काम एव से
वनीय इति ग्राह्यं छलेन हृद्धसंमत्या स्वयं मतं द्रढयति॥ उभयीति॥ अपवर्गे तृतीये तिक्रणतः पाणिनेरपि सुनेः
उभयी प्रकृतिः स्त्रीपुंसलक्षणा द्वयी व्यक्तिः कामलक्षणे पुरुषार्थे मैथुने धर्मे सजेत तत्रासक्तो नैव तत्त्वदृष्टि मनः अन्तःक
रण त्रिप्रायो लक्ष्यन इति शेषः। अयमाशयोऽपवर्गे तृतीयेति वदतः पाणिनेः। मैथुनधर्मेऽत्र सक्तेन पुंसकेन तीर्थ
यात्राब्रह्मचर्यादिद्वारं मोक्षे प्रयतितव्यं॥ स्त्रीपुंसलक्षणा व्यक्तिर्मैथुनेशक्तत्वात्कामसंयोगेऽत्राधिकारिणी न
तु तीर्थयात्रादिद्वारा मोक्ष इति॥ तस्मात्कामाङ्ग एव कार्यं तत्स्वार्थः। न केवलमस्मदाचार्यस्यैव संमतं किंतु भवदीय
स्य पाणिनेरपीत्यपरार्थः॥ अथवैवं वदतः पाणिनेरप्ययमाशयः धर्मार्थलक्षणा व्यक्तिरर्थश्च पूर्वं प्रयोज्या प्रकृ
तिः कामसंबद्धा नैव धर्मार्थकाममोक्षास्विति त्यादौ कामादिव्यवहितपूर्वत्वेन तस्याऽनुक्तत्वात् तृतीया तु काम
लक्षणा व्यक्तिरर्थश्च पूर्वं प्रयोज्या व्यक्तिरपवर्गसंबद्धमहा अपवर्गादिव्यवहितपूर्वत्वेन तस्याऽनुक्तत्वात् तस्माद
-पवर्गनिमित्तकामारब्धा तृतीये व्यक्तिर्यज्ञादिसूक्तत्वान्मोक्षप्रति कामस्यैव हेतुत्वात् प्रियाप्रीतिरेव सुतरां कार्ये

नै॰टी॰१७

ति भावः॥ अपवर्गः फलप्राप्तिरिमं सूत्रार्थं शब्दच्छलेन नान्यथोत्प्रेक्ष्य द्वन्द्वसंमतिः स्वीयमतसमर्थनार्थं दर्शिता॥
तृतीया प्रकृतिः षंढ इत्यमरः॥ उन्नयीत्यमजःस्थानिबलात्रयग्रहणान्ङीप्॥७०॥ गंगास्नायिनो दूषयति॥ क्लि
तीति॥ उपरियानाय स्वर्गं गंतुं अथवा ऊर्ध्वदिशं गंतुं अनितमज्जनान्कृतगंगास्नानानथ च कृताधोगमनाजनान्
अग्रतः विग्रहाय युद्धाय पश्चाद्गत्वरः पश्चाद्गत्वरः पश्चाद्गमनशील उरस्त्रोभिस्तस्य क्लिश्नंतं साहरूपं विक्लितिधार
यंति॥ मज्जनादूर्ध्वगमनं विरुद्धमिति विपरीतार्थकारित्वान्मिषवन्मूर्षा एवेति॥ गंगास्नानेन स्वर्गो भवतीति
न्नौ तिरेवेति भावः॥ विग्रहस्येति॥ पाठेऽपरिज्ञानाय कृतगंगास्नानान् जनान् मार्गे गच्छंतो मे खस्यपत्रां ति साहरू
वाधारयंति॥ परं ऊर्ध्वशरीरस्याग्रतः शिरोदेशे॥ पश्चात्कटिदेशेऽव जलमध्ये धर्मषणवशाद्दक्षिणकरेण प्राणा
नायच्छतः पृष्ठस्थितवामहस्तस्य नीचग्रीवतया उरःसाहरूपं पश्चात्स्थितहस्तस्य चउच्छमाद्दरूपमिति मिषत्तु
ल्यास्ते जना उच्चैर्लिंग मिषानीचैर्लावस्य विरुद्धस्य करणादुपहास इति व्याख्येयं॥ यानाय क्लिश्य हारयेति वलुम २०
र्ये त्विवतुर्थी॥७१॥ परलोकसद्भावेऽपि देहात् रप्राप्ताव पिवनकिंचिदनिष्टमित्याह॥ एनसेति॥ अनेन लोकैः क्रि
यमाणेन ब्रह्महत्याद्येन सा पातकेन तिर्यक्त्वमिपद्ध्यादिः स्याद्भवेदित्यादिरित्यपिवं प्रकार काबिनी षिकाल्पयो-

पदर्शनं किंत्वपि त्वनिष्टहेत्वाभावाच्च किंचिदेतत्॥ हि यस्माद्राजिलोऽपि हीनः सर्पविशेषस्तेन स्वीये सुख
हेतुर्निर्भेकत्वस्थलजलाहारविहारसंयोगादीनि विचित्राण्येव सर्वेषां सुखसाधनानि नहि नियतानि कानिचि
त्॥ ततश्च पापफलत्वेऽपि तिर्यग्योनित्वजातेऽपि सुखसद्भावान्न किंचिदनिष्टमित्यर्थः। समौ राजिलडुंडुभावित्यमरः
॥ विजी विकाथात्वर्थनिर्देशो एवं तु लिति खुलस्तक॥७॥ युद्धे हतानां स्वर्गप्राप्तिरित्यादिना रत्नादिकवचनं दूषयति
हता इति॥ संग्रामे हताः संमुखं पतिता दिवि दीव्यंति क्रीडंतीति चेद्यदि तर्हि दैत्यारिणा श्रीविष्णुना रणे हता हि
रण्यकशिपुप्रभृतयो दैत्यास्तत्रापि स्वर्गेऽपि तेन सह युध्यंतो युद्धं कुर्वते॥ यस्माद्धता मारिता अपि ते दैत्या न व
दीयमते तथैव रणे संमुखपतनात् स्वर्गे जीवत एव॥ ततश्च यं यं वापि स्मरन्नित्यादिकवचनप्रामाण्यान्मरण
समयेऽपि दैत्यदैत्यारिणा सह विरोधस्य चित्ते धृतत्वात् स्वर्गप्राप्तावप्यासुरत्वावस्थानतस्तथैव वर्द्धमानत्वात्तत्रापि
तेन सह योद्धव्यमेव॥ तत्रापि युध्यंत एवेति केचित्पुराणादौ नाकर्ण्यंते। तस्माद्रणे पतितानां मरणादधिकं किं
चिदपि नास्तीति रणादपलायनात् स्वर्गं इत्यादि क्षत्रधर्मप्रतिपादकं वाक्यजातमप्रामाण्यमेवेति भावः॥ हता अपीत
त्र हतो अपीति पदेन हतो हि सार्यां तनायामपि मरणे प्राप्तेऽपि अन्यत्पूर्ववत्॥ हतावापीति वा पाठः॥७॥

भा२

इदानीं मायावेदांतसिद्धांतं दूषयति ॥ त्वमिति ॥ संसारे संसारणावसरे त्वं जीवात्मरूपः प्रपंचश्च तथाऽनाद्यविद्यावि-
लासवासनाविद्यमाना त्रयं वेति द्वयमप्यस्ति ॥ वौ समप्राधान्यद्योतनार्थौ । मुक्तौ तु मोक्षे संजाते पुनः आविद्यक
जीवव्यवहारनिवृत्तेः केवलं स्वयं प्रपंचरहितं ब्रह्मैव वर्त्तते घटोपाधिनिवृत्ते घटाकाशनिवृत्तावाकाशमात्रस्या
वस्थानवत्संसारोपाधिनिवृत्तौ स्वनिवृत्तौ एकमेवाद्वितीयं ब्रह्मेति ब्रह्मात्मना संपन्निर्वर्ततीत्यर्थः ॥ तथापि
प्रपंचस्य शुक्तिरजतवन्मिथ्यादृश्यत्वादित्येवं स्वस्योच्छित्तिरेव वस्तु । किंत्वस्या उक्तिर्वचनं तत्रैव दर्शनानारूपा
क्तिनिरूपणकौशलं वेददवादिनां वेदांतमतानुसारिणां ॥ आत्मार्थं सर्वतः स्वोच्छेदः प्रतिपादित इति महत्कौश
लमिति मायावेदांतमतोपहासः ॥ वेदवादिनामिति छांदसास्तिकिंचिदपि न ज्ञानं तत् । तिस्मृचितौ । अपि च संसारे
द्वयं मुक्तौ त्वेकं ततश्च द्वयं परित्यज्यात्मोच्छेदतुरः स्मरमेकं मूर्खादन्यः कोपि नेहिते तस्मान्मूर्खा एव तद्वुक्तिनाव
। वेदे वेदिना मितिपाठः ॥ पूर्वमेव नावेद्धदवेदिते निपाके स्वोच्छित्तिमुक्तत्युक्तिं वेदः अस्मिरूपावेदार्थज्ञातृतात्मा
त्मविनाशोक्तिं वेदार्थपरिज्ञानं नामे स्तुपहापहासः ॥ ७४ ॥ न्यायविशेषिकसिद्धांतनिमततां मुक्तिं दूषयति ॥ मुक्त
यइति ॥ यः सचेतसां चैतन्यवतां सुखदुःखाद्यनुभवाभावात् शिलात्वाय पाषाणवस्थारूपायै मुक्तये मुक्तिं

२

२१

प्रतिपादयितुं शास्त्रमस्त्वेन्यायदर्शनं निर्ममे॥ तदत्यंतविमोक्षोऽपवर्ग इत्यनेन सकलविशेषगुणोच्छेदो मुक्ति
रिति मुक्तस्य शिलातुल्यत्वं प्रत्यपादयत्॥ यूयं तं स्वयमेवावेत्य विचार्य गोतमं श्रुतन्नामानं मुनिं यथा विज्ञजानीथ
स एव तथा नान्य इत्यर्थः॥ सगोतम इति यथा युष्माकं सम्मतस्तथा ममापीत्यर्थः। वैशेषिकास्तु तदीयमतानुसारिण
इति भावः॥ अथवायं परं नाम्ना गोतमः किंतु प्रकृष्टो गौर्गोतमः पशुरेव स येन तस्यां शिलारूपमुक्तिप्रतिप्रतिपाद
नादित्यर्थः॥ तोपि गोतम एवेति भावः॥ आत्यंतिकी दुःखनिवृत्तिर्मोक्ष इति॥ सुखमपि दुःखानुषंगित्वाद्धेयमेवेति व
दतामस्यशरीरं वा वसंतं प्रियाप्रियेन स्पृशत इति च तत्र प्रमाणमुदाहरतां वैशेषिकाणामपीयमेव मुक्तिः संमते
ति॥ न्यायवैशेषिकसिद्धांतोपहासोनेन कृत इति॥१५॥ हरिहरादिभानाम्मुक्तिरिति वचनानि दूषयति॥ दारा इति
सतमेवड्गंसत्पञ्चुगंसतयुगमितियावतत्तंनलंतां भैमीवास्पर्द्धितुंतु लपितुमर्हमितथात्रेतायुगमपिस्पर्द्धितुम
हति। न तु जेतुमित्यर्थः॥ अथवैकोविरुद्धधर्मरहितः प्रकारो निश्चितः स्वधर्मोयत्र तेनवलांचकलहसंदेहोस्पर्द्धितुंनार्ह
तः॥ विरुद्धधर्मत्वेहिकलहसंभवो विशेषधर्मप्रकारोवासंदेहसंभवः॥ अत्रत्वेकधर्मत्वात्प्रकाशमानधर्मत्वाच्चकलह
संदेहौनसंभववतः इतिश्युक्तमितिभावः॥ त्रेताग्नित्रितयेयुगेप्रकाशस्यप्रसिद्धेस्यात्॥ संदेहद्वापरोवाधेत्समर्थः॥ प्रक्षे
श्राधर्मशाहृदयोऽपूर्वदरूञ्जीहौ धर्मादनिच् इतिसमासांतः॥ पश्चात्पूर्वेणसमासः॥४६॥ करिष्यइति॥ हेकलेत्वंतद्रूपंनिश्चि
तंकरिष्येघन्निलपराभवंइच्छसिकिं॥ प्रतिसाविशेषस्यैवंरूपंतत्त्वंकरिष्यन्नपिकर्तुकामोपिदुष्यसिदुष्टोऽभवसि॥ अपका
रस्यन्नविषयत्वादिदानींसाक्षात्कायव्यापाराभावेपिमनस्यपकारकारणवासनायाधृतत्वाद्वचनेननवानुवादाद्धि
विधयातकसज्ञावाब्रह्महत्यायाअकरणेपिब्रह्महत्यांकरिष्यामीत्याद॥ विवेत्यर्थः॥ कुर्वाणो दुष्टो भविष्यसीतिकिं

नै॰टी॰ ९७
ण

वाच्यमित्यपिशब्दार्थः॥ अथवाकर्त्तुमुद्युक्तस्यैव प्रतिज्ञातं नादिति किं वाच्यं। किंतु यद्यपि नलभ्यपरार्थं एवं करिष्यसि
तथापिदुष्यसे प्रतिज्ञा। नार्थसंपादनेप्येवं प्रतिज्ञा पारस्पर्युक्तं वात्। हि यस्मात्कार्ययाः कार्यसाधनसमर्था
दृष्टाश्चक्रचीवरादयः। अदृष्टदिग्देशकालस्वरेच्छादयो हि तव कारणानि तवायत्तास्तदधीनानभवंति कार्यसा
धिकाद्दृष्टा दृष्टसामग्री तावत्त्वया संपादयितुमशक्या। किंतु सा तस्य तस्य तत्तत्कर्मवशात् स्वयमेव संपाद्यइ
त्यर्थः। तरन्यासः। ननु तर्हि मत्वयापराभवितुमशक्यः। अथाधर्मः स्याद्धर्मवशादिवतस्यतादृशी दशा भविष्य
ति॥ त्वया किं क्रियते इत्युत्तरयापि दोषाभ्यामेवं करिष्यति रूतमित्यादि नलानानकार्ये तिभावः। इत्युक्तेपिपाठे अवरूप
वरूपवाकरिष्येइत्युक्ता अकारप्रश्लेषेण करिष्यन्नपि दुष्यसि वाड्मात्रेणापि पापसिद्धेः किं पुनः करिष्यन्निति
अन्यत्पूर्ववत्कार्यया। तस्मिन्निदमित्यर्थे दृष्टान्तः। हितार्थं तस्मै हितमिति वा॥ ४७॥ अहमिति॥ यः पुरुषः मोहिना
ज्ञानेनापि तस्मिन्नुपलोकेऽनपकारिणि अपहमपकारं आचरेत् स पुरुषस्ततस्तस्मादनपराधात्पापाद्धेतोरचि
रेण तस्मान्नदृशापकरणजातात्पापात् स्वं नवीयस्यतं तापं दुःखं आप्नुयात्। बुद्धिपूर्वकारी लभतइति किं वाच्यमित्य
र्थः॥ नलञ्चाहस्त्यस्मात्त्वया सर्वथा त्याज्य इतिभावः। अनेनश्लोकेपि दत्तइति सेयं। मोहेनेतस्त्रार्थादपिशब्दोयोज्यः

५२

मोहस्येन स्वामित्वज्ञानाश्रयमूर्खतर इति वा संबोधनं ॥४८॥ सुरेति ॥ हे सुरगणानां सत्पादानां शेषकलेतस्मिन्नल
नवैषद्वेषः नमां प्रतमयुक्तः। यस्माद्वैरसेनिना नलेन सह एतत्सार त्वं वैरं ते कुत्यं हिताय न जायते। अतो दर्केन नष्य
ष्यति ॥ सुरेशु मौषा इति निर्द्धारणे षष्ठी ॥ हितयोगे तदर्थ इति चतुर्थी ॥४९॥ तवेति ॥ हे कले तत्र नलसमीपे परान्नवार्थयामि
गच्छामीति एवं रूपं राजसंसरजो गुणजनितं विचारा सहं अतएवासदृशो नर्मसदृशं मानं इहास्मिन्काले देवैरेवास्पर्तान
जतां इति सञ्जत्कमिति वा इति विचार्ये तिदैत्ति वा यावत् ॥ इति किं तत्र राजसंसदि तस्यां नलसभायां गतः सन् हास्यतां प
रिहासास्पदत्वं मी गाः ॥ एवं विचार्य तत्र गतः सन् त्वं रूपहास्य एव न विष्यसि न तु नलं परान्नवितुं शक्ष्यसीति वं विधो क्वि
रः परित्याज्य एवेत्यर्थः ॥ विपक्षे बाधकमाह उत्तरार्द्धेन तत्र स्वयंवरे गतो राजसभायां स्वयंवरे वृते किमर्थमागत इति हा
स्यतामेव गमिष्यसि ॥५०॥ गत्वेति ॥ हे कले निषधदेशान्प्राप्य गत्वा नलं भैमी मंतरा नलभैम्योर्मध्ये कस्माद्वीर्घं
रितलक्षणं कारणमंतरेण वा त्वं न प्रवेक्ष्यसि प्रवेशं कर्तुं न शक्ष्यसि ॥ नलस्य पुण्यश्लोकत्वां ड्रेम्याः पतिव्रतत्वादि
धर्मयुक्तत्वा त्वो पारान्नवितुं न शक्तोसीत्यर्थः ॥ कदुषक्रमं युक्तं सर्वं विसंधितया पृथक्कृत प्रकृति प्रत्यय विभागेय
घ तेदामानं संहितया प्रयोगार्हसुवार्यमाणमिति यावत् एवं श्लाधनं षणं वकंषणमिति शब्दत्व पस्थवर्ण द्वंद्वं मंतराम

नै॰टी॰१७

ध्येडकारवत् डकारो वर्णोयथाऽकस्माद्विधिमन्तरेणानप्रविशतीति साधर्म्योपमा षष्ठ्राद्धाषष्टी बहुवचनेषट्च
तुर्न्भ्यश्चेतिनुटि तत्सहिते आमि स्वादिषु सर्वनामस्थानइतिपूर्वंपदस्यपदत्वात् कुलांजशोंतइतिजश्त्वेनषकारेनपदं
तादितिनिषेधस्यानाम्नवतीतिनिषेधात्षुनाष्टुरितिष्टुत्वेननान्नकारस्यकरादेशो यरोनुनासिक इति डकारस्यापि
अनुनासिकस्यव्यवस्थितविकल्पत्वादननुनासिकस्यात्रनित्यत्वेनणकारेजातेसर्वथापिस्वेनरूपेणषण्णामितिपद
मध्येडकारोयथाप्रवेशंनलभतेतथातयोर्मध्येत्वमपीत्यभिप्रायः॥ टकारवदितिपाठेवावसान इत्यवसानएकत्वं
विकल्पात्खरश्चात्वावान् षड् ड्डुक्षि॥ चित्यादिवत्वर्णमित्यत्रखरवसानयोरित्याद्वा टकारो यथानप्रविशतीति
साधर्म्येयमेव॥ क्लिपकोपेनलंनैमीत्यंतरांतरे एणेतिद्वितीया॥५१॥ अपरइति॥ अपरेदिक्पालाश्चावन्न्यादयः शची
पतेरेषांस्वर्वीक्षांचाप्येवंअन्न्यमन्यत इंद्रोयुक्तमाङ्गापपतीत्यवमन्यनंदन्॥ किंतुपुनर्मूर्खंयुगयोः कलिद्वापरयोःयु
गएनांइंद्रगिरंनादत्तंग्लौचक्रे॥ दिगीशानामपिसंमतायांवाचितयोःरसंमतेः किंतुराद्धेनमूर्खतरत्वमाग्रहित्वं
वोक्तं एनांअन्वादिशे एनादेशः॥ आदत्तअनास्पाविहरणत्वात्तङः॥५२॥ कलिमिति॥ देवाःकलियुगंप्रतिलद्वी
त्यकली देवान्प्रत्येकशः एकैकमुद्दिश्योपमिथोऽन्यान्यंसमेवंत्युल्लेपरदृष्टैरश्लिष्टैः शब्दैःस्मोपहासंउपहासवाक्य

सहितं कलिं कलहं वा युध इत्थं वक्ष्यमाणप्रकारेण अपरं स्वर्न् अपरस्व घ्राकृतवंतः ऽकृतवान् इत्यर्थः॥ अपरस्वत
रवयंते स्वैरादिकस्यादंतत्वाद् ग्लोगित्वाभ्यासत्वन्रूपं॥ अयं रवयदित्यपि पाठः॥ ५१॥ इंद्र. कलिं प्रत्याह। तवेति॥ हे क
लितयावैरसेनौ नले वृत्ते सति तव आगमनं गतागमनं वा॥ अहंयुक्तं॥ उद्वेगेन उत्कृष्टजवेनाति एव धावता शीघ्रगामिना
ऽनेन प्रत्यक्षदृश्येन विमानेन आकाशगामिना रथेन किमपि तु किं वित्तप्रयोजनमस्ति अन्यस्य दृष्टत्वादित्यर्थः॥ वै
रसेनात् युत्तरेणवासं बंधनीये अनयानले वृते एवत वस्तु पुरादगमने युक्तं न लचरनानंतरं मिदानी मित्यर्थ इति
वा॥ एतावत्पर्यंतं किं कृतमिदानीं किमर्थं गम्यत इत्युपहासः॥ एतदेव वाक्यं कलिरिंद्रं प्रत्याह॥ हे शक्र तेस्मान लेवृते
सति तव यथागतमागमनमेव अकृतकार्यत्वादिदानीं स्वर्गं प्रत्यगमनमेव युक्तं विगतमानानामिति न स्वाभि
स्तितराम भिमानश्शून्य इंद्रगोपि तेन निर्वेदेन किमिति वा॥ उद्वेगेन किं अनेन धावता विमानेनापि किमिति वा॥ अ
पि धाओतस्वोपमार्ग इत्यङ् प्रत्ययः॥ ५२॥ वह्निः कलिमाह॥ पुरेति॥ हे कले त्वं पांवरीतुं इत्तोपि पुराया। मिग मिष्य
सितया ऽग्र एव त्वदागमनात्पूर्वमेव अन्यस्मिन्वृते एतदिदानीं गमनं भवति स्त्रपाकरं हास्यं हास्यकारणं दृष्ट्वा जं जा
तं॥ वार्धि षमाणमपि दृष्टं नभायत्वाद्दृत्तमित्युक्तं॥ सर्वो पिलोकस्त्वामुपहसिष्यतीत्यर्थः॥ एतत्क्वचतं गमनावरणं हास्यहे

नै०टी०१७

त्वन्नूतंत्रपाकारिस्वल्नविष्पती।तिशेषइतिवा॥यद्वा स्वस्यगमनात्पूर्वं वद्वृती हस्तेनोपदाप्रदाना।दि द्वारायांवरीतुं प्रय
त्नोऽकारितयानवसमेहस्मेवनलेहृते एतत्स्वर्गप्रस्यागमनलक्षणमास्वरणंतचन्नैपानकोगती।तित्रयाऽकृतंल
ज्जांनावहति॥हाकष्टं।एवं हृतेपिनिर्लज्जः सनस्वर्गंप्रहंगछन्त्वांवभितांमुखंकथंदर्शयितासइतित्राचइतिवा॥त
याविनैतत्स्वर्गगमनाचरणंतज्ञावहंसदहास्यंहासयोग्यंनापितुसर्वैहास्यमेवेतिकाक्षर्वा।मुखंलज्जाक
रं हृष्टत्नमाचरणामपिलज्जाकरमितिवा॥याती तियेवस्तुरेतिन विष्पतिलघु।पद्दोडरिलुङ्गितिन्रतेतलङ्पद्दोपसुक
प्रयत्नेनावेश्विए॥५५॥यमः कलिमाह॥पत्याविति॥हेकलेत्वं यदर्थं युस्यानिमित्तेनगतवान्गमनसुक्तोमिवां
वरीतुमेवगछमितयापूर्वमेवान्यस्मिन्पत्यौहृतेसतिनष्टेत्वेनांगीकृतेसतिन्निवत्तःकोपस्यरोधोनिवारणंस्ताऽ
वलु॥यतोऽक्षमस्यासमर्थस्यात्एवहथारुड्कोपोयस्यतस्मादिदानींकोपोरोधव्यानकार्यइत्यर्थः॥नह्यहेकार
णत्वावाद्धतिधारणेरोषस्य।यस्मादसहतत्स्यासमर्थस्यवारुषो हथाकोपानिष्फलाः तस्मात्कोपोनिवार्यइत्यर्थ
इतिवा॥पद्दोप्रथमाऽवधातो।रितिप्रतिषेधात्असतत्वेतिनदीर्घः॥अधस्तादिति॥दिक्शब्दात्सावादधनस्ताद्वा
दस्तातिः अस्तातिवेत्सधादेशः॥अधइतितस्मादेवसूर्वंधिरेत्पसिधरादेशश्चपेतिषोतकर्मति॥पद्द॥वरुणः क

४४

लिमाह॥ यासानि॥ हे कले: काय कांत्या स्मरं जयतः विरुद्धलक्षणया ऽतिकुरूपस्त्वं महांतोऽवंतोऽस्वायस्मिन्नर
पितेनरथेन कृत्वा यो जनो घं चतुःक्रोशरूपयोजनसमूहं अति दूरमिदानीमपियासि सत्वंमूढो मूर्खोयस्माद्द्वाप
रनाचनेम्यात्तस्मिन्नलेहृत्ते सति अत्र ऽस्मिन्नैषधवर्त्तमानस्पतित्वक्वी: किंना पितुःन विष्यत्पेवास्त्रा विनी
वर्त्तमानं वा लज्जामगण्यापि गच्छसि तस्मात्मूर्ख एवेत्यर्थः॥ अहं तु तदा नासवंतु गतोपि न ष्ट तद् इति अपमा
नाद्व लज्जया न विलुयुक्तं॥ परंसा न जायत इति चित्रं॥ अत एवत्वात्र पत्नमित्यर्थः॥ अत्र पन म्रियस इत्यमरं अत्रेतेप्य
चमनादरे ऽतेलज्जया म्रियेत त्वं तु विर्लज्जो न म्रियसे इति चित्रमित्यर्थ इति वा॥ अत्र पया लज्जानविना मरेत्पेकंप
दं वा॥ त्रपायासत्वामप्यमरेतिवा॥ अत्र पया लज्जा नावे नामं रोगं पीडामस्मा हशोद्वामिद दासीत्पत्र पामरात
वनिर्लज्जत्वेन वयमति दुःखिनो भवाम इत्यर्थ इति वा॥ एते चत्वारोपिश्लोका यथाक्रममिंद्रादिदेवचवनत्वेनद्वे
या: कलिकलहस्तु सर्वत्रानुस्यूतः। तत्रापि प्रथमं देववच: पश्चात्कलिवच: महार्वता अर्वला स्वसाधितित्रं तादेशा
आन्महतइत्याकार:॥ यासि स्मेति पक्षे लड् स्म इति [illegible] लट्॥८७॥ नलमिति॥ दिवाइं [illegible] स्तोद्धीया कलुरायथो
र्थतीया चतुर्थयो युगयो द्वापरस्य कलेश्च युगलं द्वयं नलं प्रत्युद्दिश्य अनपेता [illegible] अनयगतव्ययं नल: सर्वथा

पीडनायइतिनलेनिहन्तात्प्रकारवांछंतुध्वादिविधिंयंदधुः॥युगद्वयमस्मद्वचनंनशृणोतीतःपरंयत्किंचिद्भ
वतुकिमस्माकमितिविचार्यगंतुमीषुरित्यर्थः॥ताच्छायाकः पूर्ववत्॥तुरीयश्चतुरःछ्यतोवलोपश्चेतिछ्व
लोपश्च॥५५॥द्वापरेति॥कामादिसैन्यंपरावर्त्यद्वापरएवैकःमहायोयस्यतथामत्सरेणानलस्तुत्वद्वेषेणमूर्छि
तोविनष्टइवातिमत्सरेणवृद्धोवातथाग्रहिणोनिवारनस्यानाकर्णनादाग्रहवान्कलिः अवश्यंनलेभियद्दि
ष्यामीत्येवंरूपांनलाभिग्राहिणींयात्रांजग्राहानिषधान्प्रतस्थइत्यर्थः॥किलयस्मात्ऽहिलत्तस्मात्प्रतस्थेउपहासे
वा॥एकःपरीवारोयस्येतिविग्रहद्वापरेणैकपरिवारइतिसमासः॥परीवारउपसर्गस्यघञ्यतिदीर्घत्वं॥निग्राहि
णीमाक्रूरपकेणिनिः॥५६॥नलेति॥नलस्येष्टापूर्त्तैर्निर्यागतडागादिधर्मनिर्मितैःसंस्मरणत्वाद्धनोः नितरां
धर्मवाकूल्यात्यापरूपंप्रस्थितमुमुंप्रति अनुद्रवि नितरांदुर्गान्दुर्गमानत्रनेनप्रवेष्टुमशक्यान्निषधान्गंतुंलग
गमनायाप्सुंतिषेधत्ववारयत्घनोमहान्निरंतरस्थविघ्नः॥वक्ष्यमाणप्रकारेणसंजघटेसंयद्धर्मवाकूल्यं
दृष्ट्वासहासातान्प्रवेष्टुंसक्लिन्नइत्यर्थः॥अथचघनोमेघोजलपूर्णैर्दुर्गमंदरागंतुविद्रूपोनवन्निषेवतिद्द
ष्टेवक्ष्यवंचेतिद्वंदेअन्यस्मामपिदृश्यतइतिदीर्घः॥५७॥मंडलमिति॥पापःकलिःपापग्रहमध्येगणितत्वात्पापंस्व

न्तुरिवामलंनिःपापंनिषेधेंदुस्यमंडलराहुंश्रममलंपरिपूर्णप्रकाशंचंद्रस्यमंडलंविंबमिवमस्यत्रागत्यग्र
त्यग्रहणयोग्यवशात्प्रकाशयितुं विनाशयितुं ग्रसितुं च पापः॥ ६१॥ कियतेति॥ कलिर्युगस्य लक्षणसमयरूपोऽथ च पा
परूपत्वाद्व्यामवर्णोऽथ च दारुणत्वात्कृतांततुल्यस्तथाहं मनागनल्पो ऽनेन हंकारवान्। कलिः कियतापि
त्ययमकालेन नैषधीनं तु महीभुजो नलस्य राजधात्रीं चोपपविवान्प्राप्तवान्। पूर्वदिग्भागं प्राविशद्दिक्पानीतुराजधा
नीमिति वार्थः। कसजैमीत्याज्येनेकल्पे रतिमिवेशानिप्रायो विशेषणद्वयेन सूच्यते॥ कियतापीपसेतिवा। अहमि
तिमननमहं मानः सोऽस्यास्तीति सर्वकार्यं अहमेवेति मन्यते तच्छीलइतिवा॥ ६२॥ इदानीं पुरप्रवेशविघ्नाना
ह॥ वेदानिति॥ तत्र पुरे वेदान्ऋगादीन्धरंतां गुणनिकां कुर्वतो श्रोत्रियाणां मुखात्पदं पदकारकलितं संहिता
क्रियागारूपं संक्रमं श्रवणयित्रस्य एव न कालः समयरूपोऽथ च पापरूपः कलिपदमेकमपि चरणं न्यासार्थं प्रस्था
यितुं नापारयत्। पापरूपत्वादित्यर्थः। एतेन नलपुरस्य धर्मपूर्णत्वमुक्तं। वेदान्वराद्गुयोगेन लोकेतिषष्ठीनिषे
धः॥ ६३॥ श्रुतीति॥ तत्र पुरे श्रुतिपाठकाः वेदाध्यापयितास्तेषां वक्त्रेभ्यः सकाशात्। क्रमं सर्वं पदपरित्यागेनोत्त
रपदग्रहणादिकं क्रमसंज्ञं ग्रंथं आकर्णयतः श्रवणं तस्यकलिक्रमस्य चरणोगतिर्वाकुण्ठं नितरां सं। कुंठितः अवज

नैष॰टी॰ २७

तः॥क्रमाकर्णनाज्ञयेनपापः पदमपिप्रस्खलितुमशक्तास्ततो देशात्कुतनागन्त्रदित्यर्थः॥८४॥तावदिति॥तेनकलिना
वेदपाठिनां कंठेभ्यो मुखेभ्यः यावत्संहितापदक्रमरूपावस्था ध्यवविलक्षणक्रमादिरूपानत्र अविनाकर्णिता ता
वत्कालं तावद्देशपर्यंतं च प्रतिबंधराहित्याच्छिद्रं गतिरभूत्। यदाय स्मिन्देशेऽश्रुतासा तद्देव तस्य गतिर्भंगोऽभूदित्यर्थः
॥यावत्संहिताश्रावितस्मिन्नेव देशे सर्वसत्वरागतिश्चर्योऽ एनर्गयो जितातत्रैव देशे तेन सवेगोऽभूदित्यर्थः इतिवा॥
॥८५॥तस्येति॥तस्यतासामग्निहोत्रादिहोमाज्यंहोमसंबंधि घृतंतस्यगंधेन परिमलेन हेतुना नाशमिव मरणं वेद
नामिवागमत्।अत्युक्त दिव्युत्प्रेक्षा॥इवशब्द एवकारार्थो वा॥तथा तेनैव प्रकारेणासौ कलिः कटुः धूमेन कदर्थिते
पीडिते दृशौ नेत्रे अपि न अततन प्रसारितवान् किंचिन्न ददर्शेत्यर्थः॥आज्यगंधस्तु धूमसंबंधमात्रेण विव्यथ इत्यर्थः
अततेतितनोतेर्लुङि भिवितनादिभ्यस्तथासोरितिपाक्षिके सिलोपे तकारस्य कृत्वादिडित्वादनुदात्तोपदेशावन
तिठनोतिस्पनुनातिकलोपः॥८६॥अतिथिनामिति॥तत्र पुरे अनेन खलेन कलिता गृहिणामंतरेऽप्यवस्थवलोयस्मा
दतिथीनां परांभोभिश्चरणक्षालनोदकैरिपंपापरूपं कलिंप्रत्युद्विरूपा।निपिच्छिलो॥नितरां कर्दममयुक्ते एवंविधम
तिपवित्रमंगणंप्रवेष्टुनाशकदित्यर्थः॥८७॥इति॥असौ कलिः रुद्रमुद्र्यायागमं बंधिवक्रिस्तस्यमहोमपि

४६

प्रत्युद्गतापैः कृत्वा उदस्थांघ्रुटयोर्वापाकं उभयपार्श्वयोपात्रादि सांतरमग्निसंयोगमिव प्राप्तत्वा। प्रतिग्रहं याग
बाहुल्यात् ग्रामदक्षिणपार्श्वयोर्वाक्षिप्तिषितैः निंतरां पीडामन्वभूदित्यर्थः॥ तथा स्नानां धार्मिकनिर्मितवापीक
पतडागादीनां उभयपक्षस्तरंगास्तद्रूपाणि निवंजनानि तेषां अनिलैर्वायुभिः तस्य प्रत्यंगं सर्वांगं अकीर्णिव छिन्न
मिवभूदित्युत्प्रेक्षा॥ प्रत्यवयवकर्तनेन च पीडा क्रियायात् वाप्यादितरंगवायुस्पर्शनमात्रेण नितरां व्यथितो
भूदित्यर्थः॥ बर्हिः कुशास्तृष्ट्ववर्त्मेत्यमरः॥६८॥ पितॄणामिति॥ अत्र पुरे वेदमनिप्रतिग्रहं ब्राह्मणानक्षिव तुर्व
र्णैः पितॄणां तर्पणे जलसमर्पणे विषये कीर्णात् क्षिप्तात् पितृप्रिया कालात्कृष्णवर्णात् तिलात्मकान्नात् स
कलिः कालात् कृतांतादिव दूरं नितरां अत्रसत् त्रयमाप॥ तर्पणे इति पाठे तर्पयंती ति तर्पणैरिति वर्णविग्र
हणं॥ तिलादितिजातावेकवचनं॥६९॥ स्नानचूर्णमिति॥ सकलिः स्नानचूर्णं स्नानं कुर्वतां वैदिकानां तैस्तादृशे
रपि चंदनादिरचितैर्ललाटादिस्थामस्थैर्द्वादशभिस्तिलकैः कृपाणी कृपयखङ्गतामंगीकृत्य तस्य कलेर्हृदये वि
दार्य प्रविष्टैरिव स्वं स्वकीयमंतः शरीरस्य मध्यं दीर्णमेव सकलीकृतमेव मेने॥ कृपाणैर्हि विदारणं भवतीति युक्तं
खङ्गाकारांस्तिलकान्दृष्ट्वा विभयसामर्थ्य इत्यर्थः॥७०॥ पुमांसमिति॥ तत्र पुरे स्त्रयं पुमांसं मिथ्यावदावदं सत्यभाषि

नै॰टी॰२७
४७

णं विदन् जानन्। स्वमित्रलाभात्सुखेवेदे॥ अथ पक्षात्तेनैनं स्वस्त्रियं प्रत्युदित्पतन्तथाऽलीकजापिणं वीन्दपक्षात्त्व
मित्रनाशादिव दुःखवशात् ग्लानवान् ग्लानतां न गतः। पत्नीप्रतिक्रीडायां मम तत्पदोषाभावात्॥ व्यथितोऽन्तर्दि
त्यर्थः। नतमंसुकं च वने हि न स्त्रियो ऽसयोरिति त्रास्तादौ॥ विदन् विदेः शतुर्वसुरित्यत्र विकल्पानुवृत्तेर्वसो
ग्लानवान् क्तवतो त्तकारस्य संयोगादेरातइतिनः॥ ५ ॥ देशोयजेति॥ मयड्रूपैः स्वादिशेडु वरपक्षं वंधस्ते नेघ
नानि तरांव्याप्तांतां पुरं शंकत्रितिस्ती दत्तात्रकालिः स्वेकुलांव्याप्तामिव मेने। तथा धर्मधनैर्जनैः कीर्णपती
पुरं व्यालैः सर्पैः दुष्टश्वापदैर्वदुष्टाजेर्वाक्रीडांकुलां सर्वत्र पूर्णं व्यालाः क्रोडमध्ये यस्यास्तामेता दृशी
ताता मिव मेने कीलसर्प्पादिनिर्व्याप्तं स्थानं यथा प्रवेष्टुमशक्यं तथा सा पुरी नस्य प्रवेष्टुमशक्यानातेत्य
र्थः॥ व्यालो भुजंगे क्रूरे श्वापदे देदुष्टदंतिनि। विश्वः रेकांतः पुं रादृस्त्रीलिंगः। वसमुच्चये घदिवा घेवा॥ ५ ॥
सइति। वराकः कश्चिदपि स्थानालाभादीनसकलिः पराकितां द्वादशरात्रोपवासरूपपराकाख्यकृच्छ्रवि
शेषव्रतचारिणां पार्श्वं गंतुं शनाशकत्॥ तथा मासोपवासिनां छायायात्र्यदिलं घने तिक्रमणेन तस्यात्री

४१

पिसमीपं गंतुं घनेनितरां अस्खलनं त्रमस्यदोन्नत्वात् तच्छायामपि द्रष्टुं नाशकदित्यर्थः वराकः जल्पाकइति॥ कन्ना॥७
३॥ आवाहितामिति॥ तत्रपुरे सद्विजैः स्वैश्चरणैः कैरागछ वरत्येत्यादिमंत्रैरावाहितां अनंतरं अर्कमंडलात् सान्निध्यन्तिशाय
सामर्थ्यात्सूर्यबिंबान्निर्गत्य पदिमरूपेण संविदधती तत्समीपमागच्छंती प्रातःसंध्यादिदेवता गायत्री परस्पर स्त्रियागाय
त्र्याः सकाशात् इयेन गायत्र्यैवादो दृष्टः पश्चात्तदामीमेवनेष्टोऽदृष्टपो नवत्॥ संध्यावंदनं कुर्वतो द्विजान्दृष्ट्वा गायत्री
मां विनाशयिष्यतीति तत्रःस्थानात्पलाय गत इत्यर्थः॥ गायत्री सूर्यबिंबस्थेति ध्यानं॥ अर्कमंडलादावाहितामिति वा॥
दृष्टनष्टः पूर्वकालेति समासः॥७४॥ सइति॥ सगृहिभिः गृहस्थैः पूर्णे गृहे तथा वैखानसैर्वनप्रस्थैर्घने व्याप्ते वने तथा
यतीनां परमहंसानां संन्यासिनामाधारे आश्रयभूते तैर्व्याप्ते अमरागारे क्वापि कस्मिन्नपीति सर्वत्रयोऽप्यदेवालयेस्थाने
नानन्दो आश्रयं न प्राप॥ गृहिभिर्गृहे मर्णेति सतीति सतिसप्तमी वा सर्वत्र॥७५॥ क्वापीति॥ असौ कलिः तत्रपुरे आत्मनः प्रि
यां दृष्टां निषिद्धां हिंसां अथवा स्त्रियं अन्विष्य न पि क्वापि कस्मिन्नपि देशे नापश्यत्॥ तथा कलहप्रियत्वात् नामसाम्या
च्च स्वस्य मित्रं कलिं कलहं सुखिनामपि मुखे संभविते पिष्छेलेन प्राप्नोत्॥ मूर्खस्यापि तत्र न कलहायंते॥ हिंसाकल
हयोरभावात्तत्रस्थितिं न लेभ इत्यर्थः॥ अन्योपि यत्र स्वस्त्रीमित्राद्यभावात्तत्र क्षणमपि न तिष्टतीत्युक्तिः॥७६॥ हिंसेति॥

मखेगोमिधाख्ययज्ञे हिंसागवि हिंसासंबंधिनी गां वीक्ष्य रिरंसुः सुहृष्टचित्तः सन्निषिद्धे गोहिंसामात्रिये निधावति स्म॥
सा तु हन्यमाना गौः पुनः सौम्ये सोमदेवसाय ज्ञव्यसाध्ये हृषधर्मे आसक्ता तत्संबंधिनी तत्साधिका सती अतिचा
रादिदुष्टकर्मराहित्यात्सौम्यो रमणीयः पारलौकिको धर्मस्तत्साधिका कार्यं वीरवरं पापरूपत्वाद् दुःसहं रक्षयोर
नेहानवलंवा पापरूपं तं कलिं दूराद्वनिरासा। निराचकार॥ अधर्मसाधनं गोहिंसादिहष्ट्वा प्रहृष्टः पश्चाद्धर्मसाध
नमग्नीषोमीयवैदिकपशुहिंसादिदृष्ट्वामत्प्रिया हिंसा नत्ववती ति दूरात्पराङ्मुख इत्याशयः॥ मुखेइति पाठे हिंसाप्र
तिपादिकां गां वा गां भयङ्करेन मुखे वीक्ष्य श्रेत्वेति यावत् रिरंसुरधावत्॥ सा तु वांगी सौम्यधर्मप्रतिपादिका सती तमख
रां॥ अग्नीषोमीयं पशुमित्यादिवाक्या कर्णेन मात्रेण दुःखवशान्निरास्ते तिवा॥ अथ च गौर्यथा सौम्यं वृषभमनुसरंती
केरं वृषभं त्यजति॥ सुरभौ ते वृषभेवृषइत्यमरः॥ हिंसा गवीति गौरत्न द्वितेपि टच्॥७७॥ मौनेनेति॥ स कलिः व्रतनि
ष्ठानां वाग्यमव्रतिनां संध्यादिजपमौनिनां वाम्मौनेन वाङ्गुयमेन कृत्वा स्वस्या मनं अक्रोशगाली प्रदानमेव मन्य
ते स्म॥ तथा वंधेषु नमस्कारार्हेषु गुर्वादिषु वंदारूनमिनमस्कुर्वद्भिर्नरैः श्वशिरश्चपदाहतं चरणताडितमिव ययज्ञे अत्र
ज्ञासीत्॥ चह्वा योवा वंदारुः स्यादेवं घोरारुरित्यारुः॥ वंधानिति पाठे तद्योगे न लोकेति षष्ठी निषेधाद्द्वितीया॥७८

ऋषीणामिति॥ सकलैः ऋषिणां पाणौ हस्ते वृसीः कूर्मासनानि वृषपन् अमी ऋषयः घनेलो हस्तुऔरैः मोहं तुं उद्यता
इति मेने॥ तथा आचमतां तेषामेव हस्ते आचमनार्थं गृहीता आपः पश्यन् अमी मामद्धिश्च मां तं नस्मसाद्भवितुं उद्
मुद्यता इति मेने॥ ततोप्यतिनयेनायासरहितस्यर्थः॥ केषांचिद्धस्ते वृसीः केषांचिद्धस्ते आपः पश्यन्निति वा॥ हंतुमिव उद्
मिवेति प्रतीयमानो अद्ग्धा॥ सकृत्तानिति पाठे कुसन पश्च पश्यन् इत्यर्थः॥ अत्र दैर्घ्यकृशा एव घनतुल्याः आमाम
तां ष्टिवुकमिति दीर्घः॥७९॥ मौञ्जीति॥ सकलैः मौना धृतौ मुञ्जत्तृणमेखला धारिणा स्तथा धृत आषाढः पलाश
दंडो यैस्तान् वर्णिनो ब्रह्मचारिणः एवंभूतान् अरकेमेने। अमी पुरुषा रज्वा माव वधुं तनो बंधनात् रंवं दंडेन मां यथैति
ति॥ मौञ्जा द्वृतो धृताः एते ब्रह्मचारिणो न भवंति किं तु मां रज्वा वधाद्दंडेन हंतुमापतांत्यस्मा शंकइति वा॥ धृताषा
ढानिति पाठे एवंभूतान् ब्रह्मचारिणारतिनाशंकेकि कित्विरत्र राद्धे पलाशो दंड आषाढः॥ वर्णिना ब्रह्मचारिण इत्यमरः
मौञ्जा विकारिश्च॥ वर्णी स्तेषां वर्णा ब्रह्मचारिणीतानि॥८०॥ दृष्ट्वेति॥ स तत्र उरेगेः स्वशफमात्रं कुरोदाडाशंत्र अष्टाक
पालादि संस्कृतं पशुशरीरावयवं दृष्ट्वा उ तत्रा मेने कृष्टनयेन दुर्मना दुःखिता आसीत्॥ तथा स्तुवः सर्पफणाकार उप
नागावैकंकता हि जुहूः फणिनीः सर्पिणीः मत्वा ता अश्रुमुमोचादंशनमिपाहरोदेत्यर्थः॥ कुरो डाशो कारांतः कुरोडाश

नै०टी०२७

सुजादित्यमितिमाघः॥ ७१॥ मुमुदइति॥ एषद्विजन्मनोब्राह्मणस्यमदिरादानंमदिरास्वकारं विदन्नजानन्नपत्रपंत्र
पंमहापातकमितिबुध्वामुमुदे॥ अनेनस्वसौत्रामणामिष्टिं इंद्रदेवताकेयागंकुर्वंतंतांद्विजं दृष्ट्वाऽरूपत्तौसौत्रा
मणांसोमग्रहात्सुराग्रहांश्चगृह्णातीतिश्रुतेर्मदिरादानस्यवैधत्वाज्ज्ञात्वाश्रयविनाशादिव विव्यथइत्यर्थः॥
सौत्रामणीतिदेवतार्थसंबंधमात्रेण॥ एतस्त्रन्नितिप्रकृतिन्नाव॥ ७२॥ अपत्रपदिति॥ ॥अरो वेदविदांयाव
संख्याकालहूतव्रसांजलात्र ब्रह्मयज्ञसमये क्रियमाणान्हस्तस्वरकलानार्थसंयोजितान्करपुटान्वास्त्रयेपि
स्थापिनांगायत्रीमंत्रजपान्जत्वात् व्रतारंनेवसानेचपादौग्राह्यौगुरोःसदा॥ सहस्तहस्तावध्येयंसहिप्रसांजलिःस्थ
स्मृतइतिमतक्रूलहृणान्वाकरसंपुटान्अपश्यत्॥ तावंतत्तस्यकलेईदृशकाग्रादस्तांजन्योरक्रमणत्रिंजल
यःउदञ्चयंनउत्पतितानिर्गता॥ तद्दर्शनमात्रेणनितरांविदीर्णहृदयोऽभूदित्यर्थः॥ तदस्त्वेतिपाठउपेक्ष्यः॥ ७३॥ स्नान
कमिति॥ सविद्यास्नातकंव्रतस्नातकंउभयस्नातकंचस्वस्यघातकंविश्वामघातिनंयज्ञेमेने॥ तथादांपंडूपःश्लो
रामहंजितेंद्रियंनरंकुलंलवनयममिवभयहेतुंयज्ञोज्ञातरात्॥ तथावावंयमस्यमानिनोदस्यैवदर्शनमात्रेण
मोनिकर्तृकर्मकस्वकर्तृकर्मोनिकर्मदर्शनेनैववाविज्ञायात्रमतः॥ कस्यैवयमस्यैवयमकर्तृकस्वकर्मकस्वकर्तृक

यम कर्मकृद्दर्शने नेववा॥ यमेन दृष्ट्वा यमेवादृष्ट्वा यथा जयं तथामोति न इत्यर्थः॥ स्नातकस्त्वाखुनो व्रती॥ तपः कृशस
मो ह्योदांत इत्यमरः॥ गुरवे तु वरं दत्वा स्नायात तदनुज्ञया। वेदं व्रतानि वा पारं नित्वा ह्युभयमेव वेति याज्ञवल्क्यः स्नानीति
स्नातः कः याजकादित्वात् साधुः स्वर्दुलंतः॥ व्रतिकं हंत एर्दुलि हनस्तः। यज्ञो यज्ञ इति जानीते। कर्त्र रिति प्रापक्रिया फला विव
क्षायां शेषात् कर्त्तरीति परस्मैपदं॥ नद्धिवक्त्रयो त्वनुपगमगक्षि इति नु उं। हृष्टेति तिजय हेतुत्वाविवक्षया नापादानत्वं
॥७४॥ स इति॥ सपारवं उजना त्विषा स्वपक्षापान्वेद दूषकान्विचार पन्रसन्नू वेदेषु पंडितान् श्रौतस्मार्त्तकर्मणः कृप्रा
प्लुवत्पत्रपत्तता पादि दुःखा द्वेतोः अपासरत् पलाविनः। यतः पापरूपः क इव अनलं प्राप्य जला श्व वृद्धपितो जलं वि
विन्वत् अग्निं प्राप्य सो ह्यादूरं पलायते॥७५॥ तत्रेति॥ स तत्र ब्रह्महनं नरं परपत्र महापातकित्वा दात्मा अपत्राय्या तित दुं
सं तोषमनिन्द्रो प्राप॥ अनंतरं सर्वमेधाख्यस्य यज्ञस्य यज्ञो नंतने प्रोक्षणावदातादिसंस्कारादिकर्मणि निवर्णे निर्दूर्य
ह्रतिस्म निनितरां तस्यो रूत्॥ सर्वमेधः हित न जातीये कैकप्राणि हिंसाविकारा द्ब्रह्मणे ब्राह्मणमालभेतेति त्रिस्त्वव्य
स्यैवे ध त्वात् निराश्रय त्वात् संतप्त इत्यर्थः। ब्रह्म हणं ब्रह्मघ्नं रूणीति क्विप्॥ ज्वरति त्वादिः॥७६॥ यतीनिति॥ यतीनां सन्या
सिनां हस्तस्थितेः राजेर्वैणवर्दडैस्तस्य कलेवरपर्यानाज संस्ना अरं तिं॥ अकारि॥ तथा गृह्णिनां गृहस्थानां वेदैरेव यष्टि

निः दंडैर्वेदाक्रमजटारूपानिर्वा यष्टिभिस्तस्य दुर्जनस्य क्लिष्टिः क्लेशः। जनि। राजयष्टी दृष्ट्वा जीत इत्यर्थः॥ राजस्तु वैण
वइत्यमरः॥ रंजो वेणुः। तस्येदमित्यण्॥ क्लिष्टिः ति दुःखेन ता ण निवेधः॥७७॥ मंडलेति॥ एष स्थंडिलशायिनः वेदिकाशायन
व्रतचारिणो नरान् वीक्ष्य मंडलस्य तद्राष्ट्रस्य त्यागमेवैच्छत्॥ तथा पवित्राणां यज्ञाद्युपकारणादीनां त्रैलोक्यनात्मव
र्वञ्च्याघस्त्रासमस्त मविंदत प्राप। ततोपि महत्त्वमपि त्यर्थः॥ आगर्भे स्थाग्नेदर्भे पवित्रमिति कात्यायनः॥ स्थंडिल
एव शेते। व्रतशास्थंडिलशायी व्रत इति णिनिः॥७८॥ अपत्रपदिति॥ न जिनं बौद्धविशेषं स्वमित्रमन्त्रिष्यन् ब्रह्म
चारिणां अजिनं कृष्णमृगचर्म मौञ्जीं रासंगमपत्रपत्। कृपणेन दिगंबरेण वेदबाह्येनार्थ्यश्वपो जनार्पितमपि गविष
पन्यमदात्कृया सहितस्य यज्विनो॥ कृपणदीक्षाङ्गां धर्मपरित्यागान्नार्वं ऐहत्॥ पद्यः कौत्सांपात्रकात्सां पण्ण क्री
डापात्रकं संबंधि जयरा जयदेयं रात्रीकृतधनं ददर्शी राजस्तु पेप जमानो हैदीमती ति क्रते विहितत्वाद्युतं युक्तं
॥ वेद्यं सर्वदुःखदं स्वस्य मित्रमेव ज्ञातवान् न तु मित्रमित्यर्थः॥ पणं नित्यंपण इत्यपू॥८०॥ जपत्तामिति॥ सज्जपतां नराणां त्र
रूमालासु पद्यारुद्राक्षादि मणिनिर्मित जपमालिकासु वर्तमानानां पद्मारक्तादिबीजानां जपगतणार्थमाकर्षणं तस्य दर्श
नात् हेतोः जीवानां प्राणानां अकृष्टिबाकर्षणं तयाजातातिकष्टानि दुःखानि अन्वाभूत्॥ यस्माद्विपरीतदक्ष विरुद्धव

श्रीसर्वहितं धर्ममहितत्वेन जानातस्तादा धर्मदर्शनमात्रेण महदुःखमत्वत्र इत्यर्थः॥ अथ च विपरीतदर्शितशीलत्वाद्दी
जेस्तत्र व्यंजनमात्रव्रतपेतवयोः सावर्णो न व जीवेतिनवतीतिर्जीवाकृष्टिकष्टात्तु नवनं युक्तं॥ ८०॥ त्रिसंध्यमिति॥ सतत्व
त्रिसंध्यप्रातर्मध्याह्नसायाह्नरूपं संध्यात्रयमभिव्याप्य विप्राणां द्वतं चेत्यघमर्षणकर्मिनामा स्पर्शाभिमंत्रितं तुलकोदकं
तत्त्वं हे पंवापरूपनिजयोदृशोरपकर्षणं उन्मूलनमेव वरमिति मेनइत्यर्थः॥ तदपि हष्ट्वा दुःखितोऽभूदिति भावः॥ अघ
मर्षणादर्शनिव्यथास्त्रेत्रापकर्षणव्यथातुल्या त्रिसंध्यमत्यंतसंयोगे द्वितीया॥ ८१॥ अद्राक्षीदिति॥ नैमीनलयोः व्यतीकस्मा
द्धतस्मात्तु दोषलेशमपि अन्नकामः ८ दृष्टुं वाछन्नत एव तत्र डरेकप्रक स्वमित्रगवेषणे धर्मपरिश्रमणपरितो विश्वरन्ध्र
कलिः कश्चिदपि स्थाने किंचिदपि स्वस्य परिचितं जिनरूपणादिमपि परिचितं पातकं नाद्राक्षीत्॥ स्वयं नैमीनलो उत्पत्रेलो
कोवा स्पृष्टः किमिति कतियर्ष्टिष्ठति॥ तदेकमतिपापं नात्स्येव त्विनावइति वा॥ ८२॥ तपइति॥ पंचाग्निसाधनादितपः वेद
पावत्तपः स्वाध्यायः देवतादेशो नन्द्यत्यागो याज्ञो यज्ञः एषां स्वस्य पापरूपत्वात्॥ द्विद्विषां वैरिणां तस्मिन्तुरे श्रियं सम्यग् द्विवाकृ
त्यं पत्रपत्रो अकाडम्बनिकारणमेव द्विष्टात्सापसा येन स्थिता सा सकलिः उपतपातां तदहमापातिदुःखितो दूभूदि
त्यर्थः॥ अन्योपि स्वैवैरिलक्ष्मी पत्रएव तपते॥ यज्ञापेक्षया स्वाध्यायस्याल्पहितत्वात्पूर्वनिपातः॥ ८३॥ कत्रमिति॥

नै॰टी॰२७

सतत्रपुरेउपनगरायाउपासकस्यसमीपसागतस्थितायाः सजातीयाविजातीयागम्यायाअगम्यायावाविश्वस्ताः
सर्वस्याःस्त्रियःकस्त्रंकामुकंतासंतुंजानंकं चतततरंवीक्ष्यायाँमहापातकीममाग्रेपीनविष्यतीतिबुध्वातुष्टवान्॥
अथपश्चाद्द्विवारण्यांक्षिपमाणायांतंकंत्वंवामदेवेनस्तुतिदृष्टं ब्रह्मचामकयानश्चिवद्भूत्पादिवामदेवनामससामत
स्यब्रह्मविद्यायाअस्तुपासकंविनाव्यमत्वामस्येवदुःखितोऽभूत्॥वामदेव्योपासनेसर्वाःस्त्रियउपसीदंती॥तिस्क्रुतिः॥
दृष्टसामितस्यैर्थवामेवायएवितिष्ट्य॥ए॥७॥वैरिणीति॥स्ववितानांबाह्यास्पंतस्स्ववितामनुष्ठद्विर्गेमयाघृतुलेपनजनि
ताचस्ववितास्तुविप्रवेद्मांतस्मैनददौ।यस्माद्दस्तुवैस्तस्यैवैरिणीनगरमध्येसर्वेषांजनानांदृस्स्वसुवित्वात्स्मात्तुनार॥
कदित्यर्थः॥तथाविदग्धनिरवरेणाद्व्याश्रयेनगरे संवध्युपरितनाकाशा दे त्रोआलंबेआश्रयंनविनाऽत्रवरवेदृधन्या
श्रयत्वा तत्रापिस्थातुंनाशक्यदित्यर्थः॥वासमुद्विये।अन्योपिवैरिणोस्थानंनदद्यात्॥ए॥५॥दर्वास्येति॥सदर्शस्याः
ग्निष्टोमस्यामावास्यायागस्यवदर्शनात्कष्टमहद्दुःखमानशे॥प्राप.तथापौर्णमासंयागमाकृतेएवशीलं.सतदुक्षूर्णे
चेत्रामातदर्शनेनसुमृच्छेत्यर्थः॥सोमयागेतुच्युतएकमेवामत्पतत॥तदर्शनात्मरणमेवावैमतवृदित्यर्थः॥अन्य
स्यापिज्वरादिपीडाप्रपश्चान्मूर्छ्णपितस्वंमरणंसवति॥ए॥६॥तेतेति॥तेनकलिनावारान्स्तृगात्धंतीतिज्ञात्वधर्मजीविनो

धार्मिकाश्चादृश्यपांतावीरानत्र श्लाघानावारवतो ध्वंतीनिवीरहणा। जना दृष्टाःस्वराएवपैर्हन्यंतेन तु सदाचाराः ताद
शामहावीराः एवतत्रतेन दृष्टा इत्यर्थः॥ यद्वा वीरयतेश्चरोत्त्वव निवीरेतितेनस्त्रीवक्लिसंघं तिसुपेद्वयानावायतेति
विरहणेन ष्टाग्रयस्तेपुनर्न दृष्टाः सर्वोपियहस्यः साग्निकएवतत्रेत्यर्थः॥ तथास्य त्रग्निनिर्मुक्तान्वयेषु सुनेषु स्त्रीसे
त्वमेनिताद्वनाम्र्यास्तसयसमयेनि क्षितानमनावारीस्तत्रनापलपत्र। किंतु जीवंतश्चेतेषु केष्वपि तान्विषयपरित्यागिनो
ब्रह्मज्ञानिनोऽवेदंतवीरः प्रावीसुनतयोग्या दृत्तानरूपे वीरान हतवंतस्ते दृष्टाः वीरमारणम पितत्रराध्रेणाक्रियत इत्य
र्थ इतिवा॥ सुप्रेयस्मिन्नस्तस्तेमेतिसुप्नेयस्मिंस्तु देति वा॥ त्रेतमानग्निनिर्मुक्तासुद्धिलोरूपथाक्रममित्यमरः॥ वीरघ्नाम्नस्त
विन्तु ज्वादित्वात्क॥॥ ५७॥ सइति॥ सविप्रान्स्पृष्टं परस्परं यैस्तानन्योन्यस्पर्शिनोऽ अनीन्तुं जानानं दृष्ट्वा तुगोपाठच्छिष्टा
नांमिथः स्पर्शनिषेधात्तदतिक्रमकारिणः स्वाश्रयत्वेन संज्ञाव्यहृष्ट इत्यर्थः॥ अनंतरं होमशेषीनवत्रहोमावशिष्टसोम
स्तत्तुजतेसोमन्नता चूर्णं हुजानाम्स्तात्त्वीद्वयविचार्यदूतवानव्यथितोऽन्नता। नमोमेनोच्छिष्टोऽनवतानिश्चलेः॥ इद्गुरुदंडेतिलो
सोमे॥ इद्गुरुदंडेतिलेसोमेनोच्छिष्टं मनुरब्रवीत्॥ इति स्मृतेश्च॥ सोमभक्षणे उच्छिष्टत्वादन्योन्यस्पर्शोपि पापाभावा
दुःखिन्न इत्यर्थः॥ ५८॥ कृतेति॥ असौ कं विज्जनं रजोहृष्टं धूलिमलिनं अपानिषिद्धस्त्रीरजः स्पर्शवुध्यारवरादिनिषिद्ध

स्त्रीरजःस्पर्शवुध्यावरादिनिषिद्धरजःस्पर्शवुध्यादृष्ट्वावास्वीश्रयाच्छायाहृदितिशीघ्रंतुष्टिंप्राप्नोत्।ततः अनंतरंवि
वागवमेरेपवरसवाधपवित्रंवप जोरजःस्नानेनत्रेनेनवावस्थास्थितिर्यस्यतत्रवावतिष्ठतेतंपश्चपततुःस्थो दूने
अभवत्।वारुणंतुजलस्नानमाप्तोऽहिष्टेतिमांत्रिकं।वायव्यंगोरजःस्नानमानेयंतभस्मनोदितं।पंतुस्नानपरंपवर्षे
णदिव्यंतदितिपंचधेतिमनुः॥पावनस्नातस्यधर्मत्वाद्दूनोऽभूदित्यर्थः।प्राप्नोतुजडः।प्राप्तइतिचपाठः॥९९॥अथा
ति।अपक्वापियद्वाशीलापांगृहेवाहन्यमानांगीवीक्ष्यस्वाश्रयाच्छायामुदा‿धावत्।अनंतरंरूपुतस्नातागाआतिःयः अ
त्यागमतार्थंहन्यमानांवुध्यामदोपुखोसौऽःखवज्ञातमदंशनैर्न्यवर्त्तनपराद्वृत्तःक्षणमपितत्रस्थातुमशक्तः सत्रम
दंशीघ्रंपराद्वृत्तइतिवामहोक्षंवामहाजवाम्भोत्रियायोपकल्पयेदितिस्मृतेः॥१००॥दृष्ट्वामितिः सद्विजंनितातिसं
ध्यास्नानादिनित्यजतितंअकुर्वाणंदृष्ट्वादृष्ट्वावात्स्वाश्रयानहर्षा।अनंतरमेतंयजमानंज्ञात्वातदीक्षंनिरूप्यनिश्चि
तनिराशात्वाद्दीनमुखःसत्रद्रवत्तस्मात्प्रदेशाद्दूरंपलायांचक्रे॥शक्तिनेनददातिनजुहोतीत्यादिश्रुतेर्नित्यने
मित्तिककर्मत्यागस्यवैधत्वाद्दोषाभावाच्चेतोपिपलायितइत्यर्थः।निमित्तिकआगतार्थेनवार्थवाठकः॥१०१॥आननंदेति।
अयंतत्उरिआत्मघातिनेनाम्नात्वर्वस्वारस्पपञ्चस्पपक्वान्नंपञ्चमानंदृष्ट्वाज्ञात्वाविव्यथेआत्मनमरणेहायचिकि

स्परोगाविस्तत्राधिकारी सौ नो ष्टौ सर्वस्वारख्ययज्ञे आत्मानमेव पश्चिमं त्रैः संस्कृत घातयित्वा यज्ञमागमर्यपती निष्क
ति:॥ वैधत्वादात्मघाते दोषाभावाद्यापितद्दूत्यर्थः॥ आत्मघातिनीतं ताच्छील्ये णिनिः॥ २१॥ कृतावित्ति॥ समहाव्रतारव्यक्र
तौ ब्रह्मचारावतयोरत्तमैथुनं परपन्नयज्ञक्रियांमडानाम सम्पन्नाषणादिप्यापारशीलानामकांडतीडवमसमयोऽ
तत्तन्मिवयज्ञेमेने। पतंत्र ज्ञोन्मूर्चैः मंडायथावद्रज्ञ नसमस्तंगुह्यादि प्रकाशयंती तथा दिवेवव ऊजनसमद्भ
शील व्यापार करणाद्यागकर्मभंड व्यापी रतुल्यमितिय द्यौनः सर्वे पिसम्पादनिमेनरत्यर्थः॥ महाव्रतेब्रह्मचारि
पुंश्चल्योः संप्रवाद इत्यपतिषत्॥ एतिनच्छीनेत्वरी स्वैरिणी इत्यनेशेकरपितु क्विवटि ट्टाणञ्जीतिङीप्॥२॥ यज्ञोनि
॥सय ज्ञोनोयजमानस्यभार्यया॥ अश्वमेधाख्यस्ययज्ञसाम्बलस्पलिंगंमलिंगस्ववृंश्चलिवरांगगुह्यंयस्यास्तस्या मा
वस्त्तलानांहष्ट्वाश्को वेदस्यकर्त्ता रंभंडमसत्यमाचष्टाकथयद्यपरास्या न्द इत्यर्थः॥ उन्मत्तत्वादात्मानंप्रत्यवं वा॥
यतोऽयंडितः शास्त्रात्तशारिबुद्धिरहितः॥ पुराणमानवोधर्मः सांगोवेद श्चिकित्सितं। आज्ञासिद्धानिवत्वारिनहं
तव्यानि हेतुभिरितिराजाज्ञावतिविदार्य वेदापौरुषेयः अश्वमेधप्रकरणे अश्वस्यत्रीणि श्वं महिष्याउपस्थेनि
धेनइत्यादिकृतः कत्वनिंड इतिक्रतिकर्तुम्मंडत्वाभिधात्मत्वं॥ ४॥ अयैति॥ अथेवंडरपरिन्नमक्कचन्नादनंतरेक

लिप्सीमजयाम्ने म्याजुष्टं प्रीत्यासेवितं नलं सलोकता॥ कमिव प्रजया संज्ञादित्याय्यवासद्युतेजसा जुष्टं भना प्रद्युम्नसूर्यमि
वा॥ किन्तलथुनयं दुष्टामत्सरादि दोषोपहता दृष्टबुद्धिर्येषां तैः पापरूपैः दुरालोकं दुष्प्रेक्ष्योकत्वात्पति व्रतया चानया यु
क्तत्वात्कलिप्रभृतिभिः सुखेन द्रष्टुमशक्यं काव कामलादिदोषजुष्टदृष्टिभिर्दुर्दर्शं चा प्रत्यक्षत्वात् कायकायकोतिय
स्पाइतिनामीविश्लेषणं च॥ प्रत्यक्षत्वाकायकोत्पायापिभिर्दुरालोकं न रत्नमिक्त्वि॥ दुरालोकं रवत्वे तद्योगेति वत्त
लोकेनिषष्टी॥ निषिधादुष्टदृग्भिरिति निर्दृती या॥ पातयोरिति॥ सत्तये नैमीनं लयासो हार्द्रसात्वैर्द्वै अन्योन्यानुरागो
त्कर्षे परस्परं नल्पमिव हृदि नाराच बन्धमिवानिशं प्राप॥ तत्सूष्यङः रवोन्दृदितपर्थः तथा॥ भयोन्योन्यं तयोर्नमोर्मिनिः
क्रीडाकल्लोलैः प्रीत्याश्लिष्टं तत्तुं बन्तादिभिरतुभावैः सन्नार्मच्छिद्रमिव प्राणहरस्मरशरैर्वपश्च कर्दनमिवानर्छ प्राप॥ सौ
हार्दसंदत्वस्य कारणत्वादालिंगनादिनर्मणश्च कार्यत्वान्न पौनरुक्त्यशंका। सोहार्द्रयुवादित्वाद्रूपं वि॥ गुणि हृतोगे तु
तयपदद्वयं॥ दोक्षमर्षादिति॥ कलिः अमर्षात् नैमीनतत्प्रीतिसमाप्तिहनत्री तत्वरूपाद्दोषात् थाश्वात्मनो मद्
तकादिरूपादोषा धार्मिकाश्रयणादित्येवं हेतुत्रया तनौ नैमीन लोतपदं मनसा किंतु दृशापि नयनराश्मिनापि प्र
स्तुतनीशोऽसमर्थः॥ किंतु नार्दतादिता एवं तत्तो यत्तोतत्तस्मान्नलावासप्रासादाद्दपिस कारणात्तत्कलिरवर्त्रिगत

एवंविधौ तौ दृष्ट्वा तत्रापि प्रवेष्टुं मशक्तौ स्तनौ तौ पि प्रस्थित इत्यर्थः ॥ अन्योपि मलिनस्तेजस्विनं दृष्ट्वा वीत्तद्विहमप्य
शक्तस्ततः पलायते ॥ ७ ॥ आगच्छदिति ॥ नलद्विषी नलद्वेषपरः अतएव तत्पराजयार्थं आश्रयान्वेषी निवासमृग
यमाणः मौर्ण्यां कुत्रचिद्दर्पितदलाग्रा द्वारवीदमर्षेण चानिः स्वन्तनस्ककलिः रामेण श्रीरामचंद्रेण समातुल्यात्रीः शो
भासप पस्यलस्यनतस्याभिरामवृक्षादिसमृद्धिमत्वाद्रूलनीयं स्टहारामप्रसादसमीपवर्त्तिक्रीडाकंनं आपन्नः स
मीपे स्थितो क्रियमाणायां नलदोषनिवारः शुश्राकरतिस्टहारामं प्राप्तवान्नित्यर्थः ॥ श्रीरामसन्निपि नलस्य पावित्र्यसौ
दर्यं सपदाविकर्षं भावी राज्यपरित्यागश्चेति सूचितं ॥ तदानीं राजस्य भाविविवेक व्यपेक्षया तत्तत्वात्प्रवाहस्यानादि
तपावान्तत्वादुपमा युक्तेवेति ज्ञेयं ॥ नारकीति ॥ कलिः तत्र पुरे कीर्णां रक्षकानां तक्ष्मं घस्तित पद्मः तत्वं परिवेष्टि
तत्वं तेतहेतुं न प्रवेशप्रावी त्राप सनिमिजस्यबाधराइलमत एवमना कुई षत्स्वानुरक्तं खमोहतमेवंविधं मेने ॥ वि
शेषेण वला दिशेष्या द्वेपात मारामं स्वहितमेत इत्यर्थः ॥ यतो मानी अभिमानवान् ॥ नलपराजयार्थं तत्रैव निवास
वांछां दधारेत्यर्थः ॥ ॥ किलप्रसिद्धे ॥ रक्षिलक्ष्मात्वेनैव बाधकेन पुनस्तपोधनैर्बाधकस्तत्रपुरे तमारामं रामं मेव
मनोन्नस्वहितमेने ॥ रक्षकबाधनेमत्तपि अभ्युपतवापि स्वस्य प्रवेशाकमत्वात् ॥ तत्र तु तपोधनबाधन इति मनापि

तुल्यं॥ एवसंकटे किमिति न्यवात्सीदित्यत आह॥ यतोमानी॥ अभिमानसाधनायमंविनाश्रयेन्नकृतमदवृद्धि
जन्मजेवाग्निसंधिरावायो यस्यैवविधेनवादलादिभिदेवपूजां कर्तुकामेनततेनाजितानारोपितानामन्यादिद्रुमा
नन्नाक्रमितुंआरोढुमाश्रपितुंवनप्राय॥ तेषां धर्मोपयोगित्वात्तस्य च पापरूपत्वात्तान्मविंतुनाशकदित्य
र्थः॥ ९०॥ अर्थयति॥ अथसकलिः धर्मे धर्मकार्यविषये कर्मठम कर्मशूरमपिपत्रादीनादेवाद्युपयोगाषमका
र्यनिर्हमपिसर्वथास्तुच्छिदावृक्षाणामासन्नतः मात्रिश्यस्य शरणाय वृक्षलतागुल्मादिजातमत्रास्तीतिकौतिस्ति
मत्वाया। तत्रैवाद्यानेनलेनतरापि तं वं एकं तर्वरूक्षमाश्रित्य शरणे सेके नैव बलात्त्वादिकमसंरव्यं विनीतकं ऊर्ध्वं दृष्टं
दर्श॥ अनोकिहः कुटः शालस्तपतरः॥ कर्मणि घटतइति कर्मणिघटोठव॥ कर्मशूरस्तुकर्मठः॥ उच्छ्रिदस्तु
रुगुल्माद्याइत्यमरः॥ ९१॥ नइति॥ सततसिन्निवेतेनैषधसेवधस्य तिकटं समीपवर्तिनं निष्कुतस्य दस्याश्रयरहि
तस्य कलेः स्थानदानात्स्वेनैव तदाधारत्वात्स्वक्रीतकः केवलनिवासत्वात्कलिद्रुमः कलिसंबं
धीद्रुमः परं केवलमामीदितिना किंतु कृतिप्रतिलाषस्मरणात्कल्पद्रुमोप्यासीत्। अन्योपि निराश्रयस्याश्रयदा
नात्कल्पद्रुमत्वेन व्यपदिश्यते। तत्रावासः कलिद्रुमइत्यमरः॥ ९२॥ पापिनापि कलिना क्रीतकः स्थानंप्राप्तरत्न

त्र हेतुरुक्तो दृश्यते ।। दद्वाविति ।। यद्यस्माद्धेतोः कलिप्रवाहानादित्वात् पा॰ ततो कलियुगसमये धर्मस्यैकेनपदेन त
त्वतुर्यांशेन स्थानं ददौ ।। ततस्तस्मात्तदातनराज्यक्षये कृतयुगे सविज्ञीतकोपि एक एव तस्य कलेः पदं वरणे॰ष
वमानममिलत्तं जात इत्यहं मन्ये ।। हतं कर्म तज्जपत रतिन्पयिन कालांतरे यावद्दत्तं तावदेव तदानीं तेन लघ
सहं मन्य इत्युक्तेर्दृश्य धर्मस्यैवं विधमात्र विवक्षया षष्ठी ।। ११ ।। उद्भिदिति ।। तत्रोद्याने उद्भिदि दृष्टे विज्ञीतके विर
चितः ।। आवासः स्थितिर्येन स कलिः साग्निरग्निहोत्रवतः छिद्रात्सूत्रिपात तथादीक्षितात्त्वीकृताग्निहोत्रादि
यागदिदात् ।। अस्माद्धा नः अभिषेकादिगुणयुक्तान्नलात् सकौशात् सम्यक् त्रासं महाद्रापति ग्रहं प्रापाराज्ञो दि
जादिसेताभ्यां स्वाभाविकनिग्रहे सामर्थ्यस्तत्रचिता सोग्रेदीक्षितादिसेताभ्यां वतपोजनितं शापे सामर्थ्यस्तूप्रितं स
वं विभीयं सन्नापस्थितमानि भयेन नाम्यपतिशापं वदास्यतीत्यंत महद्भयं प्रापेत्यर्थः ।। अग्निहोत्रिणो नलस्य सं
बंधिनोत्र तत्र यज्ञदीक्षित्र स्मादति प्रसिद्धा द्विजा ब्राह्मणा यो तमारव्या स्तुरोधसः सकाशाद्भयं प्राप नला
ग्निहोत्रादि परिचर्या यत्र वर्तमानात्स्वयमप्यग्निहोत्रादि दीक्षायुक्ताद्योगे न मास्तुरोधसः सकाशाद्धीन
इत्यर्थ इति वा ।। कस्मादिव कपोतादिवा यथा॰ ग्निसहितो दंगारज्ञद्दिणः सकाशात्त्वद्धो विरचितावासः काका

दिः पक्षी पुरुषो वा दृष्ट्वा क्रुद्धो दृष्ट्वा धःस्थायां वाभयं प्रापत सर्वं कदाचित्त्वयेत्तु पमानस्य यथा प्राप्नोतीति तथेत्यर्थः॥
अग्निः कपोतजठरमंतः प्रविष्टो न एव तान्दहति। पाषाणकणिका पिपीलिकार्जनं दृश्यते इति ह्यं। पाश्चात्यारस्तन्वि-
णः कपोतविशेषेण आत्मनं न्नयति उच्छिदातृलकाष्ठादिना निर्मितगृहः पुरुषः अनुसारितैनीत्वा पकेव-
नमात्रेण ग्रहदानाहाय्यनिष्ठस्तस्य काङ्क्षो हि परिविलोकितात् कपोतात् घूकात्पक्षिणः सकाशाद्यथा भयं प्राप्नो-
ति तया मावपि प्रापकपोतो हि गृहं प्रविष्टोऽनिष्टसूचकः। एवमनुतकर्मणोऽनिष्टसूचकश्च दृष्ट्वादि रोहिणी दृष्टा
कपोतीतत्कृत्वा सी पक्षी नैवास्यापि न क्षणात् शंकया शारवापतनशंकया वायथाक्षिन्तितेयेत्यर्थः। एवं य-
थामतिव्याख्यातव्यं॥५॥ विनीतकमिति। विनीतकमधिल्लम्याग्निस्पतथाप्युतेन तिष्ठता तस्य धर्मोपयोग-
भावात् न पराहितेन स्थितवता पवता दृष्ट्वा नलदृष्टानां सर्वोक्त प्रकारेण विस्मृता सता स्थितेन तेन कलिना नीम-
न्तुवोऽग्नीकेन्यैः कामुकः सराजावासो रुषिस्थराजत्वेपि धर्मप्रधानत्वान्नु नितुल्ये नलः नाधर्षितपराक्रमः अप-
त्सेवे राजर्षि त्वमेव हेतुः। अथ च विनीतकतुल्यं तत्कमाश्रित्य तिष्ठता तथाप्युतेन च्युतत्वं प्राप्तेन केनचित्स्येन न किंचि-
चिन्तनीमप्ययानकापाप्तसेरनच्युतेनकन्यसेवाहितेनोस्त्रीकोलनयहितः। राजर्षिर्धार्मिकोन पराभूयत इत्युचितं। नैमानु
नै

मिमनाहत्पनिर्णयइत्पनादरे षष्ठी ॥ १६ ॥ तमिति ॥ कलितं विनीतकमाल्यं वनमाश्रयमासाद्य प्राप्य वेदत्री निषधेश्वरयोः
कलुषा पापाश्रवणाम त्विष्यत ॥ गवेषपितुमिर्थः ॥ वकृत्वृत्सरानवासीत ॥ दोषसंस्पर्शनेन विना तयोः परान्वेषा शक्तत्वा
दोषपरीक्षार्थं चन्द्रकालं तत्रैव स्थित इत्यर्थः ॥ इत्यर्थः ॥ अत्वेष्पत हि नोशना ॥ अवासीत् वसेर्लुङि सिविवद व्रजेति वृद्धेः स
स्याईधातुकं इति निल्वं ॥ वत्सरानसंततसंयोगे द्वितीया ॥ १७ ॥ यथेति ॥ तत्र कानने तस्मिन् ऋतुघाते यथा येन प्रकारेण विनि
द्रकलिका विकसितकोटका तस्त्री आसीत् तथा तेन प्रकारेण नलस्य छलेआसक्तिः रमितिः क्रांत्तदृष्ट्या निद्रा जागरू
कः सावधानः कलिल क्षणः कालः समयोपनस्ल वस्त्तासापि तत्र घेने आसीत् ॥ सदा विकसितकोरक वन्नीसंबं
धत्तस्या यान स्यय याह तथा सदाकृतिसंबंधोपपन्न दिति तावन्मात्रेण दोषमिति ॥ लोकावाद रूपं अनित्रा स्तिरूपं व
नलस्य दोषं जिज्ञासुश्छपरइति अघटमानया उत्त्ग्रायान्वितो बन्धाम इति किलोकस्य पुरेव जननवत्तयापि अदोषो दोषर
हितः कोपि नरो नास्ति सर्वो जनो पनिर्दोषमाहता हन्त पुरुष एव नास्तीति नलस्यापि कंचिद्दोषं कोपि वदिष्यतीति ॥
न दोषइति पाठे लोकोक्ता वल्पापि दोषानास्य पितुप्रायेण विष्यतीति उत्प्रेक्षेयति काक्कार्संजा वनपरत्वेन व्यारव्येयं ॥
दोषं न लोके तिषष्ठी निषेधा ॥ १८ ॥ अमुमिति ॥ असौ कलिः रपाम पन्हं सजातीया कादंबविहगाः कलहंसारव्य प

द्भिर्विशेषणैर्षा छिदाः पन्नास्तेषां छायया कांतेरस्त्वंगेउ वितायोग्यातैलाभ्यंगनैवसंस्पर्शमात्रेण स्नैग्ध्यातिश
यकारिणी श्यामतरा रुचिः कांतिर्यस्य तस्य नाबस्तनातया स्वच्छवर्णतया वनेचं देलांछनमृगः कलंकः कलंकमृगेणो
न्नता।।किंभूता।।सततं सदा निपतत् निक्षिप्यमाणो धूपादिदौहृदो यत्र तस्य चाबस्तनातया अनिशं सदाउन्निद्रैर्विक
सितैः।प्रसूनैर्मल्लिकादिभिः तरुश्रेष्ठैः स्तबकोद्गलनादानदृढा विल्वा अमृतांशोश्चंद्रस्य प्रतिभटे प्रतिस्पर्द्धिनि चंद्रतुल्ये
अलुप्तिन्सर्वीके आरामेनलोद्याने बद्धन्लग्न आलंबावासो येन सः। व यहि कलंकेन नवितर्व्यं तत्स्थाने केलिरेवाच्छ
दिति।एतेन निर्दोषेण लोद्याने केलिरेव दूषकोन्नत्तिरित्युक्तं।।तत्र त्वं वात्सी दित्यर्थः।।उष्णफलानामा कालिक
नम्रद्वये छेदेष्ठ छद्माउवेदाख्यो धूपादिदौहृदः क्रियते।।यथाश्चंपके पिण्याकादि जलदोहः बकुले सुंदरी गंडूषज
लमदिरासेकः रक्ताशोके वतरुणी चरणप्रहार इत्यादि।।२०।।स्फार इति।।स्फारे विशाले तरेतादृशि च प्रकारेण
धर्मबकुलेस्फारत्वेपि सर्वत्र धर्मप्रणैवै रमेनिर्निलस्तस्य नगर प्रजाना पुरप्रैः हेतुनिर्घनं रूपं स्वंविघ्नं लव्ववतः
प्राप्तवतः निराश्रयस्य कलेः तस्मिन्नु लोद्याने विराद्धकालं नलदोषरावषणार्थं उपनतिरवास्थितिः।।किलाच्छ
त।।कलेरिपुराणदोक्षपत इत्यर्थः प्रजानां पुरप्रैः स्फारे धाम्न इति वा हेतुगर्भं विशेषणं।एतस्मिन्नंतरे वसरे

नै०टी०१७ त्तुनरन्योन्यपयोगपमेलनादत दतर्मनंमित्रमितार्तं दः प्राप्तानिः मीमहर्षैः स प्रसिद्धः॥ प्रभावः स्मरः नैमीनलौ त्राराद्धु
मेवितुंसुतरांपी उयितुंवा धनुः क्वाति शिरवाकर्णं धृदेन्न स्तांवर्दारूः स्वनी चूडा अटनिरप्रनागोयस्यैवं विधमाकर्णंव्याधि
नवकारा नैमीनेलो नगरंभ्रा मेस्तुरेडु स्वर्गतेडु कलौव चनावलं बिनीमती तरानुरागा तिन्नायिन चिरविरहा तिसस्टेहे
स्ससर्वज्ञस्वक्रतु रितिभावः॥ अनेनोन्नर सर्गे मनोगारं नवर्णनात्संगतिरूचिता॥ कलिकर्त्तृक परामवस्य नविषयत्वा॥ ना
यकापकर्षस्यावर्णनीयांत्वासतोक्तः॥२२२॥ श्रीहर्षमिति॥ एककर्तृत्वात्स्वसुर्नगिन्याछिद्रस्पराजवित्रोषस्य प्रशस्तोवर्ण
नायं थस्यसुसदृशं तुल्येतद्ध विश्री हर्षेरचितेसप्तदशानां पूर्णः स्वभावसुंदरः सर्गः समाप्तः॥ ॥छिंद प्रशस्तिरपिग्रंथोम
याकृतइतिसूचितं॥ सोदर्याश्चतुल्याभवंति॥ छंदः प्रशस्तेरितिपाठे छंदोबंधा क्रमस्वरूपनिरूपणपरस्परग्रंथेस्मन्न
र्थः॥ सप्तदशाद्भुतिः॥ नस्पष्टरणाडूतिडडू॥ तत्रुविनाषितंकुरुक्तं॥२२२॥ ॥इति श्रीवेदरकरोपनामकश्रीमन्नरसिं
हपंडितात्मजनारायणकृते नैषधीयप्रकाशे सप्तदशः सर्गः॥१७॥ ॥छ॥ ॥श्री॥ ॥श्री॥ ॥छ॥

५९

॥श्रीगणेशाय नमः॥ ॥सोयमिति॥ सर्गसंगतिरुक्तैव। सोयं उक्तसौंदर्यादिगुणः प्रभावो नैषधो नलः इत्थमुक्तप्रकारे
गात्रे लोकनायकसमर्द्धदारसारं स्त्रीरत्नभूतां तां भैमीं द्वादिनिरप्यमिलषमाणां नीर्मनंदनांत्र्यधिगत्य इतीयपुरुषार्थवा
रिधेः कामरूपदुःखगाह जलधेः संबंधिनी पारलंघनतरी परतीरप्रापणे नौकारूपां तां भैमीं मरीरमतरमयामास। तादृ
ग्पाविना कामपुरुषार्थपारं कामशास्त्रोक्तुतानारंतपारं तप्राप्यत्न इत्यनेन सोयं दर्शितगातिस्मवस्तुचिता। अन्यापि त
रीवारिधेः पारं प्रापयति। तारणात्तरीमित्यपि पाठः। अरीरमत्तरमे एषंता स्त्रुडित्वडिः सन्वह्रावादित्वादीर्घः। अनुरा
गातिशयाद्दहोरात्रं तत्संभोगे दोषमात्रं क्यपरिहरति। आत्मविदिति॥ ॥स नलस्तया सह दिवानिशं त्रौ गत्वा रूस
न्नपि देवामे श्रुननिधातिक्रमजनितं पापं नाप। यतः आत्मवित् जीवब्रह्माभेदबुधिमान्॥ उक्तमर्थं युक्त्यंतरेण दृढ
यति॥ हियस्मात् अत्र आहृता कृत्रिमा विषयैकतानतां स्त्रक्चंदनादिविषयपरता ज्ञानेन परमात्मज्ञानेन धौतं क्षालि
तकामक्रोधादिमलं मनो यस्मात्तं पुरुषं न लिपति। पापसंस्पर्शविशिष्टं न करोति। स्वाभाविषयपरता पापासंजिनी। परमात्मा
ज्ञानवतः सा न भवति किंतु भोगात्पूर्वकर्मक्षयार्थमेव सा विषयपरता मंगीकरोतीति आहार्यविषयपरता ब्रह्म
ज्ञानिनं पापिनं करोतीति आत्मवित्सपापं नाप। इति युक्तमेवोक्तमित्यर्थः॥ विषयपरताया आहार्यत्वे दोषाभावा

दिवारात्रं तया सह विक्रीडेत्यर्थः॥ देवी निद्रामत्पं तत्संयोगे द्वितीया॥ ॥ दिवानिद्रां संभोगे राज्ञः परदूषणं कथमित्यत
आह॥ न्यमेति॥ मनलः मंत्रि सुराज्यं न्यस्यानेकवर्णमणिकोटिकुट्टिमे नानावर्णरत्नमयकुट्टिमे बहुभूमिके तथा हेमस्तभित्ति
तिसुवर्णभूमिधारिणि सौधरूपे प्रासादरूपे सुच्चे पर्वते प्रियासखः सन्मदनं आदरादाराध्यात्मारराध सिषेवे॥ प्रि
यासख इत्यालंबनविभावः॥ कामस्य धर्मविषयत्वं च सूचितं॥ अतएव तद्वर्णनं प्रस्तौति॥ नैकवर्णेत्यादि विशेषणसा
मर्थ्यात्कुबेरो हेमाद्रिः सौधस्तु वंवरतिमलप्रसादाकारेण परिणतेऽनेकवर्णमणिकुट्टिमे हेम्नः सुवर्णस्य भूमि
त्ति पर्वते हेमाद्रौ॥ प्रासादस्य सौंदर्यं चोत्तं सूचितं॥ इत आरभ्य सौधेति यावन्महाकुलकं॥ श्रीवीरसेनेति॥ यःसौ
धन्यधरः वीरसेनसुतस्य कं व भूषणं तत्ता दिव्या मनयस्तेषां पंक्तिर्यैस्तत्कल्पबीजमवचिंतामणिभावात्तस्य प्राक्किलि
रलौकिकसामर्थ्यैः कृत्वा कामनया अभिलाषमात्रेण परनंमतः सन्निहिता नवृंतो नलेनान्येवा लभ्यमाना इष्टा अर्था
इष्टापदार्था यत्र तत इव स्ततास्येव गुणस्तस्माद्वितीः र्टणाः हृतः सुपर्वनां पर्वतो मेरुर्येन सः॥ सर्वार्थदायि चिंता
णिरत्नस्य मेरावत्रवविद्यमानत्वाद्यो मेरुतुल्य इत्युपमा॥ अत्र ब ऊनी चिंतामनीतां स्फूत्वा नतो प्राधिकं वा॥ ४॥
भ्रमितमिति॥ सेवकैः श्यामलैः अगरुसंज्ञकैः सारैः श्रेष्टैः दारुभिः काष्टैः स्थिरं यदुदरां बरं पदी यो गर्भतागः धूपितं वा

नै० टी० २ सितं ॥ यद्गुदरावरंध्रपार्थदह्यमानैस्तैरर्पितपरिमलमित्यर्थः ॥ तत्र धूपजसंतापत्राजनाय जालप्रकारेषु सर्वेषु ग
वाक्षेषु जालानां वा जालेषु गवाक्षेषु सं घेषु भृतः स्थापितः चंद्रचंदनक्षोदः कर्पूरचंदनकल्पितेन मेदुरः पुष्टस्तस्य
रविन्यासाच्छिशिरतरः परिमलवहनमयः समीपेवायुस्तेन तत्री तत्रंत्री तत्ररो सर्वेष्वपि उदीपनिचित्रावाः ॥ जालजाले
प्रकारे द्विरुक्तिः षष्ठीसमासो वा ॥ पाठांकेति ॥ महासुरभिचंपकादिद्रव्यसुगंधितैलयास्त्रा एवं विधा दीपिकायै
स्तो धन्यः प्ररं कापि तेमी न लाललंकृते देशे वितिमिरं विगतांधकारं ते निरे राजनिकटस्था दीपाः कर्पूरादि द्रव्यवर्षि
या क्रियंते ॥ पुरस्य सर्वदीयालान्हानस्वाङ्कादि जटागेदे ॥ समेः समधुत्रि धूपो मतः ॥ कामहारान्निधकृतिकामद्वारो
धूपं ॥ दार्कुंकुमेति ॥ यस्य पुरस्य ध्वा निरमनीया निमणिकुंदिमा नियासु तान्नवरेत्तुः ॥ किंभूताः कुंकुमवएनमद
कस्तूरीवतयोः पंकेन कर्दमेन लेपिताः ॥ तथा जलमध्ये निक्षेपात् द्रवीभूत हिमवालुकांबुभिः कर्पूरवासि
तोदकैः क्षालिताश्च ॥ कालुकांस्तु निरितिपाठे शुभ्रकर्पूरवर्गैः क्षालितत्वाच्छं रेनाः सत्तरंगमालिकाइत्यर्थः
अत्र शाद्वि पिक्रमोघटते ॥ लेपिताः स्नताः ॥ ८७ ॥ निषधेति ॥ कचन नलनिद्रास्थाने देशेस्मून नत्र्यायथाउ
स्मरचितास्तरणेन जयस्य सौधस्य संबंधिन्या तुबोन्भेभ ॥ नालस्य ललाटस्य तिलकस्तस्य प्राग अभूतारम

कि

णीयता॥ अम्राजिर्धूर्त्तपुष्पराय्या यद्भूमेर्ललाटतिलक इवरेजइत्यर्थः॥ अथ वयस्य एवं विधि निकुंचन दसेन लांग मंद्रं
धेनामोदादि अकरुपपुष्पत्रायातुल्ययातिसृष्ट्यानेम्याशालंतिलकेनयाप्रस्तानाधकात्रामाननासा अम्राजिन्नं जिता। सं
लोगवशातिलकस्यस्पृष्टत्वादित्यर्थरतिना॥ अम्राजिपक्केन जेस्वविनि॥ तित्रोप॥॥ग॥ कापीति॥ कापि कुर्विंद्रे देशे यस्य
सोधस्यनिकटे निष्कुटे स्हारामस्तेलंतनो विकसंतः कोरकप्रकाराः मल्लिकादि कलिका समूहा स्तेषां सोरभैर्मिलिं
सोगंध्यपरंपराभिः नामनंदनाया:नासिकापुटिकुटीनासिकापुटरंरध्रस्तृपत्रअल्पस्हतंत्रकुटुं बिना उत्रकलत्रा
दिसहावस्थापिता॥ सांद्रं नितरां अद्वियतां गीकृता॥ अल्पस्हे बहुकुटुंबो यथा स्वं मंदे नवसनितथा नेमी नासिकायां
तेरुषितमित्यर्थः॥ वनोपांतेषु दत्तदृष्टिर्नैमास्तकलपुष्पपरिमलं॥ यत्रप्रसन्नमस्त्वरूदितित्राव॥ अथ वमैती नासाश्वा
ससोरमतुल्यतायन्निकट वर्जिवनपुष्पसोरैनैः धृतेत्यर्थः॥ ॥ग॥ कद्वेति॥ आम्रुगोवाछु:कद्वा:पुष्पफलपलवादिसमृ
द्धिमंत:सर्वकृतुद्वत्सावसता दिसकलर्तुसंबंधिन आ माद्यो ह्यदृयस्यांसा कद्वा: सर्वकृतव: सर्वे वृद्धास्युत यस्यां
वातस्यांवाटिकायांकीरै:शुकै:चंचुपुटैस्तत्वा कद्वानि खंडिता नियानि यानि सहकारपुष्पानि फलानि वा तेषां सीकरै:म
करंदर्धिंदुभिर्नियमितविंदुर्नितिउपदामि॥ तद्रूपेस्पहारेस्तत्वायज्ञयुयोयत्सोधसे विनानलस्य नेम्पावायस्यकस्यापि

नप्राणवातंनासाश्वासरूपं प्राणरूपं वा उज्जयुगेयत्संबंधीवावायुरर्थात् तेनमीनलयोरन्यस्यवाश्चं चतिस्माद्दुजत
सहकारस्तरुष्पफलेवा प्रत्यस्यपुष्पमूलेश्विनिफलेलुगितिवालुक्। यन्तु षड्इतिकिं बंताग्षष्ठी पश्चेद्गुपधात्कं
॥७१॥ क्वचिति॥ यः सौधः क्वचित्प्रदेशे कनकेन निर्मितमखिलं सर्वं धौन्नागादियङ्गेवंविधः। कपि विमलैरत्नैर्जति
र्वितः। तथा क्वचित्खचितरचिताश्चित्रशाला उपरि तमान्नमण्डपविशेषाः भ्रत्रिकावा यत्रारस्थिरचित्रेणशीलतेतछ
लीवा॥ काप्येवं अस्थिराणि रव्यवस्थितानि विविधानि प्रकाराधराणि कादिरूपैः प्रकारेरूत्वाऐंद्रजालिकत्वेन कच
मत्कारकारी ऐंद्रजालिकेति ञ्याताशाह्यात् स्वार्थेसंज्ञायांवाकनिप्रत्ययस्यादितीत्वं। पदूतात्छील्यतिनंतात्स्वार्थे
कत्वऐंद्रजालिकः शिल्पमिति ठक्। विधाविधौ प्रकारे त्वमरः॥ ७२॥ चित्रेति॥ यः सौधः वीक्ष्याश्चर्यानिरूयायात्स्वकं
वारशिरः धुवन्कंपयन्शीलिनां अति चमत्कारिनानां वस्तुनिर्माणेनिपुणानां राद्रताजाश्रेष्टोब्रह्माविश्व
मविाजरयाद्दृत्वेनवातकीवातरोगी अकल्पितकिंतो देवादिशिरितिशेषः। किंभूतं। चित्रेआलेख्येचित्राण्याश्च
र्यरूपाणि वानितेषांतेषां अनुकार्यानां अभिनेयानां देवर्षिमनुष्याणां दीविभ्रमं विलासं विशिष्टांतन्ज्ञातिवाश्च
र्यरूपाणिनी उत्पादयंति एवं भूतानिशुल्कानीलपानादिवर्णवशीत्काष्टपाषाणरूपास्वर्णादिघटितत्वाद्वाऽनेकविध

रूपाणिनानाप्रकाराण्यरूपानिरूपकानिप्रतिमायत्राश्चित्रमाश्चर्यंतद्वैनिविस्तारयंतिचित्रतंतेताट्टस्थानीतिवाहृव
वत्। अचेतनाःखलीकाश्चपिप्रतिमासुचेतनत्वादित्रमोस्यादिनिर्माणनैपुण्यात् तत्परंकंपितनिर्लालाशीलिराडपत्र
ह्लाविश्वकर्माकिमयंजरयानिर्मितोकृतवाधिक्यप्रबलिग्रीवइत्युत्प्रेक्षितइत्यर्थः रमणीयतमोयइतिभावः। वातकी
वातरोगीस्यादस्मरः। वातकीमत्वर्थेवानासाराभ्यांऊर्क्षीतीतिऊक्ष्म॥२१॥भित्तीति॥यस्मौधः।भित्तिगर्भेयगृहाः।भित्तिभि
राछर्दिताभिश्चदृश्यमानविवराणिगवाक्षागारानितेष्ठुतेवाणीपितैरदृश्यत्वेनस्थापितैर्जनैः रूत्वाकृतंश्रुतकथादि
कौतुकंश्चार्यजनकरमणीगोष्ठीगीतनृत्यवादित्रादिसंबंधिकौतूहलंयेनसः॥तथातपनिउष्णब्रह्मलेगीषंत्रवपिजल
धारासंचारिमंडपर्यंकादिरचितजलयंत्रेभ्यः।पालुकैःनिर्गमनश्रीलैरासारैर्धारासंपातैर्द्दरणेनराणांधृतानिराकृतानिताता
पजनितातंद्रिकामूर्छाभिःसहृतायेनसाद्रीनत्वात्सुखकारीइत्यर्थः॥तामसीमत्वर्थीयप्रकरणेज्योत्स्नादिभ्यउपसं
ख्यानमित्यण्।तंद्रिकातंन्द्राख्यात्स्वार्थिककनिकेतइतिकश्चः॥२४॥यत्रेति॥यत्रसौविश्वश्रुषितोऽविस्मितोनागदंतरूप
नस्थानेगृहावयवचूतेगजदंतनिर्मितैःपंजरेययामानथ्याउष्पशरस्यकामस्यवात्स्यायनादिप्रणीतेशास्त्रेतस्यका
रिकाभ्यासबाहुल्यात्महाशास्त्रनिर्माणसमस्तशाश्वतकरोतिएवंभूतासारिकापक्षिणीनामजानिषधसार्वभौममयोजैमीन

नो

नै०टी०१८

लयोः रतेविषयेचुंबनालिंगनादीनांप्रसक्तंकृताकृतेविहिताविहितेकर्मणिकृतेप्रत्यवेक्षताचुकारेणानुसंदधेआलिं
गनादीनांबहवोभेदाःकामशास्त्रेनिरूपिताः।तत्रकिंविद्धालिंगनंकृतंकिंचित्रकृतमित्याद्यपत्रपदित्यर्थः।अनुवदति
स्मचअनुकारेत्यर्थः।अनुवदतिस्मचअनुचकारेत्यर्थः।शास्त्रेश्लोकरूपाकारिकाभवति।यद्वादौब्रह्मादिःकृताकृता
विद्धकोभवतिनागदंतिकाशेषाद्विमायेतिकपिप्रत्ययस्थादितीत्वं॥२५॥यत्रेति॥यत्रसौधेमैतैःकलंबिकैःस्व
हचटकैःशीलितानांमुहुःक्रियमाणानांचुंबनादीनांहित्वाज्जनसमक्षंकरणेअश्लीलानांग्राम्याणांकेवलं॥
नांसुरतक्रीडानांउपरुद्धैर्वर्जितेयत्रतैर्वाकृत्वाउपरुद्धिमुक्तंयथातथाकापिकस्मिंश्चित्प्रदेशेवापिकायांउत्तम
भूतानिभूषणीभूतानितत्रवर्तमानानिहंसमिथुनानितेषांस्मरोत्सवःसुरतक्रीडातयोभैमीनलयोर्दृष्टिभिःस्वद्व
पोरेवर्तिवापिजलेभिअदर्शीत्यर्थः॥आदौकलविंककेलिर्दृष्टानंतरंचहंसकेलिरितिपुनःसुरतेप्रवृत्तात्पुनरु
क्तिः।रतांतेस्रस्तगात्राणांकामिनांतिर्यगादिसंभोगदर्शनंपुनःकामोद्दीपकंभवतीतिकामशास्त्राद्वतिर्यक्
संभोगंपश्यतःस्मेतिभावः॥२६॥यत्रेति॥यत्रसौधेसंभोगंकुर्वतोस्तयोभैमीनलयोःसुरतःकूजितंकंठमध्यस्था
त्कमधुरस्वररूपंवेणुरवैर्वीणाशब्दैःस्तथावेणवस्वरैर्वेणुसंबंधिभिर्गीतैः॥तथाउपवनानिकालिनांआरामवर्ति

४

नांकोकिलषट्पदानांकुहूकृतैःकूजितैःसंकुजानाभ्यांताभ्यांनृत्यंतोयत्रदृश्यंतेतैश्चतौनद्वयोरितिनाद्वयोर्देशेनृत्यती
स्त्रीपुरुषाणांकेयूरनूपुरादिभूषणगणानांकलहेरत्योन्योपमर्देहितत्रसिंजितैश्चकुत्रकुजितंमंदिरंतमाच्छादितंपित्पर्यंतःस्वी
तत्रपुमानपिस्त्रियेत्येकत्रैषःकुत्रकुजितंकरोतीतिएपतविष्टा॥८१॥सोत्कृतानीति॥अपवरांतरेगर्भगृहेमध्येरतिस्मरस्य
तिमागृहेपिदयान्यस्मिन्वागृहेस्थितावपितौभैमीनलौदिवागवाक्षेष्वपिमिथश्चित्रमादकोष्टगृहतिवासवन्नादन्यानाक
र्णनवुध्याविशंकयाःशंकारहितयोःससंभ्रमंकूजनतऊर्ध्वतोस्मिन्नोधेप्रतिष्टितयोःउरोधस्तोमंत्रसामर्थ्याद्वैतन्यमवलंब्य
प्रतिमायांकृत्वादि — नयोःरतिस्मरयोःयेत्रर्वैसुवर्णादिरचितप्रतिमेतयोःसीत्कृतानिनखदंतरवैकृतजपीडनुभाव
रूपकानिसोढ्वास्थानिशाहितानिनिश्चीरात्रौकपटःऊढ्यनांत्रलीकमिजिंत्रमत्ताजितैर्जलकेगवाक्षैःकृत्वात्रस्थगुण
नां॥दिनेरजनादिमिलीनांतावकूप्रकाशान्नावान्नाभिरेवकपटऊष्मवांत्याजितानिजातरूपैनैवप्रतीयंतेनतत्प्रति
ष्टासामर्थ्यात्सचेतनौसुरमलेलुपौरतिस्मरावपिगवाक्षेषुदिवाजातमिथश्चित्रमौवपिकुड्यच्छमेणाविवार्यवविशंकोय
स्मुरतंवक्रतुजालमार्गेणद्वाक्षसंचाराच्चतत्कूजितानितोश्रुश्रुवतुरितिभावः॥उरोधस्तोमंत्रप्रभावाध्यस्तचितःतंदू
लतृणादिमंडलिप्तंचित्रमयंवस्त्रंकपटऊढांदिवात्सप्रवेशात्मिवागवाक्षेषुचित्रपदाप्रियंतेरात्रौचपवनागमार्थ

नै०टी०१० मपनीयंते॥ तथा वदिन वद्गात्रा वपिकद्रुबुध्या क्रिां कं मणिना निवक्तुरिति वा॥ अथ हंसेनोत्पाद्धाये देतीत्यपदवरिंप्हे
हगत्ती पश्चाघच॥ प्रहिंडुतिरश्चाडुंसांत्साघमर॥२५॥ रूल्वेति॥ रूलोवर्णः सारस्थे श्रेयस्यतस्यमृगस्य शृंगावद्रुंगुरागि
वक्रीबऊन्नं गिरिश्रुक्कातथा स्वादुः अतिमधुरं अतएवो ज्वलाऽप्रकाशः मानाः शृंगारादयो रसास्तेषां उज्ज्वलस्य शृंगा
ररूपस्यैव वारसस्यैकाऽद्वितीया मुख्या वासारिनी ह्र त्रिमनदी शृंगाररसे प्रणेत्यर्थः॥ अथ च मृगशृंगाव द्वक्रत्वगामि
नी तथा स्वादूदका तथा किंन्नर्पडूव किंनर्यस्त्रिमर्थ्यः कमलबाऊल्या तासां श्रेष्ठगुंजनऊंडूतिर्यस्याः एवंविधा विकसत्कम
लत्वमरी मत्तगुंजन्नूयुता वनिर्मलजला एकाकुल्या यस्य सौधस्य उरोगिकदाचि ऊींश्यत्तविपिनाट्टत्त॥ बऊजेलेव
स्थितेत्यर्थः॥ एकविंशो सर्गस्तिंगप्रासाद वासादित्यनेन ऊल्याया अपि वर्णयिष्यमानत्वात्॥ अतिसौधवर्णनोपयोगिता
दयमर्थः॥ कविना विवक्षित इतिप्रतीयते॥ विकटस्खुंदरे प्रोक्ताविकारालयो रितिविश्वः॥ त्रुटति न्हतेडुरालुड्डावस्मरति
लरू॥२६॥ त्रित्वेति॥ यत्रसोधेयनंदनः स्य ब्रह्मणः सुतायां सरस्वत्यां विरिंसुतासंभोगाभिलाषस्तद्रूपमंदंमहसा
हसं अविचर्यकारित्वं तेन सह सत्त्वसामर्थ्यदर्पेणसोत्कासोमनोन्मूर्यांसुतारिवं सुताया भोगोत्पादने विषयेत रूपावाम
हकामस्यैवंसा हस्वं तेन पौरुषदर्पेन सोद्धाम स्य कामस्य संबंधित्वो वारितिहासः संकथा पुराहत्तमाख्यायिका॥ जित्तिश्रु

५

चित्ररूपेण चित्रकारैर्लिखितोऽखिलाक्रमः। पस्पायां यासां एवंभूता, सततं सक्ता ब्रह्मपरास्त्ववादिका मत्स्यावाप्ति
त्ररूपेण यज्ञादिशु लिखिता वर्तंते इत्यर्थः॥ ब्रह्मणः सुतारिरंसुतादिकं मत्स्यपुराणादवगंतव्यं॥२०॥ पुष्पेति॥ यत्र से
धे गौतमकलत्रमहल्यां कामयते कामी तस्य संतुं ज्ञानस्य देवेंद्रस्य पुष्पकांडस्य कामस्य लोकत्रयजयडिंडिमायि
तं वाद्यविशेषवदाचरितं पारदारिकस्य परस्त्रीगामिनो विलासवेत्त्रं निश्रिष्ठ सुवर्णादिरचितासु उदकंटकिटंके रु
कार्यं लिखितं। येनेंद्रोऽपि पराभूतः, तादृशस्य महाप्रभावस्य स्मरस्य सेवा सुवास्या मपि निपतं कार्येति सुवर्णेष्टकवितति
त्रिशुकामो ह्यपनार्थं इदं पारदारिकविलासाय यत्र टंकैरुल्लिखिता इत्यर्थः॥ डिंडिमायितं उपमानात्क्विप् ... क्तः। त्रिष्ट
परदारान् गच्छति पारदारिकः गच्छतौ परादिन्यश्चेव क्रुब्द इति षट्॥ उदकं किटटिकबंधे इत्यस्मात् कर्मणि विपः॥२१॥
उच्छलदिति॥ उच्छलत्तेषो दर्या दिनाविजयंताख्यस्यें द्रप्रासादस्य विजयेन पोजर्जिता लब्धा साकीर्तिकीर्तिकान्त्व
मुक्तातिषिः प्रतिमा तस्या निशात्थिता रात्रिस्तस्याः स्वसा लघ्दष्टसुज्वलायस्य प्रासादस्य कीर्तिः कांतिः उच्छलत् उड्डीय
मानानां कलरवानां पारावतानां त्रापि पंक्तिस्तस्याः॥ किंतवाद्यान्ना जगदवदायति स्म प्रज्ञो धयति स्मेऽज्वलं वकारेत्यर्थः
एते कलरवा नत्वदंतीति तुच्छरश्रूनर्थं डिकातुल्या कांतिरेवेत्यस्यार्थः। पारावतः कलरवः स्यात् प्रासादो वंजयंत इत्यमरः॥

दायातिदैयसौधनेइति॥ च्चा॑ दिरवश्र्वर्वमसकर्मकः॥ जइस्मइतिलट्॥ कार्त्तिकीभ कृत्तेरणयुक्तः कालइत्यणिङीप्॥ अ
त्रकार्त्तिकायुक्तो दिवसः कार्त्तिकइतिभाषितपुंस्कत्वमस्त्येवेति पयोर्द्वयोरित्यत्रि धातासुत्त्रिंगेनतिपित्राद्धेन
समासेस्त्रीलिंगस्यसमानाधिकरणस्योत्तरपदस्याभावात्पुंवत्कर्मधारयेतिसूत्रेणनपुंवत्वं॥ ततश्चकार्त्तिकीचा
सौतिथिश्चेतिसमासः॥ २२॥ गौरेति॥ गौरनाम्नोभ्यंतरस्यपुरुगेहस्यांतहस्यतिनापर्यायंतारायांविषयेस्मरतिनोय
उछत्रन्नावा॥ गुरुतल्पगामित्वादाचारइत्यागित्वंचकृतारायांविषयेस्मरतिस्मस्यो दृनत्वावः॥ कामजनितसामर्थ्य
तिशायछत्रदानंवाइतिछत्रंपुराछत्रंश्राद्धिनाः प्रतिपादयंत्यः तथाभरतेनमुनिनाप्रणीतभारतनारतारव्यःनाघेवर्षी
दस्तस्मिन्नुधाश्रष्टतः रूपानरत्नेक्तनाद्यारात्पाश्चिनीयमानाः सत्यः सुधाप्रायाइतियावत्॥ एकंन्नतानाछिकादशरूस
कांतगतचतुरंकवंधविशेषायस्यसौधस्याजिरेगिरेगणेऽजिनीतिः ष्टिः सात्विकांगिकः॥ वीविकाहार्यभेदभिन्नै
चतुर्विधैर्नटामित्तीयमानैरभिनयैःकृतारेजिरेरातयोस्मरोद्धततन्भावस्यमितिसम्यक्परिछित्तिःस्पैव छत्रेव्यापारेण
नीतंवाप्रमेयंयत्रैवंविधनाटकादिः प्रबंधमाश्रितेइतिवा॥ २३॥ त्वंचिति॥ यस्यसौधस्य हाटकाविटंकसुवर्णघटि
तकपोतपालिकाशंनोदारुवनेमंदरकंदरायांदेवदारुतनेमंत्रजिक्रियागोर्यासहदिव्यसहस्रवर्षपर्यंतंयास्य

रतक्रीडामाधवस्य श्रीकृष्णस्य व्रजवधूभिर्गोपिकाभिः महर्षिविलासो रासक्रीडादिस्तयोर्विषये उत्पन्नसाश्चर्यकार्वीयो
ण उक्तिस्तैः श्लोकरूपेण ग्रथितैः सुभाषितैः अतिचमत्कारकारिनवीनार्थशब्दविशेषैः करणैः कृष्टनिर्वृत्तं कीर्तविक्रीतं
हरस्य लक्ष्मकामविलासवर्णनकाव्यश्लोककामोदीपनार्थं यदीयहाटकविटंकेऽष्टकेरुद्दंकिताइत्यर्थः। कपोतपालिकायां
तु विटंकं पुंनपुंसकमित्यमरः। विशेषेण टंकानेव घ्नत इति विटंकं पक्षिविश्रामार्थं कुड्याद्बहिर्निर्गतं दारु॥ रधात्रमी
त्रि॥ यस्मिन्लोके चरतीति यच्चरः शुकः पक्षी शुकपितामहं पराशरसुतं गोतारस्वरं गायतिस्म॥ किंभूतं तं क्रिदिनेन
नु विसर्प्य पृष्ठ्यं यमुनायां विषये दाशदारिकौ कैवर्तकुमारी यो जनगंधा परिचरंतं संभुंजानं॥ अत एवायथाक्रमं काले
दिशस्वरात्मादौ निषधस्य समयस्य दिशस्यनीर्घ्ण्दे वस्त्थानादिव्यतिरिक्तस्यापि पिशुरूपस्य निजशयनागारादेविषय॥
स्य परदारादिव्यतिरिक्तस्य स्वकार्यलक्षणस्यास्य सहात्तु कालादीन् सहमानाः धैर्यजनकात्स्मरादन्तो रूत्सुकैकका
मातिरेकं मोढुमसमर्थमित्यर्थः। पौराणिकथ्यमानस्वारसादिकथाश्रवणमात्रेण प्राज्ञः शिक्षातिशापादनिमुखरोप
दिहारी करस्तादशीजारतापुत्रांकथासुभैरनुदिनंवापि भिन्नावः। अकालादिना कामातुरस्य कालाद्यसहनत्वं
समर्थितं॥ अन्योपि साधुरेवं भूतस्य पितामहमपि निंदतिं कैवर्तदाशधीवराविरत्यमरः॥ य द्वरं अधिकरणे वरष्ठे॥

नै.टी.१८

तवनामगुणानां स्थानं। अत्रतापि विशेषेकुत एतन्निर्णीतमित्याशंक्यार्थापत्तिं प्रमाणयति। अन्यथातु पुनर्यद्येवं न
स्यात्तर्हि ननु जन्तुस्त्रितये पितृनाम दशरथ इति रथिवलनद्ररूपजन्मत्रये पि नवैतत्कस्मात्कृतोराघ्रहेणपौनःपुण्येवारा
मेत्येवनामान्वबंधि अंगीकृतं। अनेकजन्मस्वेतस्यत्वयैवस्वीकारान्नवाप्यतप्रियतममिति ज्ञायते। तस्मान्नामनाम्सु

ण स्थानमित्यर्थापत्तिः॥ तथा च शिवेन पिरामरामेतिरामेत्यादि पार्वतीं प्रत्युक्तं॥ २५॥ त्वक्कीति॥ हे नाथ त्वं नास्करेण मर्त्य
स्य रूपया दक्षिणहस्ताग्रत्वयि न क्किनार्जं मामनुगृह्य मयि प्रसाददृष्टिपातं कृत्वा विनतमस्तकं गतानां ज्ञानं कुरु॥ प्रसाददृष्टि
पातात् मम सकालामप्यविद्यां विनाशयेत्यर्थः॥ स्वर्ये च न्वाति मिरं निरस्यते तथा मयि अर्पितेन प्रसादनिहितेन वंधुना
वं दृग्रूपेण वामलोचनेन कृत्वा मम त्रिविधमपि तापं न विधुनासि अपि तु निराकुर्वीति काकुः॥ चं ने एण चक्षी तत्वाजापश
ति क्रियते॥ एवं स्तुवंतं मां प्रसाददृष्ट्या विलोक्य कृतार्थी कुर्विति भाव॥ २६॥ विश्वेति॥ हे विश्वस्वरूप स्थावरजंगमात्मक
तथा कृतस्थिर स्थावरजंगमकारिन्॥ विश्लो अहं ते तव वैभवाद्भुतं सामर्थ्यान्यं तं दूर्पवाश्चर्यं श्रोणे परमाणुरूपे हृदि
मनसि कियत् किं परिमाणं ऊर्वी॥ अणितु आधारस्याल्पी यस्मादाधेयस्य च महीयस्त्वात् सर्वं वैभवाद्भुतमणौ हृदि धारयि
तुं न शक्नोमीत्यर्थः॥ यद्यपि ते सामर्थ्यं महत् तथापि कियदल्पमेव धारयामीति वा॥ सुक्तमेतत्॥ यस्मद्दरिद्रेः किंच नो
तनकः कांचन कृमिधिगत्य प्राप्य सुरडुरुस्सुवर्णग्रहणाभिलाषी भिमसन्न्यातधारकलीभूते अत्यंत जीर्णे निजचीरे
स्वीय वस्त्रे कियत् किंचित्परिमाणं हेमन् दधाति विधाति॥ अपि त्वल्पमेव ग्रंथीव धात्यसामर्थ्यात् तथा मकलगुणवर्णना
भिलाषिसस्यापि सामर्थ्याभावात् कियन्मात्रगुणवर्णनं स्तोतीति भाव॥ इति स्वल्पस्तुपसंहरन्॥ २७॥ लंघयति॥ हि स्वामि

नृ २

नैषधी०२१

तयोर्हं संध्यावंदनादि कुर्यादिति विधिः। ब्रह्महननादि कुर्यादिति निषेधस्तन्मयी तद्रूपां भवदाज्ञां श्रुतिस्मृती। स ब्रह्म
हननानि कुर्यादिति निषेधस्तन्मयी तद्रूपां भवदाज्ञां श्रुतिस्मृती ममैवाज्ञे इति वचनाच्छ्रुतिरूपां। अहरहः प्रतिदि
नं लंघयन्नतिक्रामन्। यत्कर्तव्यतया त्वयोपदिष्टं तन्न करोमि यच्च न कर्तव्यमित्युपदिष्टं तत्करोम्येवेति त्वदाज्ञां
लंघयन्सन्। अस्मिन्वर्त्मनि हा कष्टमनुचितकारी सोऽहं महीयसापि तपसा दुर्लभं त्वत्प्रसादं इच्छुः प्रसीदेति गिरैव प्रा
र्थयानः सन्नलज्जो निर्लज्जोऽस्मि। यो हि एकदापि अन्योराज्ञां करोति सोऽपि कथं विवक्षति प्रसादं लभते। यस्तु कदापि
त्वाम्याज्ञां न करोति। स दंड्योऽपि वाङ्मात्रेण प्रसादमिच्छन्निर्लज्ज एव। प्रसीदेतिन्वाव॥ त्वत्प्रसादं नलोके तिष्ठन्नि
षिध॥ १०॥ इतीति॥ मनलः हरिं प्रति इत्युक्तं प्रकारेणोदीर्य प्रसादं संप्रार्थ्य द्विविधसमाधिमध्ये संप्रज्ञाताख्येन
समाधिना तत्र वावासित्तं तमः अतितरां संभावितमनाः तदेकतानः समयादिना तः॥ अत एव भावनाबलेन संप्र
ज्ञातध्यानबलेन विलोकितैः साक्षात्कृतैर्विष्णोर्विषयैः प्रीतिः। सहजप्रेम्णा नेकेश्वसहस्राणि योग्यानि कर्माणि। आ
नंदबाष्पगीतनृत्यादीन्विरितुं कर्तुं शीलमस्य सः॥ यदुक्तं श्रीभागवते शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि क
र्माणि च यानि के गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंग इति। एवं संप्रार्थ्य प्रतिमादिसाकार
लो

३७

ध्यानेन विष्णुं साक्षात्कृतवानित्यर्थः ॥ विष्णुरिति पाठे भावनीबलेन विलोकितो विष्णुर्येन सः ॥ अत एव प्रीतिभिस हृष्टानि
वरिष्णुः । एकपद्येपि विष्णुप्रीत्यर्थं प्रक्रियोपयान्नुपहारादीनि ॥ ध्यानसमाधिर्द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्च । ध्येयध्या
तृभावयुक्तः साकारः ध्यानसमाधिः संप्रज्ञातः । सर्वचित्तसंवेदनभेदविलोपेन निराकारस्वप्रकाशपरमानंदलक्षणा
त्मस्थापनध्यानसमाधिरसंप्रज्ञात इति योगशास्त्रे ॥ १९ ॥ विप्रेति ॥ एष नलः अद्य सन्ध्यारक्षणं भोजनार्थं गृहं प्रविवेश ॥
नत्वर्वं गृहप्रवेशोऽत्र ज्ञातिः ॥ किंभूतः विप्रप्राणेभ्यः नित्यदानसंबंधिवसुगोभूहिरण्यादिवर्षत्यैवं शीलः ॥ तथा
पात्रसात्कृतं विधातपोवृत्तयुक्तपात्रभूतब्राह्मणाधीनं देयं कृतं पितृक्रतुकव्यं नित्यश्राद्धरूपपित्र्ययज्ञसंबंधि
कव्यं येन तथा श्रेयसे किं कृत्वा श्रेयसा स्नानदेवपूजादिनित्यदाननित्यश्राद्धांतकर्मानुष्ठानजन्येन पुण्येन उभ्या
दिनाथहरिहरमनेन दुध्या विष्णुं विश्वरूपं नारायणं परिपूर्णतस्मिंस्तदर्पणेन तं परितोष्य किं नत्रा सत्रमस्का
रं कृत्वा ॥ नित्यश्राद्धोत्तं ब्रह्मार्पणं कृत्वा भोजनार्थं गृहं प्रविशदित्यर्थः ॥ हव्यकव्ये देवपित्र्ये इत्यमरः ॥ पात्रसा
दृयेत्राचेति सातिः ॥ २० ॥ माध्यंदिनादिति ॥ मचहधातु धोकुत्ववं कृनलः माध्यंदिनान्मध्यंदिने विधेयाद्विधेरनुप
स्थातं च माहाय ज्ञानिर्वपणानंतरं आस्वादितः अमृततया शाकसूपादिव्यंजनादिनामृतरूपः ओदनस्तेन ग्रास्य

नेन लब्धामोदमानः। आस्वादितो मृतमयः उदनो येन। अत एव दृष्टस्त्र मोदा एवं कृतः। सन् प्राचंयत्र नेम्यास हपरि
हासविलासं कृतवान् स्तंपूर्वं अथ च वास्तुशास्त्रे त्रायनस्थानं प्राच्यां कर्तव्यमित्युक्त्वा सुरव्यराजाप्रसादात्स्वर्वेदि
करस्थं चित्रं लेख्यं युक्तमद्भुतारूपं वा तथा तु च्चत्वा छो भासाम्याच्चाविदूरी कृतो। निकटीकृतो वैजयंतो महेंद्र
प्रासादो येन वैजयंतं तुल्यं वे भ्रस्वलं प्रासादरूपं पर्वतं निजरुचिभिः स्वीयकायकांतिभिरलंचकार॥ नो जनेन कृ
त्वा तं प्रासादमारूढवानित्यर्थः। चंद्रोपि उदयन्नास्वादिताम्रतरूपेनोदणेन मोदमानः॥ सुधाप्रणो कृतरूपे
प्राच्यां वर्त्तमानत्वादुच्चत्वा च्छे॥ सन्निहितवैजयंतं प्राच्यां वर्त्तमानमचलमुदयाचलं निजकिरणैरलंकरोति॥ अथ
च चित्रमिति विरोधाद्दाश्चर्यं॥ चंद्रो हि मध्यादिनेव र्तमानमध्यदिनं समयानंतरमस्ताचलमेव रुचिभिरलंकरोति॥
न तु प्राच्यमचलं अयं तु चंद्रोपि मध्याह्नादनंतरमपि प्राच्यमचलमलंचकरोत्याश्चर्यमित्यर्थः॥ दिवस्वानितिपाठे
सर्वं वदन्यत्॥ आस्वादितं सर्वं स्योऽष्टहालं यद मृतं जलं तद्रूपेणोदनेन मोदमानः॥ सूर्योप्येवं कृतमुदयाचलं निजदी
प्तिभिरलंकरोति॥ अथ च सूर्योपि मध्याह्नानंतरमस्ताचलमलंकरोति। न तु प्राच्यमचलं। अयं तु प्राच्यमचल
मलं कृतवानिति चित्रमित्यर्थः॥ प्राचं चंकुविगित्यादिना क्विन्तु गिदच्चामिति नुमिश्रुत्वं॥ २१॥ नामेति॥ ततो नुनल

प्रासादारोहणानंतरं तत्र मातृजनापितस्यां कमध्यास्तकीदृशी लतागौर्यादिदेवतानां नत्वा षोडशोपचारपूजाया

यातया पत्न्योक्तमुक्तवती समतिस्थयमपि तु क्तवती अनंतरं चन्द्रषणजरेणस्तकारवा कुल्येनयोस्तिरोगौरवं तेना

लसंमंगं पस्या।।सान्द्रषणव कुल्येन। तिमरं यथातथावा।।न्द्रषणन्नरमपि वोढुम समर्था। तिम्रदीत द्वन्द्वा मंदगति

र्वा कीदृशमेकं अंकुरिता समुदितातत्र परिरिरंभावेम्यालिंगन वांछायस्यता दृशोमध्ये देशो यस्या।।उक्तविशेषण

विशिष्टा सती न लाङ्गयातदं केमसुपा विद्यादितिभावः।।अपिर्नलदेव रजापेक्षया समुच्चयार्थः।पत्यो नुक्तवतीति

पतिव्रताजाति: परिरिम्भुमध्यमिति पाठेन्नेमी स्पर्शसंजाततरोमांचेन तदालिंगनेच्छुवमध्यंयस्या।।तरातिन्नरेत्येवपाठ:

साधीयान्।पाठांतरं चिंत्यं।।अंकमधिश्री उ:स्थासामिति कर्मत्वं।।रराता मिति।।काप्यनिर्दिष्टनामा तिसुंदरी बालास

खीनांनैमी मध्युलच्छी क्रत्पपश्चात् पश्चादागा उगाम कीदृशी कीरस्य शुकस्यैकं पंजरं करवारिरुह पाणिपद्मेवहंतीति

स्विदृते शुकस्यात्मनोवास्तुवर्णादिघटितत्वात्पंजरस्यैव वामनेत्रेसौंदर्य उंभमिव दृष्ट्वा कृत्यकेरपंजररूपेणावहंतीति

संबंधः।।किंभूतस्य कीरस्य अशितस्य भक्षितस्य पक्वस्य बिंबस्य बिंबीफलस्य विपाक: परिपाक: स्तद्रूपावंशुर्यस्य अति

प्रियत्वात् पक्वबिंबीफलमेव यदीयवंछाकारेण परिणतमिति यावत्।।ताटशस्यातिरक्तवंचो:।तथास्पष्टं सर्वथापित्रा

नैषधी०२१

लाडुरपक्वं यत्किंचित्फलं तत्तुल्यं बिंबीफलमेव वा तस्य परिणतिरतिनीलता॥ तस्मादुचिता सद्यो ऽपात्ततुल्यात्र
तिनीलाः छदाः पक्षा यस्य॥ अपक्वानि रूपाणि नितन्निवाति फलांतराणि बिंबीफलान्येव वा यदीयच्छदाकारेण
परिणतानीति यावत्॥ तादृशस्यातिहरितपक्षस्य कीरस्य रक्तचंचुत्वं नीलपक्षत्वं च जातिः॥ पाठितशुकादि
पंजरादिधारिण्याः सख्या अपि नापि कानुगमनं जाति॥ नोजननानंतरं पाठितशुकसारिकादिद्वाष्टानां॥ तस्य
श्रवणे नर्न्तनादि वीक्षणेन चकोरनंरजामपि जातिः॥ आमे फले वा लरडुः स्यादित्यमरः॥ शुकः जाति॥ एकासखी
पिकेन कोकिलेन महोपलक्षिता वार्ता नैमी मनुत्त्ववर्त्ततिलक्षी लक्ष्य जगामा किं भूतेन कलाया मधुराव्यक्तेन रवा
न सहात्मानं युनक्ति युक्तेन॥ कुरूकाद्वं कुर्वता तथा च कुली भूपान्यः पक्षाणां शितिमाल्लक्षत्वं तस्मिन् वसीम्ना
ऽवधिभूतेनात एव विशेषणक्रमेण कुकुरिति पदस्य शब्दस्य तथा पदार्थस्य तत्पदवाच्यस्यामावास्यारूपस्य
त्वमिथोन्वयो ऽन्योन्यसंबंधो यत्र तादृशेनेव स्पष्टमुत्प्रेक्षायां॥ कुकुपदयोर्गित्वान्नमत्त्वा आमावास्या वाचिवि
जयेऽकुरूपदपदार्थयोस्तादात्म्यरूपेणेति यावत्॥ अमावास्यापि लक्ष्यपक्षसंबंधिनी मर्यादावर्त्ती॥ अतएव कुरू ३५
शब्दवाच्या च॥ तथा तिर्यक् निरश्चीनं करे धृतः स्फटिकदंडकस्तत्रवर्त्तिनां स्थितेन तनाता मधाधिकेन मदोन्म

त्तेन॥ दंडकेतिकस्य इति कन्। कस्येव दंडे तत्पर्यंग॥२४॥ शिष्या इति॥ यत्नीकृतु चेत्तैस्याचयस्याः सख्यः कलाविधि
षु चतुःषष्टिकलाकर्मसु विषये नैस्या एव शिष्याः तथा वीनायाः मृदुक्षणेन कर्मणि मधुरत्वाद्युत्कृष्टे व्यापारे प्रवीणाः
तां गंधर्वराजो विश्वावसुस्तस्य तनूजाः कन्यास्तत्तुल्या वा प्रमदा दिव्यासीन्येन मनुजाधिराजान सुपवीणयितुं वीणा
योपगातुं पृथुः प्राप्तुः उपवीणयितुं पूर्ववत्॥२६॥ तास्तामिति॥ तास्तोऽकरं गद्गदां विश्वावसुकन्यानां विपंचीवीणा
अन्यासत॥ अस्त्वस्ये किंभूता किंचित्सुरदंष्ट्रा तत्र वेप्राद्धतसमयेकलितां गीतानि कल गंभीरमंद्रस्वरस्फुतिवर्ण
विशेषाभिव्यक्तिरहिता काकली सूक्ष्ममधुरास्फुटरागविशेषो यया तदेवोत्तरे हृते नैस्यास्तया निर्वचनीयं मधुर
स्वरयुक्तायाः कंठलताया उपकंठे निकटे त्वाप्त्वा पित्तुं तस्याः पुरस्ताद्धृष्टं कंठे प्रथमं प्रारंभे अप्रतिभावती वप्रतिभार
हितेव दृष्टेव॥ अन्योप्यधिकविद्यस्य पुरस्तात् भाषितुं गातुं वा धृष्टत्वादत्राद्ध सन्नथमं मंदमेव भाषते। गायति वे
ति॥ संगीतविद्या विदामियं जातिः प्रथमं गायना गानप्रारंभे काकलीमारचयंति। काकल्यादि संगीतशास्त्रादवगंत
व्यं काकली केति न धृतस्थेति कपाठः प्राप्त्वायितुं त्वा ह्वैवेरेति कथं॥२८॥ सेति॥ सा विपंची धृता नौ अखिलानां गीतं तत्त्वादि
चतुःषष्टिकलानां सौंदर्यादिगुणानां च भूत्वा तुल्यस्य भूमी स्थानं तस्यैमी तस्यास्तुलाधिगतये साम्यप्राप्तये

नै०टी०२१

शुकः पंजरे वरूढं शुकं स्तुदं किरन्॥ श्रोतॄणां हर्षमुत्पादयन्॥ विश्वासर्वास्तित्त्व द्वर्णमात्रादिसहितास्ता गाथा इत्थं वद्दसमा
णरीत्याउदारयति॥ ४०॥ तिर्यग्योनिः शुकोपियथाश्रवणमात्रेण सर्वत्रापि गाथा अनुवदितुं शक्नोति तथा तंत्री स्फुटत
रान्दूरवंधान्नैमीनलस्तावकश्लोकान् वीणाः स्फुटं गायंतिस्मेति भावः॥ एते न गंधर्वराजकन्यानां वीणाप्रवीणएं सुकस्यापि
प्रज्ञातिशयश्चसूचितं॥ गृहांतरात्काः पक्षिस्थगाछिकास्तिरगृह्यकाश्चेत इत्यमरः॥ ३१॥ इत्थमिति॥ यदुक्तं तदेवाहास्माकमिति
॥ यद्यपि अतिशयितामतिः प्रज्ञाययोस्ते युवां अस्माकं सूक्तिनिगाथारूपाभिरेवास्म द्वाग्रवनात्मिरस्माकं वुधैर्गाधं अ
तानार्थत्वं अविष्ययएव तस्यापाय एवं तथापि वयं युवां स्तुमहे स्तमएव॥ हियस्माज्ञ चद्रुयांवागमसरे स्तावकादि वचन॥
वसरे सत्यपि अवश्वनादव्याघनाद्धेतो रेतावदस्तुत्नतार्थं अत्यल्पमप्यस्मदीयं ज्ञानं अवधारितमेवन स्यात्॥ अज्ञातमेव
स्यात्तस्मात्स्तु इत्यर्थः॥ तस्मात्स्तुमह एव॥ वर्णनायां भावः॥ इत्येवं वीणानिवद्धं गंधर्वपुत्रीवचनं शुको व्यवददित्यर्थः॥ ए
वस्तुकरत्रापि ज्ञेयं॥ एते न गंधर्वपुत्रीभिः स्वमोदैतपरिहृतं॥ ३२॥ न्त्यदिति॥ सा न्व्यत्नैक वा हिमालयसुता पर्वती नो
गेवास्तुकादिमर्पशरीरैः सुमनसस्पद्भूषितस्य राजा चंद्रः शिखामणिर्यस्य चंद्रमौलेः अंकस्तु स्थितस्यं गदेशे वर्तत इति शि
षः प्रियतमतातत्वं च त्वमपि भीमपुत्रे वंदनादिनी गौमनोहरस्य राज्ञां मुकुटमणेः अष्टतमस्यास्य नलस्यैव त्वं अंगदे
शेवर्तस्व इत्ययं क्रमः समः परिपाटी उचिता॥ पार्वत्या महेशस्य वत वनलस्य च राजकन्याया राजश्रेष्ठस्यान्योन्य संबं

धाःसमुचितएवेत्यर्थः॥ अथ च समस्तुल्यः॥ यथा तयोः संबंधस्तथा युवयोरमीत्यर्थः॥ अथ चायं द्वंद्वश्लेषरूपः सं
बंधस्तुल्यः॥ एवं यद्यपि क्रमः समस्तथापि सिद्धकर्मे दोषविसदृशत्वं॥ यत्त्वनाकया लसेंद्रस्य कलनां द्वित्वेनैकोऽनवनं तया कलि
तस्य वा रव्यातस्य राजत्वादिंद्रशेन प्राप्तिः द्वस्थनर्नुर्नलस्य संबंधिनी अत्र॥ स्मिन्नपि जन्मनि नवती सती प्रतिव्रता॥ अपि त्वाद्या
न केवलमत्रैव किंतु जन्मांतरेपि त्वं सत्येवानान्यथा त्वापि मतीत्वानुपपत्तेः॥ पार्वती तु ब्रह्मकपालस्य कलनया करे धारण
या कालेतो विदितो नभवति॥ अकपालकलना कलितस्तादृशोपि न भवति कपालित्वेन रव्यातस्य त्वन्नु महेशस्य संबंधिनी
स्वजन्मनि दक्षापत्यत्वे एव सती न तु हिमवदपत्यत्वेपीति महद्वैषम्यं॥ हरस्य नलस्य चैकस्य कलत्रैष्ट साम्येपि पार्वत्या
स्तव किंचिदेव द्वाद्वश्लेषसाम्यं न तु सर्वं शुक्ररात्पातवाधिकत्वादित्यर्थः॥ हिमवदपत्ये पार्वत्या असतीत्वोक्तेर्निंदिता नाद्यां कन्
यानैमीस्तुतिपरस्य समीद्वाद्वस्य पार्वत्या नामपरत्वमात्रव्यावर्तकत्वेनोक्तेर्विदापर्यवसानाभावात्॥ ३२॥ एषेति॥ एषा
नैमी कस्य वा चेतसि रतिः कामप्रियेति स्फुरति अपि तु न कस्यापि॥ यतः यस्या एतस्या द्युतिः कायकांतिः रतिं प्रियां स्मरस्तोर
घवानुरागं प्रसूते॥ अर्थात्त्वयि॥ अंगजत्वात्कांतिः पुत्री रतिश्च तत्पुत्री सा यस्या नत्री सेयं स्वयं रतिरिति कस्य वा चेतसि
मतिं स्यान्न कस्यापीत्यर्थः॥ अथवा त्वय्यपि विषये त्रैयदेन हे संबंधिना वीक्षणेन दृष्टी॥ यनेत्रेण खिलीकृतः स्मृतौ कृतः

निर्जरत्वेन देवत्वेन सिद्धिः अमरत्वरूपत्रायुषो धा यस्य ता दृशास्य मकरध्वजस्य कामस्य संशयं रूपस्य दृश्यः। किमर्थं का
इति संदेहं कोवा। तनोति। अपितु न कोपि करोति॥ कामस्य हरेण दग्धत्वात् संदेहनिवृत्तेरित्यर्थः॥ आइत्याश्चर्ये। यस्य
तवांगजा कांतिः यतो रतिं सूते ततो रतिस्त्वपि न स्त्री सा कामस्य स्त्री॥ तस्मात्त्वयि कामसंशयं कोपि न करोति॥ कामस्य
हरेण दग्धत्वात्संदेहनिवृत्तेरित्यर्थः॥ आइत्याश्चर्ये यस्य तवांगजा कांतिः॥ यतो रतिं सूते ततो रतिस्त्वपि न स्त्री सा काम
स्य स्त्री॥ तस्मात्त्वयि कामसंशयं कोपि न करोतीत्यर्थः इति न लंघ्र तित दृचनं शुकेनान्यवादीति वा॥ रतिकामस्यापि युवा
मति तमां सुंदर विति त्वा वां त्रैय च्छेति संबंधे॥ णिनयास्यामिति दृष्टि निषेध पूर्वमेजागमः॥ २३॥ एतामिति॥ हे नल त्वं बि
भासि किंभूतः एतां भैमीं बिभ्रत् अंके धारयन्॥ किंभूतां सरितां नदीनां छविं कांतिं हरंतीं तत छौत्सा उज्ज्वलतरा मोक्तिक
हाशयस्यास्तां तथा वेद्यात्रं तवेदि कामध्येंतद्द दतिक्रवाश्री शोभा यस्याः। अंतर्मध्ये वेदिव दतिकृशा श्री यस्य वा त
था जनमनसां आनंददायी मध्यदेशः नारीणां मध्यभागो यस्यास्तां॥ किंभूतः अस्या भैम्या आननमिदमाननं तदेव चंद्रम
श्चंद्रस्तस्य ना शाकांत्या उच्चासितो हर्षं प्रापितः॥ कइव चंद्रमासा हृष्टि प्रापितः पयसां राशिः समुद्र इव कामिव धरां भू
मिमिव॥ यया पृथ्वी अंके धारयन् समुद्रः शोभते॥ किंभूतां धारां सरितोन यएव छव्या कांत्या हारिणी मनोहरा हार

यस्यास्तां॥ तयोरंतर्वेद्याख्यया गंगायमुनामध्यभुवा श्रीर्यस्यास्तां तथा जनमनसां प्रियो मध्यदेशो विंध्यहिमाचलांतरभू
मागरूपश्चार्यविज्ञपरपर्यायः उ एषच्चतो मध्यदेशो यस्यास्तां॥ हिमवद्विंध्ययोर्मध्यं यत्प्राक्विनशनादपि॥ प्रत्यगेव प्रयाग
च्च मध्यदेशः॥ प्रकीर्तित इति मनुः॥ इदमाननं षष्ठीसमासः॥ २७॥ आदत्त इति॥ जनितानि सखीभिः कस्तूर्या निविरचितानि प
त्रविशेषाणि मकराद्याकारपत्रवल्लीलेखनानि यस्यां॥ सा पत्रवल्लीभूषिता तथा स्मितेन सह वर्तमानः॥ मादृशः अस्मादृ
शः जनैर्नुतां प्रापितः मादृशो जनः सदा सा विंदुरुच्च एव वदनं यस्याः सा चंद्रमुखि कुवदनेयं तथोक्तश्चांगी भैमी मदनाय जयं द
त्ते एवंविधश्चैमी दत्तेन कामो नितरां बुद्धः सतीत्यर्थः॥ यद्यपि काय कांतायाऽर्जितो मन्मथस्य केतुः कामो येन तस्य तवान्यस्मिन्नैम
विषये वा विवादविषये यो योगः लब्धजयं कामं करोतु या संतर्जयति तदीयमन्यं भैमी रूपं वा विषयं यत्त्वं तु कृत उदरमध्यव
र्तिनो ऽतिकार्यस्य फलं किं रामणी॥ एकोति गायात्मरितमनु महाकं सर्वेन दीयमपि विषयं बलादन्यायेनैव वनुकृ इत्यर्थः
अथवा मध्यस्थानां सभ्यानां॥ दुर्बलतमत्वस्य ज्ञानं ज्ञानदौर्बल्यस्य नियंतुमसामर्थ्यस्य॥ स्वदत्तदयनिर्वहणाशक्तत्वस्य वा
फलं परिपाकः किं मयमपि संभावानाऽन्यत्रापि विवादयदे सा क्लिवादं नत्वा जयपत्रदानपुरः॥ सरं एकस्मै जयप
त्रं दीयते तत्र निर्णयं कृतेपि मध्यस्थाश्च दुर्बला नावंति न हि पराजितोप्येको लब्धजयमपि द्वितीयं तिरस्कृत्य न दीयां वि

वादपर्ण्णक्षेत्रादिकं बलात् कुरुते॥ कथमन्यथा समासादितं कजयपत्रं हस्ते निर्दत्त्वा अन्योन्यदायस्तु किं करोतीति तर्थापत्तिः॥ साक्षा
त्कृतेति निजेन सहितः तिलतुल्ययोग इति बकुली होराख्या दोलारितिषविद्विः। पञ्चेशां रूपत्यशानीतो ब्द्विः॥ ३५॥ चेत इति॥
ननु भैमी भवति स्वेतोन वस्य राजधानी का दृश्यते कुचपत्रेषु राजानः श्रेष्ठाः पत्रवल्ल इत्यर्थः। तेषु धानीयः स्थापनी
यः॥ यद्वा कुचपत्रमेव राजधानी यो राजधानी संबंधी केतुर्ध्वजश्चिह्नं भवति मकरो मत्स्यो यस्यां सा राज्ञो मुख्यावस्थान
नर्थी राजधान्यां साभिज्ञानचिह्नरूपः पताकादिर्ध्वजो भवति॥ तथा च केरुभूतस्य मकरस्य तव कुचयोर्वर्त्तमानत्वात्
त्वं कामराजधानी साक्षान्मदनस्त्वय्येव वर्त्तत इत्यर्थः॥ अत एव हे तरुणि आरूढयौवने भैमि केशानाः मीनकेतोर्मक
रध्वजस्य संबंधिन महोदयरूपं महत्तु स्तवं महानत्तु दयो यस्मिं स्तादृशं वो स्तवे स्पृशं तत्पांस्य स्वामिकामोदयोत्सवदत्तां
अस्यां नवरूपायां राजधान्यां तेन वसुवैनो रणं न ब्रुवते ऽपितु सर्वेऽपि जनास्त्वद्भ्रुयुगं कामास्तुदयोत्थितनवकृतत्रि
रवं वंदाद्यनिवद्ध माल्यादिभोगलिकसुनीलपल्लवरूपं तोरणमिव वदंति॥ कामस्त्वदेकाश्रयः सतत्त्वत्कर्ष एव
त्त तदुक्तिभावः॥ पत्रराजी त्वपि पाठः स्पष्टार्थः॥ राजेति पाठे मुख्यः राजादिना समासांतः॥ ३६॥ अस्या इति॥ हे नलत्र
स्याश्चैम्याः सकाशात् द्रवंतं गच्छन्तः। तथा नवंतः सकाशादिनों भैमी गच्छन्तः प्राप्नुवन्त कामः कथं ना मत्रमनेन कृच्छ्रेतु गच्छे तु

अपितुसदायातायातेकुर्वन्॥श्रमंगच्छतीतिमेवंयुक्तं।श्रमंनगच्छत्येव।अथवायस्माद्वंपुवयोःछायाकायकांतिरेव

उक्करीत्यागतागतमात्रविरिंचीसत्समकरध्वजस्य।अ॰ध्वनिज्ञातंश्रमंहरतिएवन्दूतानवतीतिशेषः॥द्यमाननवछोलालोल

देवयातायातश्रमंनवेत्तीत्यर्थः॥अथचछत्रछत्रादिनिर्मिताच्छायामार्गेगतागतिंकुर्वतःपुरुषस्यश्रमंहरत्येव॥तैस्पारब्ध

योवकामस्तत्वत्वेन्स्पामेवनान्यत्रेत्येवंपरस्परानुरागःकुत्रापिनास्तीतिभावः॥६७॥स्वेदेति॥हेनरनाथस्वेदोधर्मजले

तस्मिंस्तेनवाञ्छाञ्जकः)स्नानंतत्रप्रणयिनीप्रीतिमतीसात्विकसंज्ञातस्वेदपूरव्याप्तातवरोमराजीरतेस्मरतार्थजा

गरितस्याद्धधस्यत्रतातिउद्भवरोमांचनियमान्यदावरतिउत्रिताभवतीतियावत्॥तेनकारणेनरोमांचेनवात्वंम

धुनःपुष्परसस्पोच्छनिनोदयेनसांद्रःपुष्परसस्पर्शेणनिरंतरव्याप्तास्त्वच्छरीरांतःप्रविष्टाःअस्मेभोःकामस्यपुष्प

रूपाःशराःकेशांकेशौरेःपिच्छप्रायैर्दंतुरत्वच्छवीःतंमंगंयस्यस्वेदरोमांचपुकृत्वातस्यगमंतमग्रसनैग्नधुकामवा

एसंबंधिवहिवहिरवस्थितपतत्रव्याप्तांगड्वानासिजेमीयेगत्तस्वेदरोमांचोरिरंसुःकामशास्त्रंसुतरांज्ञोनसइ

त्यर्थः॥अथचरोमराजिर्दूतीस्थानीयातथाचतवदूतीवरीमराजिःलततीर्थस्नानारत्येकामप्रियांत्वदधीनांकर्तुंयस्मा

ग कारणादिनियमान्नकरोतितेनकारणेनविशिष्टनिमंत्रणामवापपिच्छसंछन्नांगड्वज्ञोनसेत्रन्यापितरूपालतस्नाना

रत्यर्थिकां नेत्रस्नहस्नस्वेदा सकलां रात्रिजागर्त्ति॥४७॥ प्रात्तेति॥ हे त्वपत्रं बुजाक्षी तवजीवितदेवताप्राणेश्वरी इयं नेमापि घर्मांबुसीकरकरंचनं स्वेदजलबिंदुमिश्रणं प्राप्ताद्द्यमपि त्वदीयस्पर्शावज्ञातस्मात्विकस्वेदयुक्ताभूदित्यर्थः॥ नकेवलं त्वमेव स्विन्नोपि त्वियमपि प्रीत्यये त्यर्थः॥ अथच देवतायाः स्वेदोनास्ती यंतु देवतापि सप्रस्वेदेति विचित्रमित्यपिशब्दार्थः॥ अतश्चकुसुमान्येव यथायेन प्रकारेण तेने नेमीकरचरणादिरूपेण प्रसिद्धा प्रसिद्धपराक्रमा मोहनशोषणादिकाम बाणस्तेनैव तेनैव प्रकारेणायं स्वेदस्तस्यकामस्यपस्तंबधिकामेन रश्चितं शरःश्रुतानाश्चीयबाणव्रणरुधिरं किंतु॥ एतस्मा कामबाणविद्धत्वात्स्वेदः स्तज्जन्यव्रणरुधिरत्वेनैवसंभावयितुंयुक्तः॥ यादृशोयद्वस्तादृशोबलिरितिन्यायेन पुष्पबाणा नांधवलत्वात्तज्जन्यंरुधिरमपिताद्दगेवयुक्तं स्वेदजलस्यरुधिरत्वंयुक्तमित्यर्थः॥ कुंकुमांगरागलगनाद्वा रक्तत्वात्स्वे दजलस्यरुधिरत्वंयुक्तं॥ इयमपिकामविद्धारिरंसुरस्तीतिभावः॥४८॥ रागमिति॥ प्रतीचीदिक्कलासुश्वेतद्वयं पुर्वयो स्तंसात्विकस्वेदरोमांचितमस्त्विति मिमं प्रत्यक्षदृश्यमिव नेमी नलविदानी रिरंसु अपिदिवामिथुननिषेधनियासासंको वर्त्तते॥ तस्माद्रात्रिं करिष्यामीति सूर्यमस्तं प्रापयितुमिव प्रतीची रक्तवर्णास्तित्वा॥ इदानीमप्राप्यस्तं गंतु योग्यमितीव सूर्योपिरक्तवर्णोभूदित्यर्थः॥ अथचयुवयोरेव केलिपरितः सरोजैः कमलैः तद्वा तुप्रतीचीरूपरक्तं मिथुनं वीक्ष्य

वान्नैमीनलेश्वरक्रीडावीदर्पकिं दृष्टे वेह संध्यासमये कामस्य दुष्टतो विनिं वारत्वयोर्गपं मुखमयेये षां तन्त्रावस्ती इ्णप
यत्वमधीयमानमस्मस्यमानं तद्दांचसानुरागाव दृष्टाकमलैर्मुकुलनाविव्याजेन पुष्पवाणता दृणायत्वमनुमीयते किं
॥ कामो हि रिरंसत्स्त्री पुंसौ दृष्ट्वा तीक्ष्णमुखैः शरैर्विध्यतीत्यर्थः ॥ अथ वै तौ नैमीनलौ प्रतीचीं भास्करो च यदि स रागो न्ना
तौ तर्हि दानीं रात्रिः सन्निहितास्तीत्यस्मात् विकुर्वन्ती चावः प्राहुमुमुचित दृतिते रपि मुकुलनं तं पद्माणां संकुचितमुखत्वं का
मस्यायोगपतीक्ष्णसुखी नावेनो प्रेक्षितं ॥ संध्याकालो जातः ॥ कमलानीति च मुकुलितानीति चलावः ॥ ४० ॥ अन्योन्येति ॥
आलिवर्गान्योन्यरागेन परस्परानुरागेण रमणाभिलाषेण वशायोव रूपयोरिरंसयाऽन्योन्याधीनयोर्युवयोः ॥ विलास
स्य कामविलासस्य स्वच्छंदतां निःशंकं प्रवृत्तिं छिन्नतिकामक्रीडाविघ्नकारी यस्मात्तस्माद पयातु ग्रहाद्धि हि निर्गच्छतु य
स्मान्मदनः कामः स्विच्चयं वसनं अल्पाजयन्त्र परिहारयन्नित्यर्थः त्स्त्री पुंसौ तथाद्दं तैर्नखैश्च करणं च्छितराजिं संग्रामं एतैरुपल
क्षितां वा नानाबंधसुरतमद्ध युद्धं च स्त्रीपुंसाव कारयन् सन्नमादयंतीति मदनः ॥ सहकारी कथं वा स्यात् ॥ अपि त्वेवमयां
कारयन्मदनो हर्षकारी न त्वेव देव ॥ तस्मात्सखीवर्गो गृहाद्धि हि निर्गच्छत्वित्यर्थः ॥ मदनः न चादित्वा ह्युः ॥ ४१ ॥ इतीति ॥
तां गंधर्वपुत्राः सख्यस्युत्सुके इति सर्वे किं परतित्यक्तं भाषमाणे सति गंधर्वपुत्री वीणानिचक्काणाथाः ॥ स्पष्टमनुवदतिस्म निस्त

नै०च०व०२१ धिवेलं दिनरात्रिसंधिवेलाम्नवं वञ्चयक्रूतं संध्यावंदन सायं होमादिकं नलस्य नित्यकर्म चेत्यज्ञात्वा मृषा ॥ लोकेने
वाचेदंनो भावती नि निर्न स्थातव्यमिति श्रुत्वोस्मात्त्रिकाग्लायति त हि वयंया मइ तिमिषमात्रेणपयसुन्ग्र हाद्वहि र्निर्जगमुरि र
सुरपि नलः संध्यासमयेनित्त कर्मातिक्रम्य संभोगं न करोति रिरंसु ने स्यापि स्वयंग्रहं न करोत्नी तियच पिनायानेतितथा
पि नैमीपरिहासार्यता दर्शाशुकवचनमेवव्याजी कृत्य बाहि निर्गता इत्यर्थः ॥ किंकृतास्ताकमलत्तमेवकामलरूपेत्व
निवतदासध्यासमयेनिकोभ्चवत्पासंकुचत्पाकमलानिसंध्यायांसंकुर्वंतिताद्वरूपा हृथागमनारंभेणत्री डाद्वालास्तंज
नी कुषितायानिज सख्यात्नेम्या द्वरूपा ऽद्भनेकदेशेन दृष्टाः विलोकिताः ॥ नकौपत्वान्नेत्रत्रतीयनंनागतिर्यग्व्यापरे
णषहष्टाः कुपिताहि मानिनी दृर्गत्ते हिं न पश्यति ॥ निकोचः नोवधञ्चः ॥ ४२ ॥ ऋतेति ॥ सख्यास्वर्मानीतः परस्त्रृतंको
किलो पिउन्मत्तत्वात्स्वभावाच्चजातः नैत्रयोरागो लौहित्यं यस्येवं विधः ॥ सन्त स्तुहि स्तु हि त्येवं रूपं शब्दं त्रऋतं ॥ पि
कः स्वभावदे वस्तुहि स्तुहीत्येवं रूपं त्रऋतं ॥ पिकस्वभावाद्दवस्तु हिस्तहीत्येवं स्तु कूजेत्यर्थः ॥ तत्रोत्प्रेक्षते पगितास
माप्तिप्रापितानलस्त्रुतिः स्तुतिर्य न ॥ तं स्तुतिं कृत्वा तूष्णीं न्तं तं नंकारः शुकं प्रत्ती वोद्दिश्य वस्तुहि स्तुहीत्यत्र तरे
कोरकिमिति तूष्णीं भूतोसीतः परमपि नलस्य स्तुतिंकार्दि ति न लस्तुतो वुद्धि प्रकारं प्रावर्त्तयदित्यर्थः ॥ एवंस्वने पि

५५

कस्य कथं समासमर्थ्यमित्याशंक्याह। कृतावीणानिवद्धस्कान्दितकचन सकृत स्पाञ्ज नृक्रिः। सर्वानुवादरूपया विज्ञा प्रसि
द्धः प्रवीणाग्चुंचुर्यस्य ताद्दशं पुस्कान्दितं सर्वमप्यनूद्येत॥ परमपि स्तुहि स्तुहीत्याहेत्यर्थः। नेत्ररोगेषु तत्रैव दृते तन्नृपं प्रतिव
लक्ष्मी त्वेवजातनेत्रप्रीतिः॥ सुंदरनयनानंदकारिणं नलं दृष्ट्वा जातनेत्रप्रीतिः। स्तुहीत्यनेनार्थद्वितीरागाश्रद्धेनोत्येत्त॥ अनूक्ति
चुंचुरिति तेन विज्ञ इति चुंचुपु॥४२॥ तुंगेति॥ अथैवं वीणाक्वणानुवादि पुस्ककालापानंतरं सा मत्तकेलिकुल्यां क्रीडाकृत्रिमनदीम
गात्मीत्। किंभूतां नैम्यास्तुंगेऽत्युच्चतरे प्रासादे वासः स्थितेर्हेतोः नरशाखूतातां आयतीं प्राप्नुवतीं अधोदेशे स्थितास्त्वयं महीयस्युन्नत
रे देशे स्थितां नैमीप्रस्तरणे यस्त्वेन प्रतिभासमानां तां तथा स्वर्गामिनी ऽर्कस्य विंबप्रतिकृत्या प्रतिविंबरूपेण महाप्रकृत्यानमणिना
राजमानां। प्रतिविंबितास्वर्गामिसूर्यविंबां॥ तथा च क्वचित्स्वभावकौटिल्यं व्रजंती गच्छंतीं अत एव फणायुवतिरूक्षसर्पिनीयमि
ति स्तुतिस्त्रास्तवालैः रथपदयुग्मं चक्रवाकस्त्रीपुंसयुगलैः व्यक्तं स्पष्टं युक्तं त्समर्थं अन्योन्यं परस्परं यथा तथा तीरे विषये
विनुत्सपत्नाप्य कर्मभूते वाद्वेत्तीरे प्रतिगत्वा आर्तिरुत्पा विरहपीडासंबंधिना रुतेन त्वत्वा सूचितां प्रकटीकृतां दूरस्थत्वात्त्वा
ध्यत्तमसावृतत्वाच्चस्पष्टतरमदृश्यमानामपि नदीयमिति चक्रवाकशब्देन ज्ञापितां॥ फणियुवतिरिति स्वचितामितिवा॥
सं ६ रूक्षसर्पिणिपि न्नैत्रा भवति सूर्यविंबतुल्येन शिरस्थेन मणिना ज्ञाता नेतेश्वक्रंचं क्रंच व्रजति॥ तां च दृष्ट्वा जनाः प
क्षिणेवा पलाप्यदीन स्वरोपलक्षिताः परस्परसहवासं चमुंचति। सूर्यमस्तं जिगमिषुं दृष्ट्वा चक्रवाकमिथुनानि सांध्य

विरहपीडयारुतं कृत्वाऽन्योन्यमुक्ता पलाप्य केलिकुल्यापरावरेतीरे तिष्ठतो ॥ तिजेनौ दृष्टावित्यर्थः ॥ उत्पन्नेत्र अस्मिन्निति वा
सः ॥ तुंगधामादमारुह्य प्राह्लादितिलब्धोपेवा ॥ ४४ ॥ अथेति ॥ अथ केलिकुल्या दर्शनानंतरं संतानेमौ रक्तौ परस्परात्तु
रक्तौ स्वभाविनरक्तवर्णौ वितिविरहा महत्तया । नितरां वियोगासहिष्णुतया हेतौ कामशरविद्धौ स्मरज्वराघातिसति ॥ अ
स्त्रे रुधिरैरिव रक्तौ रथचरणौ चक्रवाकौ विलोकमाने वर्त्तमाने पद्मानां सुप्तिकाले संकोचसमयं सायं संध्यासमयमपि
विरहपीडितकोकदर्शनदुःखसंजातः श्वसनो निःश्वासन रस्तन्निर्गमने न कृत्वा विकीर्णसरोजसौरभ्ये यस्मिन् रत्नाद्दत्वा
मरुत । संध्यासमये पद्मसंकोचात्सौरभ्यं मंदत्वे पिनिःश्वासमेघनेन पद्मिनी त्यात्पद्मसौगंध्यं तदानीमपि विला
रयस्मेत्यर्थः ॥ कोकौ तावदृशौ दृष्ट्वान्तरां क्रियाश्वासेत्यर्थः ॥ अन्योप्यस्तु दत्तं रक्तव्याप्तं दृष्ट्वा हर्षनिःश्वसिति ॥ वि
रहासहनौ हताविबाणैरितिशेषः पादः सुयोजनः ॥ अस्त्रैः कामस्य रथचरणौ तुमाक्लिन्नये निर्भुवन् ॥ ४५ ॥ अन्यैति ॥ जे
मौ मतिं प्रति दूतिरनिलपति स्मावोचत ॥ इति किं हे सदय सकरुण त्वं कोकयोरवस्थां विरहविकलत्वं विलोकय ॥
हा कष्टं इमौ कोकौ निंदती दशावस्थितौ कुर्वतौ मत एव मन्ये नेम्पात्र पि हृदयं च एतच्छोकेन विदारयंति । निर्मांको
कयोरवस्थां विलोक्य कइव नरस्सचेतामन्त्वाभ्यानयो दिग्निश्च पितृसर्वोपि परिदेवनं करोत्येव ॥ सदयत्वान्नवदुःखं न
विष्यतीति किं वक्तव्यमित्यर्थः ॥ ४६ ॥ कुमुदेति ॥ हे प्रियरविः उदेष्यतो उत्पन्नात्स्मानां कुमुदानां दलं विकासरूपं द

र्ष्यअसौ देवाद्दाक्कुवन्निव विलंवितुं मत्वरं गंतुकामो यस्य तस्य भावः सत्ता तामतानीत् विस्तारितवान् आसन्नास्तमयी
वर्त्तत इत्यर्थः। तथाक्रांताः पक्षिणः प्रतितरु विरुतं प्रति विशेषेण रुतं कुर्वंति आसन्ननेत्रनिमीलनावसाथिनो विरुवं
त. संतः स्वस्वनिवासवृक्षं प्रति गच्छंती त्यर्थः। तत्रोत्प्रेक्षते। स्वरूदिनिवेशिताः कोकानां काकुवः शोकविकृतविरावा एवा
तिपीडाकारित्वात्कुंतास्तन्न्यायेस्ताः स्युः। किंच चक्रवाकशोकपीडिता इव पक्षिणः क्रंदंती त्युत्प्रेक्षा। अन्योपि वैरिणा दुष्ट
तीमस्त्रिवृद्धिमसहमानः सत्वरं कुत्रचिद्गच्छति। तथापरः सज्जनः कश्चिदुःखितं कंचिद्दृष्ट्वा क्रंदति। सोढा तन्नसुदं न लोकेति
षष्ठीनिषेधः उदेष्यत्तौ माष्ठीनयोर्वृमिति वैकल्पिकत्वात्तु मन्नावः॥५७॥ अपीति। हि प्रिय स्वरूपानिष्टमपि विरहमाचरंतौ स्व
यमेव कुवार्णौ न हि सदा स्वामिष्टाचरणस्वभावाविकल्प विषयत इत्यत आह। धिगमी ज्ञानं तत्पूर्विकाः पूर्वा विरहाचरणात्प्रा
वीणा सर्वश्रेष्टाः कर्तव्यता ययोस्तौ। अधिगमो लाभो हितमिति यावत्। तत्पूर्विकाः सदुदेशपाः पूर्वाः सर्वश्चेष्टा ययोः। ता
दृशौ वा। बुद्धिपूर्वकारिही स्वाहितेन प्रवर्त्तते। कोकयोश्चदिने भोजनादयः सकलाश्चेष्टा ज्ञानपूर्विकाः स्वहिताश्चैवं सति
अनेनैवं स्वाभावावप्येतौ स्वेध्यायां अकस्मादेवान्योन्यविरहं स्वयमेव यस्मादाचरतः तस्माद्विधिवशं दैवाधीनं चेतना
नां प्राणिनां चेष्टितं सर्वकर्माधीनं प्राणिनामाचरणमित्येवं रूपोनुमानिकार्यत्कारणविशेषज्ञाने विषये यत्नेतौ विशि

नैष०टी०२१

ष्टौ विहंगौ कोकौ इदमेव निदर्शनं अयमेव दृष्टांतः अहह हा कुतेः खेदे वा॥ तस्मात्प्राचीनकर्मानुसारेणैव प्राणी कदा
चिद्धितं कदाचिच्चाहितमाचरति इति भावः॥ प्राणिनो दैवाधीनचेष्टिताः प्रतिकूलतयाज्ञातेपि प्रवर्त्तमानत्वाच्चक्रवाकव
दित्यनुमानं॥४८॥ अंघ्री इति॥ स्फुटमुत्प्रेक्षे। हे प्रियरथांगमिथुनं विछेत्तुं दियोकुंभघटव विशेषेण विदायितुमन्विच्छता विधि
ना ब्रह्मणा॥ दैवेनवायं कालमायसंध्यासमय एव स्फुटं खलु गुणयोगात्कालः कृष्णः लोहमयः कृपाणः शातुशाणवलये
सूर्यरूपे यानचक्रे संयोज्यनिज्यते। किं नीहृगी। क्रियते किमित्यर्थः। किंभूते वलये अस्तमयकालसांनिध्यादंघ्रि स्फुः किरणा
णि मासस्वइष्टतस्मिन्मदारुणेनन्तन्तर्भवेनेः घवाकर्षणरज्जुर्याहि निरन्तुणन्तमेस्तदृत्तेन्तस्वि निवलि निः गुरुपेः त
र ध्वनिरंतरक्रमणेन तथा दंडसंज्ञकेन पारिपार्श्वकेन त्वाजि निश्शान नत्त्रीलेश्य वशाणचक्रो धारकूते नाकर्षणरज्जुः संपु
क्तेन दारुमायेन दंडेन गोभमाने। सन्निहितास्तमयसूर्यमायेसंध्यासमयसान्निध्या चक्रवाकयुगं तीक्ष्णतरखड्गः विदा
रितमिव विधिवशाच्छिन्नयुक्तं सद्दृश्यत इति भावः॥ अन्योपि किंचिद्विछेत्तुं खड्गं शकवि विशेषेण विशिष्टेशाणचक्रे तीक्ष्णं करोति
किरणप्रग्रहो रस्मी। माठरः पिंगलो दंडः चंडांशोः पारिपार्श्विका इत्यमरः॥ क्षमावितिना षितपुस्कं। निजरति णिजित्व
ग्रौचे इत्यस्मात्कर्मणि यक्॥ न करितकारस्त्वां न्वैवतिज्यत इति पठति। तदसत्॥४७॥ इतीति। सनलो पितां नैमीमि

४७

तिश्च वदत॥ इति किं हे प्रिये त्वं यथोक्तं तदिदं स्फुटं निश्चितं ईदृग्गामी हंसः सत्यमेवेत्यर्थः॥ किंभूतः। इति स्वैर्वक्रीरीत्या वि
धुमुख्या जैम्या मुखेनार्पितं दत्तं मुग्धं मनोहारि आलापितं मंजुभाषितमेव सुधा सर्वरसवाक् उत्पादमृतं उन्मादकत्वाच्च
मद्यं निपीयास्वाद्य सादरमाकर्ण्यैव स्मितेन श्रावलं मिश्रितं वलत्॥ जैमी संमुखं च वन्मुखं यस्य सः। कामी नो हि कामिनीमुखा
र्पितं मद्यं सानुरागं पिबंति॥ अनंतरं वलितमुखाः सहासं किं विदधति॥ ५०॥ स्त्रीति॥ अयि प्रिये अहं चक्रतरेत्वक्रुवौ रति
श्च प्रसूनशरः कामश्च तयोः नम्रांस्त्रीजयाय रत्या भुंजया स्वकामेन कर्णमानुष्य चक्रिता चापद्वयी वेयं॥ त्वद्भ्रुवावेव
द्वये धनुषीहत्यर्थः॥ किंभूतयोः अखिलौ त्रिजगतौ वर्द्धमानौ तन्त्र ऊनौ यौ स्त्रीपुंसौ प्रविजल्पविभागं कृत्वा दृष्ट्ये कैष्य
काजेतुं आलोचितं विचारितमौ चिंत्यपान्यां तयोः स्त्रिया रमेवज्जेतुं योग्या पुंसश्च पुमानिति चेति आलोचितौ विस्मयौ॥ तया
नालिकानां वितस्तिमात्रनालीकारव्यवहारविशेषाणां मुक्तिं मोचनं मिच्छत एवं ब्रीलयोः तयो रति कामयोः संबंधिनी छिन्न
लिकौ नालीकमोचनोपायस्तत्परं ध्रुवं ह्यपर्व द्वयं त्वन्नासाछलेन त्वदीयवामदक्षिणनासापुटद्वयव्याजेन निकृतांगो
पितां जानामि त्वन्नासापुटद्वयमेतत्र भवति॥ किं तु नालीकद्वयमुक्त्युपायस्तौ रतिकामयोः छिन्ननलिकालेवा हंस
कइत्यर्थः। तथा त्वन्निश्वासलतेतव वामदक्षिणनासा निंश्वासधाराद्वयं तयो प्रत्येकं मधुस्वसनजे वसंतकालीन मंद

नै०टी०२१

यानिलप्रजवं वायव्यं वायुदेवताकमस्त्रमेव। सुंदरत्वश्लाघ्यवयवदर्शनमात्रेणकामवशत्वं भवति। तिलावः। द्वि
नलिकीसमाहारो द्विगोडीप्॥ वायव्यं सास्य देवते त्यर्थे वा घृतुयत्॥ ५१॥ पीत इति॥ हि नैमि वर्णे शुक्लादिरूपेषु
मध्ये गुणो चैत्रोष्यकादिभिर्गुणपदार्थत्वेन निर्दिष्टः पीतो हरिद्राभो वर्णः सच स एवातिमधुरो रमणीयतरो न तु वर्णां
तरं मधुरमित्यर्थः। यथा येन प्रकारेणनायं पीतो वर्णस्तोपि कायदेहे वर्त्तते॥ अत्युत्तमयात्वयापि शरीरे धार्यते॥ त
स्मादयमत्युम इत्यर्थः। अथच रूपांतरापेक्षया। शुक्लरूपस्यैव प्रधानत्वादन्येषां वाप्रधानत्वाद्गुणे शुभमध्ये गुणे
ऽप्रधानभूतोपि यैर्हरिद्राभो वर्णः स एवातिमधुरः प्रधानभूत इत्यर्थः। यस्मादयं ते काये वर्त्तते। अप्रधानस्यापि
केनचिद्वस्तुत्वेनांगीकृतत्वाद्धि प्राधान्यं भवति॥ तथात्वयांगीकृतत्वादप्रधानस्याप्यस्य प्राधान्यं युक्तमेवेत्यर्थः
अथच गुणः पीत एव नान्ये गुणाः पीतवर्ण एव गुणरूपोऽन्ये तु दोषरूपा इत्यर्थः। स एव वातिमधुरः उपभयत्रापि
हितुः॥ यतोयं तव काये वर्त्तते तस्माद्गुणोतिमधुरः श्रेष्ठेत्यर्थः। अथच तव काये वर्त्तमानोयं प्रत्यक्षगम्योतिमधुरो
रसो यथा मया पीतस्तत्तद्भुवनस्थानस्तु वनवरो नास्वादितस्तथा तव काये सोऽतिप्रसिद्धो वर्णगुरोगोरिमापिपी
तः सादरं निरीक्षितोऽयच हरिद्राभ इत्यर्थः॥ वोपि यान्योन्यमत्युच्चयेस्तोतिमधुरो धरो यथा पीतस्त्वयायं वर्णगुणो

पिपीतस्वेतिवासंबंधः ॥ अथचतरातिमधुरोवर्णगुणोवर्णात्मकः ॥ आहलक्षणेगुणोयथापीतत्वाख्यादितो ॥ तिम
धुरावाणी ॥ यथापीतेत्यादिज्ञातव्यं ॥ एवं छलेनोक्ता प्रस्तूयीतरूपवर्णएवयुक्तिमाहात्म्य छरीराश्रयं पीतवर्णं विचित्र
कनकं चं पर्कृत्वो नन्नोवर्णस्यपतत्सुवर्णमितिकैर्जनैरादृत्यादरेणनोत्कीर्त्यते नोद्योष्यते ॥ पितुत्वदंगधृतवर्णतुल्यवर्णधा
रणादेवचं पर्कसुवर्णमित्युच्चैः कीर्त्यते ॥ अथचत्व छरीराश्रयंपीतवर्णं धारयाम्यामीकरं त्वो नन्नोवर्णस्येति व्युत्पत्त्या सुवर्णमि
तिकैर्जनैरादरेणनोद्योष्यते ॥ पितुत्व छरीराश्रितपीतवर्णतुल्यवाणधारणादेव सुवर्णमितिकीर्तिलेनइत्यर्थः ॥ अथच
ग्रोजणोवर्णस्तुतिर्यस्यत्वदंगवर्णं विन्द्रदतितरांसुस्पन्तुस्वतइति ॥ सुरव्यया हत्या सुवर्णमितित्वदीयमंगं कनकं तुन्वइति
वर्णसाम्यधारणात्गौन्या हत्यालोकेनकथ्यतइत्यर्थः ॥ अतएवपीतवर्णस्यपुरस्तात्प्रधानांवर्णान्तराणांनीलरक्ता
नां वर्णानां वर्णनाका ॥ पितुसानैवकुत्रापुपयुज्यतेतत्कथानकार्येवि ॥ यावद्यतः कारणात्यः धवलिमाशुक्लगुणः ष
ड्विधेषुरूपेषुमध्येराजेव ॥ श्रेष्ठतमएव ॥ निर्मलत्वादस्य हितिस्वाद्रूपविभागवेलायांवैशेषिकैः प्रथमोच्चारितत्वाच्चप्र
धानत्वंतस्यापियोगात्संबंधात् रजतंदुष्टेऽप्यमीवीनोवर्णोयस्यतत्वाडुर्वर्णशब्दवाच्यता न रूपंडुर्यशः ॥ अकीर्तिरिति
नीलादिवर्णान्तरयुक्तंतदुर्वर्णतांप्राप्नोतीतिकिंवाच्यमित्यर्थः ॥ यावत्सकलंरजतमितिवा ॥ अप्रधानस्यापिपीतरू

नैषटी०२१

पद्यत्रैमीशारीरेणांगीकृतत्वादेवो न मतं। तद्योगात्कांचनेसुवर्णमितिकीर्त्तिः। जैमीशारीरेणांगीकृतत्वादेवत्वो न
मस्यापिधवलिम्नो न तु न मता। धवलिमावर्णविचित्वात्गुणवचनवाचित्वाध्देमणि चु॥५१॥ इदानीं नवभिः श्लोकैर्नैर्म
वाणीं वर्णयति॥ खंडेति॥ हे नैमि छंडुकः स्थले कुविशेषः पयस्तां पिंडेन दुग्धानाम तसंताग्निपाकघनीकृतेन गोलकेनैव
दोहदेन एवं कृतेस्थले क्षेत्रे चंद्रोहति। मांकुरोनव नि। किं कृतेस्थलेखंडः शर्कराचूर्णमिव कृत यस्मिन्तथाम धूमृतं
माक्षिकमेव वाययोयस्यास्तथाकादंविनाभेघमालयान्नपर्णत्र पूर्णजलत्वकरणाध्देतो ध्दिगुणाकृष्टमेघमालाह
ष्टजलं हि क्षेत्रं पुनः कृष्यते। तादृशेऽस्मीकृते त्र मं हि वीजं अंकुरार्थं पुनः पयोकृतित स्थाने त्र दुग्धगोलकः॥ दोहदेस
नेननिरांतं कमन्निच ध्दिः सूचिता। अनंतरं च प्ररूढोंकुरः सन्नपुंडुकः फलोत्पत्तिसमयपर्यंतं प्राक्षाणां नवं पक्वफल
निःपीडितरसस्यसेवनेः कृत्वा इक्षुदंडादपि परिणतमाधुर्यातिशयफलं यदि धत्ते। तदा तर्हि तत्तोपि विशिष्टेक्षु
फलादपि सकाशात्त्व जिरां तव वाणीनामुद्देशाय निर्दिशार्थं मधुरत्वादः अधरोमूलप्रकृतिर्यस्य तत्तादृशास्तमङ्
प्रत्ययउदेति। उत्पत्तिं धे। कीदृशै म्याणी तिष्टष्टे उक्तविशेषणविशिष्टादिक्षुफलादपि मधुरतमेतितदा निर्दिष्ट
शकयत इत्यतिशायनेतमप्तद्देवसंगच्छत इत्यर्थः। एवं विशिष्टं फलं यदिन्नवेन्न हितिदेव वाचदति मधुरं। तस्मादप्यति

५५

मधुरंवस्तुविद्यतेकिमितिदृष्टेनिःसीममधुरतमस्यान्यस्याभावातमप्रत्ययांतमधुरत्वाद्देनेनद्वाक्षेपेवोत्तरत्वेनदातु
योग्यानन्तुविशिष्टमपीक्षुफलंनिःसीममाधुर्याभावाद्गमप्रत्ययानुपपत्तेःकिमुतमधुरातिद्रव्यांतराणीतिनवद्यांएणी
वन्मधुरतमंवस्तुकिंचिदपिनदृष्टमितिभावः।एवंविधेक्षेत्रेयदिउंडुकोसोहतिसचपयसांपिंडेनदोहदेनद्रक्षाद्रवसे
वनेश्चदोहदेनयदिफलंधत्तइतिभा।कादंबरीमेघमालेत्यमरः।उद्योदैत्यविशेषेऽनेद्ययोरितिविश्वः।ततश्चार्थ
कन्॥पश्चादुन्मीलदिति।अमृतमेवांधोऽन्नंयस्यदेवत्वात्तेऽमृतान्धसोमराः।यदिक्षुरसएवोदधिस्तस्मान्मंथनका
लात्प्रागमृतानांदेवासुरोच्छापितसर्वसुधानामास्वादत्तासुधामात्मनैवोच्छापयेन्निर्गमेत्तर्हिसामधुरतमासुधा।
मत्कर्णयोःपरमांपारणांअद्वितीयदृष्टिहेतुर्भवत्याजिघ्नायाःकृतिंत्वद्वसनानिर्मितांवाणीं।आकर्ण्येत्स्पर्धांसर्वमा
कारयित्।किंभूतःस्मरः।उन्मीलत्प्रतिप्रकाशमानः।तिशयितोगुडस्यइक्षुरसविकारस्यपाकस्तत्रन्यायेतंतव
द्भ्रवतंतवःऊर्ध्वोर्ध्वंप्रसारितगुडनिर्गतदोरकाःतएवदैर्घ्यमालितातयैवरज्वामंथभ्रमणदोरकेणकृत्वादानांतःतुल
पुरुषदानमध्येआयुरारोग्यादिफलकःकृतःशर्कराचलःसयेवमंथामंदरस्तस्यभ्रमीभ्रमणानि।अर्जुयन्।क
र्वन्तयारज्वाशर्कराचलरूपंमंथानंचालयन्।।अतिमधुरसामग्रीसंपादितंहिमधुरतमंभवती।त्यैवंविधमधु

हस्ते

नै०टी०२१

रतसामग्री कृत्वा मधुरतमापि सुधा तव द्वयोः वाणी तुल्या न वेद्मि न वा। अन्या तु नैवेत्यर्थः॥ अथातः संप्रवक्ष्यामि मन्त्रं कैरा
चलसुन्दरम्। यस्य प्रदानाद्दिग्धर्करु द्रव्यस्तुष्यंति सर्वदेतिदानखंडे। आह्वयेत स्वर्ग्यामा ऊँ ३ इति ठ ठ॥५४॥ आस्येति।
अयि प्रिये तवास्ये या भारती सरस्वती वसति किंतु तेऽस्ये तस्या भारत्या एवास्थिते स्पली लारविंद सैवोलसत्र
सरन्दवो सौगंधो यस्मिन्। पद्मिनीवान्त्वायन्तुल्य परिमलः॥ तथा तस्या एव कच्छपी वैणी निक्वणः मधुरास्फुटो वीणासं
बंधिनादः तद्रूपं मिलन्तं वक्ष्यमाणं वाणी विलासरूपं वक्रोक्त्यादिशानाविधवाग्विलासरूप मधुतं यस्मिन् तथा।
तस्या एव किलित्रमणा ईलीलागमनयोग्यं गैरिकेन रक्तधातुविशेषेन सुधाया धवलनसाधनचूर्णद्रव्येण च चित्रा
दिनिर्माणं यत्र तादृशं यद्धर्म्यहं तद्रूपस्तत्तुल्यो धरोष्ठो यस्मिन् तादृशे। आस्ये पुरो दृश्यमाने ये दंतास्तज्जो द्विदंतस्तज्जो
द्विरदंतमालेराजतः शोभतेतद्रूपः। अयं पुरो दृश्यमानः तस्या भारत्या मुक्तामणिरचितो हारएव किं तद्धन्ते रेजाति
इत्यर्थः। सरस्वती वीणाक्वणितं तुल्या तव वाणीत्यर्थः। अत्र प्राधान्येन वाणीवर्णनं अन्यत्तु आसंगिकं पद्मगंधादिति
मुखे भारती व्यासो नुमीयते। ईश्वराणां स्हं गैरिकादिविचित्रं भवति॥ गैरिकसुधे सुधे तिवा॥५५॥ हस्तेमितेवा
णीकापि वर्णयितुं मशाक्यत्वात् लोकोत्तराप्यवानिर्दिष्टनामा उज्वलरसस्रोतस्वती शृंगाररससंबंधिनी नदी अथ

वनिर्मलजला।निर्मलजलसंबंधिनीवानदी।अतएवमन्मथस्यतीर्थंकामोद्दीपिका।तथाइक्षुर्यस्यअस्मान्
द्याःसंबंधिनःपुलिनस्यसंबंधिनीवालुकेवइक्षुविकाररूपः।खंडःखंडइतिआलप्यते।गीयते।तथाघृतानिर्मलतां।
सितान्युन्नाश्चक्रिकाःशर्कराद्यलखंडानि।।एतस्याःस्त्रीरस्यमृद्वेवधवलमन्निकयेवविरचिताः।किं।तथापीयूषममृतं
अस्याःसंबंधिनीपयांसिइदंपयांसिइदंपयांसि।किं।अस्याजलान्येवामृतत्वेनालप्यंते।किमित्यर्थः।तथातवाधरोदव
इदंतीरे अस्यान्यधास्तीरेउन्नेतटो।किंशृंगाररसप्रधानाकामोद्दीपिका।नवद्वाणीमधुरतमेतिनावः।।५६।।परेति।।हे
तरुणिप्रादुर्भूतयौवने।सुधासिंधुवेणीसुधानदीप्रवाहरूपातवेयंवाणी।परभृतयुवतीनांसमप्यद्यापित्वैनगतुंना
किंतुनायाति।यस्मादितोस्माभिः।कोकिलाभिरसौत्वद्वाणीमवत्यउपविपिनेउपवनेस्थित्वारसालांकुरस्वादेनरसिक
तिमधुरे।अयममाप्येवंवाणीनवत्वेवंसाभिलाषिकर्तुंकंठस्थां।कर्तुंआम्रेडितेनपुनःपुनःपोषणेनकतिवारान्नाभ्य
स्यतेपितुवरुवारमभ्यस्यतएव।तस्मादद्यापितासांनवद्वाणीसम्पर्कंयातीतिज्ञायतइत्यर्थः।।कोकिलालापादपित्व
द्वाणीमधुरतरेतिनावः।।मिन्द्वाटनेनविद्याभ्यासःसुकरइतिसूचनार्थंपरभृतपदं।युमपेक्षयास्त्रीणांविशेषंतस्तरुणी
नामितिसूचनार्थंयुवतिपदं।।५७।।उपर्युइति।।ननुहेप्रियेतेऊर्ध्वोरदनच्छदओष्ठएवोवंधूकमालामयंस्मरधनुः।त

त्पे

नैषटी०२१

वाधराधरतटस्याधस्तनोष्ठस्याग्रस्याधःसीमायांपर्यंतमर्यादांवर्त्तनालेखास्यैवदैर्घ्यख्यातात्तत्रकावमवामिमौर्वी
एषातावकीवागपिमान्मथः कामसंबंधीकामाधिकृतप्रतिपादकधनुर्वेदएव। सोयंविशिष्टस्त्वद्वाणीस्तोमात्मे
योधनुर्वेदउचितंयोग्यंयद्यातद्याकोणधनुष्मती। निर्वीणवादनधनुर्युक्तानिर्वीणानिरस्यस्वस्पत्ते। परमघा
पिनायात्तीत्यर्थः। त्वद्वाणीवीणाकणितादरपिमधुरतमेतिभावः। धनुर्वेदश्चधनुर्धरैरेवाभ्यस्यतइत्यौचित्यं॥
अभ्यस्यतेएतदुचितमितिवा। यत्त्वस्यनायातितदागमनार्थमस्यामोधुचितश्चेत्यर्थः॥५१॥ सइति॥ हेमुग्धेहे
दरीयःपुरुषःमधुकिंनामेतिपृच्छति। प्रश्नंकुर्वाणेजनेविषयेतवाधरमेवोत्तरंनदत्तेसग्राम्यःपामरोऽचतुरः। न
तुनगरनिवासयोग्यइत्यर्थः। तथाहिमकिंप्रकारंकमितिप्रश्नंकुर्वाणेयस्त्वद्दूरेवोत्तरंनदत्तेसविदग्धानांचतुराणां
संसदिसभायांकेयतांपंक्तिंबहिर्निर्गतत्वंपातित्यंगच्छति। तेषांपंक्तौनोपवेशपते। सोप्यचतुरइत्यर्थः। तथासुधाना
मकीदृकइतिचप्रश्नंकुर्वाणेतेगिरंत्वोत्तरंनदत्तेस्मरस्यविशिखास्त्रंचपुरुषंस्पृष्टुमपिविगानोल्लुखाजुगुप्सायैः
इतोयमागोनीरसोयमितिजुगुप्सयातंनस्पृशंतीतिनर्मिदत्तीतिकिंवाच्यंसोप्यचतुरइत्यर्थः। त्वद्वाणीसुधायाअ
पिमधुरतमेतिभावः। अधरादिवर्णनंतुप्रासंगिकं। ग्राम्यःग्राम्यादघ्रखञादितिनावार्थ्यः। पांक्तेयः। नद्यादित्वा

५२

दक्॥ पणामध्य इति। हे प्रिये त्वं यस्माद्धेतोर्मध्ये उदरस्थाने वली धृतः अणिमा सौक्ष्म्यातिशयो यया सा तन्वोदरी
तथा गरिम महिमभ्यां गुरुत्व महत्वाभ्यां सह वर्त्तमानं श्रोणिर्नितंबः वक्षोजद्युगं स्तनयुगं च यस्याः सा गुरुस्थूल
नितंबा महोच्चकुचा च॥ तथा जगत्स्फुरद्रूपं चेतसि वशित्वं जितेंद्रियता यस्याः सा पसि त्रना। तथास्मिते ईषद्धा
स्येपि धृतो लघिमा लत्वं यया सा। अल्प हासा तथा मां प्रत्युदिक्स्पर्द्धि त्वं स्वामिता मे घिमम प्राणेश्वरा तथास्त्वकैश्चव
नच्चातुरीयें विषयेपि कांम्येन प्रकारवाकुल्येन। रम्या वक्रोक्त्यादि नाना प्रकारां वाणीं वक्तुं यो यथा वांछति तं प्र
ति तथा वक्तुं त्वमेव जानासि नान्या। तथा दिग्विप्रास्यादौ विदिक्त्वाग्नेय्यादौ च यशः सौंदर्यादि विषयकीर्त्तिः
कीर्त्तिर्वा स्फुत्वा लब्धः। कामेन स्वेच्छया प्रतिहत प्रसरो व्यवसायो गतिर्यया॥ सा त्रैलोक्य प्रसरकीर्त्तिरेवं विधाय
स्मात्तस्मात्कारणात्स्तुदितो दृष्टईशाईश्वरस्त्वां निर्माय सौंदर्यादिना परितुष्टः सन् अणिमादिरष्टौ च पिन्न
तीर्महासिद्धीस्तुभ्यं स्वस्यासिल्पाय त्वद्रूपाय निज निर्माणाय प्रायच्छत्॥ संतुष्टो हि पित्रादिरपत्यादेः स्वयं
धृतमलंकारादि ददातीति तथेश्वरेण संतुष्टेन स्वयं धृतमणिमा महिमा गरिमा लघिमा वशित्व माशित्वं प्राकाम्य
कामावसायिता वेत्येवमष्टविधमैश्वर्यं तुभ्यं दत्तमन्यथैतत्त्वयि कथं स्यादित्यर्थः॥ एवं स्तुत्वा कस्याश्चि

नैषटी०२१

ना
दपिनास्तीतिं वसीतद्भावौ शब्लेषशक्तिछलेनैतत्सर्वमुक्तमिति ज्ञेयं॥ वाणी वर्णन एव तात्पर्यं मध्वादिवर्णनं
प्रासंगिकं अलिमादौ गुणे वचनत्वादिमनत्वं वशेंद्रियानां स्वाधीनत्वं तदस्यास्तीति वसी तद्भावो वशित्वं
जितेंद्रियत्वं॥ ईशनमीशस्ऐश्वर्यं॥ तदस्यास्तीतीईट् शीतद्भाव॥ ६०॥ त्वदिति॥ हे प्रिये वयं तद्भाव्वः स्तुत्यैन पटवः
तस्मात्पीयूषममृतमेव स्तुमः॥ तस्यामृतस्यार्थे मृतनिमित्तं सकुराणादिप्रसिद्धो गरुडस्यामनेद्रस्य च सम
रः अजनिस्ठानेयुक्तं॥ तदित्यहं जाने॥ मन्ये॥ नामयस्माद्धेतो रनया त्वद्वाण्या यस्मिन्नमृते तैर्नैपादयो। प्रक्षा
लनैवानुग्रहो धृतहृत॥ किंचतया द्राक्षाया नकस्य पक्कद्राक्षा सं बंधिन। संस्कृतरस विशेषस्यमानो हंका
रस्तस्य मर्द्दनं खंडनं स्फुटजूतिः॥ तया तथा क्षीरेदुग्धे विषये दृढा अन्येन त्याजयितुमशक्या अवज्ञायस्याल
याअधश्च यस्मिन्पीयूषे वेनेव द्राक्षया कृतया वाण्यास्त्वीयसुच्छिष्टं तरूपाणां पदानां॥ प्रक्षालनादनुपश्चाद्ग्रह
णं यह तो स्त्सेव॥ अमृतक्षालिततयैव निर्दोषं मधुरं च त्वंवदसात्पर्यं द्राक्षाक्षीरेतिष्टतांपीयूषादपि त्वद्वा
णीमधुरतमेति भासः॥ प्रक्षोर्यस्मिन्ननुग्रहातिशायः स एव चरणक्षालनादि करोतिति॥ ६१॥ स्तुकइति॥ हे सुद
ति। कोकयोर्विरहजनितः शोकः सदयरुदयत्वात्तांचेन्नुदतितर्हि व्याहराज्ञापयय तेऽआज्ञाकरोऽहं कुर्या

تابع

गत्वा ए तस्याः कुल्यायाः कलस्थं उदकप्रतिबिंबितं नरानुं सूर्यं अनस्तं अस्ताचलं व्रजितुं प्राप्तुं अस्तमं गंतुं यद्वा
ऽनस्तमस्ताचलप्रतियोगिनमुदयाचलं गंतुं मनुनयेप्रार्थये । इदानीं त्वयास्तोन प्राप्तव्यः पुनः उदयाचलो वा
गंतव्य इत्येवं सूर्यं करपुटयोजनपूर्वं सप्रार्थ्य पुनः प्राचीनेष्यामीतिया वत् । यदि मयांजलौ वद्धेपि अयं सूर्यः म
मानुनयेप्रार्थनायां विमुखस्यात् । यतः एकः केवलः ग्रहः तिनिवेशो यस्मात् ग्रहः स्वग्रहः राजा । तन्नहि
सूर्यास्तदिनिसंबंधिनमंजलिं आत्यां कोकात्यां मेव दत्वा इ हप्रासादे नवतीप्रति पुनः एष्यमाणमांगमिष्यंतं
मांपत्रप ॥ एवं कोकनोदनव्याजेन वहिः संध्यामुपासीतेति वचनात्सायं संध्योपासनानिमित्तं वहिर्निर्गमनार्थम
नुज्ञां याचितवानिति भावः ॥ सुदती त्वमेत्यो स्थनंतरं इष ह्वानकिरण प्रकाशेन ममम हानानंदो जनिष्यतीति तद्दर्श
या हरेतिप्रार्थ्य सइतिसूच्यते ॥ इत्वेवेति पाठे तु तेद्वा ॥ एष्यमागतपर्यादीडोलड्स्थान चाद्वशानदिति ॥ सायं
नलः स्वयं सायंतनं विधिं संध्याग्निहोत्रादिकर्मविधिं स्तुः कर्तुकामः सन् ॥ प्रासादाद्वहिः रस्तूत् ॥ निरगात्किंत
र्थः किंतत्वा इति व्याजादेवं प्रकारेण सूर्यस्तुनयार्थं नदीप्रति गमिष्यामि नवतीवनिजालानी निजसखीनां इ
हस्त्यैव कस्मिंश्चित्प्रदेशे त्वयानदृष्टव्यामतिलीनांगुष्टां स्थितित्वत्कर्तृकर्तव्यत्कर्मकं वा परिहसितं परिहासक्रीडे

नै०टी०२१

वं कंदो मूलमुत्पत्तिहेतुर्यस्य ताद्दशाय तरुणीनितायता सांसखीनामानंदीयमुक्तं त्वंमृगयतां गवेषयतुइ
ति॥ एवंत द्वचनाडैमी कंचिद्व्रनाः सखीः गवेषयितुंनिर्गतानलोपिसायंसध्यां कर्तुंवहिर्निरगादित्यर्थः॥
सायंतनेत्यादिनो त्तरसर्गसंगतिः सूचिता॥ विधिविधिस्तु द्वितीयेतियोगविज्ञागान्समासः॥ २६२॥ श्रीहर्ष
मिति॥ तस्य कृतौ श्रीहर्षकृतेत्ररतिशयेन नव्यः पूर्वतर प्रमेयपरिपूर्णेनैमीनर्बुः चरित्रवर्णनं प्राचुर्येण प्रस्तु
तं यत्रता दृशे काव्ये एकविंशतिः पूरणएकविंशः गननासंख्यानं यस्य यद्वैकाविंशतेः पूरणी एकविंशीकैर
गणनासंख्यायस्य स सर्गः अगात्॥ समाप्तः॥ २६४॥ ॥छ॥ ॥इतिवेदरकशेपनामश्रीमन्नरसिंहपंडि
तात्मजनारायणकृते नैषधीयप्रकाशे एकविंशतिमः सर्गः॥ २१॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ शुभंभवतु॥
श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ ॥छ॥ ॥श्रीः॥ श्रीः

॥श्रीगणेशाय नमः॥ ॥इदानीं सर्वसर्गांतिप्रस्तावितं सायंकालं वर्णयिष्यन् कविर्द्वाविंशं सर्गमुपक्रमते॥ उपास्येति॥
असौ धरेंद्रो नलः सायंसंध्याप्रांतं नवेनां तिमाशायाः प्रतीच्या आशाया दिशः रागेण रक्तवर्णेन हेतुना कांतायाः अधरं
तुं बिभ्रधरोष्ठस्मारितेनोपस्पता दृशा संध्यारागसदृशैः नैम्यधरस्मारासन्नत द्विरहास हिभुतयाव हिरवस्यानुमरा को
यत्रसाविघतेतं सप्तमे न्भूमिभागे कक्षायां स्थितं नैम्याधरं पर्वतरूपं सौह हर्म्यप्रासादस्य सप्तमी। कस्युपकारिकाम वा
प्रवान्। किं कृत्वा तां ध्यंसंध्याबंधिनं संध्याजयादि विधिउपास्य कृत्वा॥१॥ प्रतीति॥ सोयं नलः सायंकालसंबंधिनी संध्यां रात्रि
दिनसंबंधिनं मुकृत्तं नैम्याः पुरः उपश्लोकयतिस्म। श्लोकैः स्तौति स्म। किं कृत्वा प्रलु ब्रजं त्यासं मुखभागं छित्पा प्रियपावि
सुक्तं अंकेमध्ये स्थिता सज्जा आस्तृता शय्यात् लिका यत्र तं पर्यंकमध्यास्य स्वयमधिष्ठाय तां नैमीमपि अधिवास्य तत्रो
पवेश्य॥ पर्यंकं अधिशीङ् इति कर्मत्वं। अधिवास्यएपं तद् स्नेर्ल्यपूतस्य धात्वंतरत्वाउपाधीति कर्मत्वाप्राप्तेस्तामधिवा
स्यत्यत्रसाधुत्वं त्रिवेव निश्चेयं॥ उपश्लोकोपतिसत्यापपाशो निणिह्स्मयोगे न्भूते लट्॥२॥ विलोकेनेनेति॥ हे प्रिये त्वंज
नानामधि ... य स्प वरुण स्प ~~कल~~ स्प दाराव्। नार्यापश्चिमां दिशं विलोकेनेन अनुगृहाण। कृतार्थी कुरु॥ तावदादौ विलो
कनेनेनानुगृहाणेत्युक्तं वर्णनीयारूपस्य आदित्यर्थः॥ यावच्चंद्रोदयादिना प्राच्यां रामणीयकं न भवति तावत्संध्यारागेण कृतवा

रमणीयं कां पश्चिमां दिशं विलोकयेति वाताव च्छ ब्दार्थः। उडाधिपस्य नाशे दुःखिता विलोकिनादिना स्पष्टहरित्तमर्हसि भवती
त्य क्तिः॥ येयं पश्चिमा दिक् लाक्षापयसा लक्तकरसेन उत्थाकिंनापि अञ्चलालीव क्षालितेव॥ तथा कंकेरूस्य पंकैः उत्थाक्षा
पि अश्वरीव स्फुरितेव। एवंविधा रक्ता दृश्यते यत् अस्तस्माद्रमणीयामेता विलोकयेत्यर्थः॥३॥ उच्चैरिति॥ हे प्रिये रविरेव गैरि
काख्यधातुविशेषसंबंधेन गंडशैलः उच्चैस्तरात् अत्युन्नतात् दंवस्य शैलस्य गगनगिरिमौलेः शिखरात् सकाशात् च्युतः प
तितः स्थूलपाषाण एवाधः पतितोथ च सन्निहितः पातेनोच्चतरगिरिशिखरादधः पतनेन हेतुना विचूर्णितस्य विशेष
रात् हन्त चूर्णीकृतस्य तस्यैव गैरिकगंडशैलस्य संबंधिनी संध्यैव रजोराजिः संध्यासंबंधी रागः इत्यर्थः॥ इहसायंका
ले पश्चिमदिशि वा उत्क्षिप्ताः ह्रीतो उपरिष्टात् प्रसरति॥ अस्तसमये सूर्यस्य रक्तत्वात् गगनगिरिशिखरात् च्युतत्वात् च गैरि
कगंडशैलत्वं। उच्चतरात् प्रदेशात् पतितो गंडशैलश्चूर्णी भवति॥ चूर्णीभूतस्य रजोराजिरूर्ध्वं प्रसरति। तद्रजोराजिरेव सं
ध्यारागः प्रायेण ऊर्ध्वं प्रसरतीत्यर्थः॥४॥ अस्तेति॥ हे प्रिये कुक्कुटानां पेटकस्य समूहस्य यामांते प्रहरांते या कूजाध्व
निंत द्दशा उच्छ्वसितैः प्रकाशमानैः किं चिडुच्छी भूते रुकुछ जपाकुसुमतुल्यैः शिखिनां शिरसि रक्तवर्णमय केसराणां
मा च्छैष्टं दैः किमियं वारुणी उत्र कस्माद्रुणीकृता॥ उत्प्रेक्षा किंभूतस्य अस्ताद्रे शृंगशिखर रसैवालय स्थानं यस्य

कु१ ई२

नै०टी०प०२२

सपक्षणः शावरं स्पृहं तस्यालिस्सम्मूहस्तत्र छेकस्यास क्तस्य शावरे स्पृहे हेतुः संस्पृहो। तस्य कुक्कुटानां कूजनेनेो त्रमितरि
रवत्वं जातिः। ते च यामा ते कूजंति सायं समये कुजत्कुक्कुटशिखा वृंदसंबंधादरुणा। नव नसंनवार्थ्ययामं तैत्पाद्युक्तं। पक्व
णः शावरालयं गृहा त्राक्काः पक्षिमृगः छेकास्तइत्यमरः। पेटकं पुस्तकीदानां मंजूषायां करंडकइति विश्वः। पत्रपेति
संध्यायाऽत्र सायं समये चंद्रस्य नायिकाया रात्रेः सर्वाधिप्रतीहारस्य दौवारिकस्य पदे धिकारः।। अस्पदं त्र[पि]।। पत्रप
उ विलोक्य किंभूतयाऽऽतंत्रीघं अस्तंगतस्य सूर्यस्य निर्यती वहिर्गच्छंती करावली किरणपरंपरैव हेतुलं हिंगुलाख्यं रंज न५
करक्तद्रव्यविशेषेण रक्तं वेत्रं दंडविशेषोयस्यास्तया। किंभूते पदे निषिध्यमानं पिवार्यमाणं प्रवेशं आहो दिनं यास्मिन्।।
स्त्रियाहि दौवारिकास्त्रेवयुक्तेति संध्यैव रात्रेर्दौवारिकी जातेत्यर्थः।। सूर्योस्तमितो दिने गते रात्रिरागतेति सायं संध
याऽऽप्तइतिभावः।। ५।। इदानीं संध्यानहूत्र संयोगं वर्णयति।। महानटइति।। अंग हे नैमिभहान्संध्योपासन। वि
हां षयेति प्रश्नस्तस्तथा ऽरति। प्रवर्गच्छतौ एवं भूतः कौलः सप्रकृतिः सायं तनोयद्वा महान्। परमेश्वरो नटोनर्तकोयस्मिन्
संध्याकोतिकिं चित्पीतरक्तवर्णत्वात् कुनटी गोलेत्याद्यभिधान्मनः शिलारूपां ते येशामपि स्वकालस्त्वामिनीत्वा घ्रस्वपि २
टप्रस्तरूपब्रह्मतनुत्वाद्देवतारूपां। अथ च समृद्धिमतीं संध्यायसम्यग्विचिंत्यसांप्रतमिदानीं।। तत्त्वा किं चिड ऊत

धा

त्रा

तया संध्यारागतिरोहितकांतितया वा क्वत्वया किं विद्रुमरूपयजंघाविय ता पि गगनरूपायाल एव्यायाथ व ऽगनं वि
स्तीर्णया च यद्वात्रास्ता मस्तित्व्या तं दियद्यया गगनया पि न्यावता स्त्रेण पानद्धत्र परं परारूपया स्रजा पुष्पादि मालया हा
रं तनोतीति विरस्वयति किं तु यद्वा तारागणं मुद्धमौक्तिकानां श्रेणिर्यत्र ता द्वृपा ग्रथितमौक्तिकया मालया हारं विस्वव
युक्तमिति सं ध्याकालः संध्यामिवं विधां मस्विंत्वनद्धत्र परां रामिव हारं विरस्वयति किमित्यर्थः ॥ संध्यारागः कियान
वशिष्टो स्ति मुक्तातुल्यानि नक्षत्राणि च किं विद्रुमरूपानि गीतानीति लघ ॥ नन्वा तारा श्रेणि स्रजो पालक्ष्मितेन तद्युक्तेन वि
यता गगनेनैव हारं तनोतीति वा ॥ संध्यामेवं विधां विज्ञाय तत्स्वीभूत इति न किं चित्वा विशिष्टयाता श्रेणिस्रजा
हारमपि विस्वयतीत्यर्थ इति वा पिशाद्वार्थः ॥ अथच स प्रसिद्धो महानटस्तांडव नृत्तकर्ता शिवः जानोः सूर्यस्परागिस
त्रिस्तमितादस्तूर्यस्मितीति यावत् नेत्रे संध्यासमये मनः शिलातुल्यं च एवं आधिरस्थास्तत्वा कुसितनर्तकीरूपां वाइ
त्रां देवी संध्यां सम्यक् ध्यात्वा स्नायं संध्यावदनं ... त्वाष्टसुमूर्द्धि मध्ये तारा परैः परैव मालायस्यां तयद्गगनरू
पया पि त्रिस्त्रव्यापि मूर्त्य कृत्वा इदानीं संध्यावंदनांतरं अंगहारं सुखकरुपाश्च दिंगानां समतालमानं विक्षेपं करोति
किं मिति वितर्कः ॥ अस्मत्रिस्पां प्रहारकरणं चित्रमिति विरोधार्थापि शाद्वृ ॥ न केवलं चंद्रसर्पभोगादिनरूपितयैव तत्वा

नै०८१०२२

गहारं कोतीति किंतु वियत्तापितत्वेति समुच्चयार्थो वा ॥ ईश्वरो हि सायंसमये नृत्यति ॥ तत्स्वनुरागे मनःशिलातुल्यवर्णासं
ध्यामपीशां स्वसहचरीं पार्वतीति विस्मितां विशिष्टया क्रियद्रूपयापितत्वाङ्गहारं तनोतीति पार्वती स्तमीपेपीश्वरो नृत्यति। अथ
च महानतिप्रवीणो नटः कुत्सितानटीनत्तेऽनति वृद्धामपि संध्यां वयःसंधौ वर्त्तमानां तरुणीरसभावसंधौ वर्त्तमानी
वारसभावज्ञां अतएव सभायामनुरागोऽज्ञां सन्ध्यानुरागरञ्जितेनेसमर्थां द्विंत्पविघ्रतुल्ययातिविशालयास्तु रूमो
क्तिकरपरंपरान्वयायामालयोपलक्षितया तन्वांगहारं तनोतीति तदसांप्रतं किमपितु रसभावादिजनयं तत्पातया
सन्ध्यानुरागे समुत्पादितेपि नृत्तकर्मकौशलेनापि सन्ध्यानुरागार्थं स्वयमंगहारं तनोतीति युक्तमेवेत्यर्थः। अथस्व
महान्नर्त्तकोवयःसंधौ रसादिसंधौ वा वर्त्तमानां तथा सन्ध्यानुरागे सन्ध्यानुरागे समुत्पादितेपि नृत्तकर्मकौशलेनापि
सन्ध्यानुरागार्थं स्वयमंगहारं तनोतीति युक्तमेवेत्यर्थः ॥ अथस्व महान्नर्त्तकोवयःसंधौ रसादिसंधौ वा वर्त्तमानां त
थासमृद्धिमतीमपि स्त्रियं कुत्सितां नटीं नृत्यानभिज्ञां ज्ञात्वा सन्ध्यानुरागेणि मित्रये विशिष्टयात त्वास्वयमंगहारं तनो
तीति तदसांप्रतं किंतु अपितु तस्या नृत्तकौशलाभावान्नृत्तेन सभानुरंजने सामर्थ्याभावात् सभानुरंजनार्थं स्वयमेव नि
पुणं नृत्यतीति युक्तमेवेत्यर्थः ॥ अथवान्योपि महानतिसमृद्धोऽटति। सर्वत्रगच्छतीति तादृशोऽतिचंचलोऽतिप्रसिद्धो वि

कुनटीमपिनृत्तविद्यायामचतुरामपिनयाकायकांत्याहत्वायोनुरागस्तद्विषयेईशांसौंदर्यातिशयेनैवरागमु
त्पादयंती॥ तथाशैशवतारुण्ययोः संधौवर्त्तमानांप्रादुर्भूतयौवनांरसभावसंधिस्थत्वाद्रसभावज्ञांवासंवित्पकाय
कांत्यानुरागिमतिकुनटीमपितरुणींरसभावज्ञांवातथेशांसपत्नींचविचिंत्यतन्वास्तदीयशरीरस्यातिविस्तृतयाश्वछ
मौक्तिकमालयाहारंविरचयतितत्रानुरक्तस्संस्तस्येमुक्ताहारंविहरतीत्यर्थः॥अथवमन्याअपियोजनास्तुधियोहनी
याः॥मत्तानुरोगेः संधयितिपाठेबहुत्वस्तकेध्वदृष्टत्वादुपेक्ष्यः॥अटः पद्याद्यस्तु॥ संध्यांदिगादित्वाद्यत॥तारका हसनक्ष
त्रकनीनिकाभिधायित्वंदशामसर्गएवोक्तं॥७॥नृपेति॥हेनृपमितारकराट् चंद्रः किरीटोयस्यस॥शंभुःसायंनटतिसायंन
टः नर्त्तकः सन्उद्धताद्यान्नृत्ताद्धेतोस्त्रुटितस्यन्नेषास्त्वंदाम्नोमालायाउच्छलितैः खंडैःत्राकलेरेवउडुकोटिकपटंकाटि
संख्यनक्षत्रव्याजं वहद्भिर्धीरयद्भिः सद्भिरिहसायंसमयंदिङ्मंडलमंडयतिपरिष्कु[?]/एतानिनक्षत्राणिनकिंतुतांडवत्रुटि
तास्थिमालोच्छलच्छकलान्येवदिक्षुशोभंतइत्यर्थः॥अन्योपिचंद्रतुल्यकिरीटोनटोनृत्तंस्त्रुटितहारखंडैः स्त्रीहट्टंमंडय
ति॥मंडयतीवेतिपाठेउत्प्रेक्षा॥८॥कालइति॥हेप्रियेकालः संध्यासमयएवकिरातो॥ध्वस्वत्वश्ववर्णेहिंसकत्वान्मूढ
रूपोवाकालोगिरिमहान्स्वसंचारीशवरः स्फुटानि[?]विकसितानिपद्मानियस्मिन्यद्वाविकसितकमलंकंजलंयस्मिन

नैषटी०२२

घन प्रकटी कृतं मुंडी दंडद्युतिप्रकाशमानं पद्मकरं रक्तबिंदुवृंदं यस्मिंस्तादृशस्य दिपस्य वधं व्यधात् अकरोत्॥ तस्यैव हतस्य कृ
रिणो रुचिरा रम्या सं ध्या अस्त्रधारा रुधिरधारा धारा श्रुनखाग्राणि विदारित तदीय कुंभस्थलमौक्तिकानि। संध्यारागो
रक्तधारा तारा स्थूलमुक्ता इव शोभंत इत्यर्थः॥ स्फुटपद्मकस्येति बहुव्रीहौ कप्॥ ९॥ संध्येति॥ विष्णुना प्रभुणा हरेण
पूर्वं शिवायाः पार्वत्याः विवाहावसरे संध्यायाः सरागो रक्तवर्णो यमेव कुसुंभिः पश्चिमाशाया विभागः॥ प्रदेशः कुसुंभव
र्णकयुक्ता सिंदूरिका रक्तवस्त्रं तत्संबंधिनि तथोक्ते कुसुंभसिंदूरिकारूपपर्वणु अवे पर्यधायि परिहितः। यतो दिग्वलय
मेव वासो यस्य तेन रक्तवस्त्रपरिधानावसरेपि दिग्वसनादेविल्पारक्तदिग्भाग एव परिहित इत्यर्थे मिश्रांके॥ विवाहस्य
चतुर्थदिने प्रथमदिनपरिहितानि वस्त्राणि प्रक्षालनार्थं परित्यज्य कुसुंभसिंदूरिकारम्यकौसुंभानि रक्तवस्त्राणि वधू
वरेण परिधीयंत इति शिष्टाचारः। तत्र शास्यादिववसनत्वाद्रक्तपश्चिमभाग एवानेन परिहित इत्यर्थः वर्णकस्तूतस्कुसुंभस्ता
नेताप्रागः सिंदूरिकास्थाने संध्यासरागपश्चिमदिग्भाग इति भावः॥ १०॥ प्रातः सायं संध्ययोः प्राची प्रतीच्योर्द्वयोरपि तुल्य
वर्णत्वात्सायं संध्यारक्तपश्चिमदिग्भाग एव कुसुंभसिंदूरिका। तं कथं वर्ण्यते इत्याक्षेपे॥ तत्परिहारार्थं प्राक्प्रापित रूप
वमाह॥ सतीति॥ हे सुनेत्रे सती दाक्षायणी उमा पार्वती जनुर्द्वहता परिणयता दिग्वाससा हरेण पूर्वा कुसुंभसिंदूर

५

कार्थी द्विसंध्यौ अनिर्दिश्य अपि प्रातःसायंसंध्ये लक्षीकृत्य द्वे प्राचीप्रतीच्यौ दिशौ विवरागेन रक्तवर्णेन शोणाययोस्ते
रक्तवर्णेन शोणन्ते इति वा तादृक्षे रक्ते ऊर्ने द्वे वसने अलंनिषानां प्राप्ते किं विवाहद्वये संध्याद्वय रक्तदिग्द्वयमेव दिग्वसन
त्वाद्रक्तवस्त्रद्वयं शिवेन लब्धमित्यहं मन्य इत्यर्थः॥ शिवेन द्वे दिशावेव वस्त्रे द्वे संध्ये लक्षीकृत्य रागेण रंजकद्रव्येन त
त्वापि स्तोने कर्मन्कृते ते प्रापिते किं। विवाहे वस्त्ररंजनाय कस्यचित्करे समर्प्यते तस्मात् शिवेन दिग्द्वयरूपे मम द्वे वस्त्रे
नवतीस्पां रक्तशोणिम प्रापणीयं इति संध्याद्वयस्याङ्गुल्लेस दिग्द्वयं रक्तशोणं चकारेत्यर्थः इति वा॥ स्तुनेत्रीति पाठे अ
संयोगोपधादिति निषेधात् ङीप् स्त्रित्वप्राप्तः द्विसंध्यौ समाहारद्विको रेकत्व अवंतो वेति स्त्रीत्वे बहिर्गौरादिति ङीप् संध्या
शब्दस्य तद्धितयद्वांदंतक्या द्विलस्तद्धितस्येति यलोपः॥ अनिरूश्याग इत्यनेनः कर्मप्रवचनीयात्वान्तद्योगे द्वितीयाग
त्यर्थत्वादणौ कर्तुरणौ कर्मत्वं पक्षे॥९१॥ आदायेति॥ योयं तात्तुरेव निट्ठः परिव्राट् दंडं श्रीतीर्थं पारिपार्श्विकमेव वेण
वयष्टिं आदाय सकलासु दिक्षु परिक्राम्यति॥ सोयं तापसः परिव्राट् सायंकाले अब्धौ निमज्जन् पातालं प्रवि
शन्नध्वव ऊजले जलाशये स्नानं कुर्वन् संध्यायामत्र्यंगगनं तदेव कषायरक्तं वस्त्रं अधत्त। वा उपरिस्थस्याधः
गः पश्चाच्च ततस्यापरिदंडस्यां परिवा निजमस्तकोपरिवा निजमस्तके परिवा धृतवानिव। एवं यतिरपि बऊकाल

नैषटी०२२

वस्त्रानस्य निषिद्धत्वादुक्तलक्षणः प्रत्नपरित्यक्तमन्त्रकषायं वस्त्रं धारयति॥ काषायमिव संध्यासोऽन्यतद्व्यर्थः॥ मा
ठरः पिंगलो दंडः॥ भिक्षुः परिव्राड् कर्मंदी स्यमरः॥ काषायं तेन रक्तमित्यमरः॥२२॥ अस्तेति॥ यः सूर्यः अस्मिन्नस्त
त्वां वर्त्तमाने निकषयो यत्नाने सुवर्णपरीक्षापाषाणतुल्ये स्तावले संध्याराग एव कषो ऽक्षरेखः घर्षणे क्षरेखस्तेन प
रीक्षित॥ इयं द्यौस्तहेलिं सूर्यमेव हिरण्यपिंडं विक्रीय विनिमयेन कस्मै चिद्दत्वा तारारूपान्वराटान्कपर्दकान्क्रीता दि
तज्ज्याह॥ उत्तमं सुवर्णं रक्तपीतं भवति॥ तथा च रक्तपीतं सूर्यसुवर्णं गोलकस्य निकषपरीक्षितसुवर्णरेखेव सं
ध्या दृश्यते॥ ताराश्च वराटा इव दृश्यत इत्यर्थः॥ द्यौरिति लोकव्यवहारानभिज्ञत्वद्योतनार्थं स्त्रीलिंगनिर्देशः॥ स्त्री
हि सुवर्णं दत्वा मूर्खैस्तया वराटकान्गृह्णाति धूर्तैर्वंच्यते च॥ वराटकव्यवहारे देशे सुवर्णमपि दत्वा वराटका
एव गृह्यते॥२३॥ पचेलिममिति॥ दाडिमबीजस्तुजाकालेन रक्तं अर्कबिंबमेव पचेलिमं तरोरूपर्यवस्थितं प
क्वं दाडिमफलं उत्तार्य गगनतरोस्त्रोटयित्वा बीजग्रहणार्थं भित्वा बासंध्यारुचिस्त्वगिव अस्य दाडिमस्य प
नाकालेन कृत्वा नांत्ली निपातः॥ रूपामिकालगनेतेन कृत्वा नीलः बकुकालीनत्वान्नीलमलसंबंधान्नीलवर्णःसं
जातोस्तीति एवंप्रकारा मम अनुमाअनुमानमेवमहं संभावयामीत्यर्थः॥ अन्यथा यदि स्वर्णाचिलः कालकृयस्त्वेन
नीलीभूतः किंतु हे महेमम यत्वात्पीत एव स्यान्न हि इंदोर्जगच्छायमये जगत्प्रतिबिंबकृते कलंकरूपे प्रतीके
अवयवे मेरोः पीतोपि नागः इति विदितस्यात्पीतत्रिज्ञां दृश्येत तस्मात्स्वर्णाचलो नील एव जातस्तत्पाच सकला
या अपि भूमेर्नीलवर्णत्वात्प्रतिबिंबरूपः कलंकोपि नील एव युक्त इत्यर्थः॥ जगच्छाये निविर्जाषाप्तेनेति
घंटत्वं॥ एध॥ मेति॥ रात्री अनिद्रैर्विकसितैः सरोजैर्नैः कृतायाह्रजातदूनितां श्रियं मा वा प्रतु मास्मलन
नयनः पद्मनिमीलिकमलसंकोचकं तेयोयस्यसः। विकसितानामपि कमलानां हृजार्थं चंद्रसविधे क्रियमा
णानां चंद्रतेजसा संकोचस्येव संनवाउन्निद्रसरोरुहप्रजाश्रियं कथं प्राप्नोति॥ प्रकारांतरेण प्राप्नोतीत्याह॥
निशांक कृतस्थरंकोमृगस्यात्रिहृदये नैवालंकृतायंचंद्रः तां अनिद्रसरोजव्रजाश्रियमेति प्राप्नोतीति नयन
योरुन्निद्रकमलस्य त्वादित्यर्थः इत्यहं मन्ये॥ अंकमृगनेत्रात्पांकृत्वा। यं चंद्रो विकसितकमलात्पां व्रजामि

क्रमेणस्वर्गनिरोहारूढ्वधोनागस्थितदंष्ट्रायुगमेवयंत्रंनिष्पीडनचक्रंतेनलष्टंनिष्कृष्यगृहीतंपीयूषममृतं
यस्ययस्माद्वासवाल्लेपिएपाकद्वाग्गृहीतरसनीरसतिलादिपिंडीमात्ररूपतांविसेषउद्भूतोनागोयस्यैवंभूतःस
चिपिटःपर्पटप्रयोऽस्त्वदितिसमस्तमिदानींप्रत्यक्षेणानुभूयतएवेत्यर्थः ज्योतिरधिकृत्यकृतोयंग्रंथोज्योतिषं अधि
कृत्यकृतोग्रंथइत्यण्। ततोयथार्थप्रयोगालवः। ज्योतिःशास्त्रेत्रयोदशांगुलश्चंद्रः। षोडशांगुलस्यास्यसूर्यस्य
घोनागस्थोजलस्पर्शकाचक्रपिकाप्रायोयथोदितंस्तथैवसर्वमास्तीत्यर्थः ॥७॥ अस्माविति॥ असौचंद्रोविनतोरनं
गस्यसखीनोभवतिकुतोऽस्माद्धात्रास्तादशपत्॥ विवाहमैत्रवैराणिसंवंतिसमशीलयोरितिशास्त्रादनयोःसांगानंगयो
स्सादृश्याभावान्मैत्रीनसंगच्छतइत्यर्थः॥ तद्युत्तयेलोकोक्तप्रसिद्धविरोधाभावः। इत्यर्थः। तत्रहेतुमाह॥ यतयस्मात्द्वाव
पिकामकर्पूरौदग्धौसंतौसर्वरूपादर्श्यादशायाः सकाशाद्वृद्धिकांवीर्यवत्तांहिस्पष्टंदधाते। पक्वोहिकर्पूरोवीर्यवद्वृ
रोगवतिकामोपिदाहानंतरमधिकंवीर्यवानभूत्। तदुक्तंकर्पूरइवदग्धोपिशक्तिमान्योजनेजने। नमोस्त्ववार्यवीर्या
यतस्मैकुसुमधन्वनइतितस्मात्कामकर्पूरयोर्मैत्रीयुक्ता। धनसारश्चंद्रसंज्ञइतिनिघंटः। कर्पूरमस्त्रियामित्यमर
स्वनात्कर्पूरशब्दोनपुंसकोपि॥७॥ स्थानइति॥ विधोर्मदनस्यसख्येस्थानेवायुक्तमेवेत्यर्थः॥ तत्रहेतुंसकामजन्व

नैषटी०२२

लमतिदीप्यमानेशंभुनेत्रे प्रलीनः प्रवर्षेन लीन एकतां प्रलयं गतो विनष्ट इत्यर्थः अयं चंद्र दर्शनात् जिदर्शनं दत्वाप्त
तद्व्यापारयुक्तः ऽथवा मावास्यां गते भास्वन्मये सूर्यरूपे आदित्युक्तो पिंडोब्धकुहु पिलमेकतां गच्छति ॥ अत एव दर्श
स्य सूर्येंदुसंगम इति नाम ॥ रवि र्विष्णोर्दक्षिणं चक्षुः ॥ तथा च तुल्ययोर्हरिहरयोर्नेत्रयोर्द्वयोरपि चंद्रकामयोः प्रली
नत्वन दर्शे चंद्रस्याप्यनं गतया च समत्वा लब्धा इत्युचितैव मैत्री त्यर्थः ॥ तथा च कामस्य चंद्रोसविता प्रसिद्धि मुख्यैव
युक्तेति भावः ॥ एण ॥ नेत्रेति ॥ पुरा सर्वदा यस्मिन्काले एष मृगांकः पुराणस्य पुंसः श्रीविष्णोर्नेत्रारविंदत्वं नयनक
मलत्वमगात् ॥ तदानीं तस्मिन्काले अस्य विष्णुनेत्रारविंदत्वं तस्यास्य चंद्रस्यापायमंकः कलंक एव कनीनिकाया इंदि
दिरस्यश्च भरस्य सुंदरत्वं अगात् ॥ प्रापयत् ॥ अदादिति पाठे अयं श्रीविष्णुरस्य चंद्रस्यांके विषये कनीनिके दीव
सुंदरत्वमदात् ॥ नेत्रे हि कनीनिकयाभ्यमरविंदे च भ्रमरेण ॥ तथा चास्य नेत्रारविंदरूपत्वादंकमेवाऽनयं श्री
विष्णुः कृतवानित्यर्थः ॥ अंक एव कनीनिका कज्जली भ्रमरेण सुंदरत्वं संस्पादादिति वा ॥ इंदिंदिरालिषट्चरणा व
री कालिनो द्विरेफाः स्युरिति हलायुधः ॥ एए ॥ देवेनेति ॥ तेन देवेन श्रीविष्णुना एष च चंद्रः कामरूपपि गरुडश्चैतौ
द्वावपि साम्यं समानधर्मतां सम्मीदत्तुल्यायां नयनक्रियायां क्रमेण नेत्रव्यापारे वयन्नियुक्तो तद्युक्तं उचितमि

त्रे

२५

मिवद्योतमानं प्राप्नोतीति भावः ॥ एत्यवेति वा ॥ ५५ ॥ यइति ॥ य एष प्रत्यक्षदृश्यः शशांकः ताराके जागर्त्ति स्फुरत
त्रविषये क इव बुधश्चित्रमाश्चर्यं विधत्ते पितृनकोऽपि किल यस्मादेतत्पितुरंबुराशेरंतर्मध्ये उच्चैःश्रवस्संज्ञ
कस्तुरंगोऽप्यासीदैरावताख्यो मतंगजोऽप्यासीत् यदीयपितुर्मध्ये अश्वगजादिकं नवतितत्तदीयपुत्रमध्येऽश्वा
ग्रामात्रसे नवे किमाश्चर्यमित्यर्थः ॥ ५६ ॥ गोरइति ॥ तमिस्रा तमो बहुलास्य दयिता रात्रिः गौरे प्रिये चंद्रे वि
षयेन्नातिसमं ॥ तथा ज्योत्स्नीव चंद्रिकायुक्ता धवलाऽस्य दयिता रात्रिर्नीले प्राणेशेऽस्मिन्त्वं हे नितरां शो
भतेनिन्नवर्णौ हि शोभेते इत्यर्थः ॥ तस्माद्धेतोस्तयोस्तमिस्राज्योत्स्नयोरुभयोरपि विषयस्वरूपयोन्नाप्राप्तेर्वि
लोलादभिलाषात्तयोरेवावाप्यन्योन्यशोभाप्राप्तिस्तदभिलाषादुज्ज्वलरूपामलां बद्धत्रिकायं विलसन्ति वा
इवार्थः ॥ शोभाभिलोलादि चेत्यन्वयः नीलस्य गत्वा ज्योत्स्नी प्रियां धारयितुं धवलेन च तामस्त्री मिति यथासंख्यं
॥ ५७ ॥ वर्षेति ॥ अहह बालेषु तनुषु अविकसितेषु वहु प्रत्यक्षदृश्येषु तारासु नेत्रे ध्रुवकचकेषु छत्राके
पुनर्भेव चिरकालोत्पन्नत्वादधिकस्वरीन्हृत विवसितमतिस्थूलमेके छत्राकमेव चंद्रं अत्रैवाभिमन्ये ॥ किंतु
लेषु ताराकचकेषु विराय बहुकालं वर्षस्थितो तयेशो भ्रमतो चिवर्षेषु जलदृष्टिद्विष्टिषु आतपेषु सुस्व

नैषटी २२

सत्सु अनावरणमभ्राच्छादितं ॥ काष्ठौघं दिक्समूहमेव दारुसमूहं । आलंब्य समुत्थितेषु तत्पक्षेषु । वर्षाकाले घना इते
षु जलस्तिमिते इपष्याडस्य तस्य काष्ठेषु सूक्ष्मस्थूलानि छत्रकानि नयंतीति तथा च ताराः अल्पकच्छत्रकानि वृंदं सु
स्थूलकवकमिव तु तेऽत्र ॥ ८० ॥ दिनेति विश्वस्य जगतो निमज्जनात्प्रतीचीसागरनीरप्रवेशाद्धेतोर्नक्तं रात्रौ त
मोनिमित्तास्खलनादिरूपां विपदमेव द्वीपवतीं महानदीमस्योडुपस्य चंद्रस्य प्रकाशरूपात्तप्रसादात्तरंति ।
चंद्रेण तमो निरस्य सर्वं प्रकाशितमिति भावः । अन्यापि रात्रौ तरणे नौकाया अकस्मान्मज्जना द्धेतोर्डुडुपरूपामाप
न्नदीं उडुस्था कस्मादागतस्यायानपात्रस्य प्रसादात्तरंति ॥ ८१ ॥ किमिति ॥ नोप्य द्विगण अमहतां यो मराणमस्मा
मपि नेत्रविषये तेजोमयस्तेजो यो विंदुरेवायमिंदुर्वर्तुल्यानयानप्रांतविपीडाकरणेध्रवा लवर्तुलाकारेण ना
नद्यो न समानः किं नास्मि अपि त्वस्मदादिनेत्रपार्श्वे वर्त्तत एव ॥ परमणुको ऽस्मायां ड्वर्त्तत एव स्तथा क्षणिकः त
त्रमात्रावस्थायी ॥ यावच्चिपिटीकरणमेव दृष्टं उत्पत इत्यर्थः । न ह्यस्माच्चंद्रात्तस्यैव लक्षणं कांधमित्यत्राह । अत्रर्दु
नेर्नेत्रे तु उनस्तेजोमयविंदुरयमिंदुर्महीयान्नितरापेक्षया नितरां मेक्ष्या नितरां महाः परिमाणमासीत् तात
यामास्येन तत्वानाशी मासावसाने प्राप्तविनाशी मासावसाने प्राप्तविनाशस्त्वाहितिप व्रधघटत एतद्घु

२१

श्रि

ज्यत इत्यर्थः॥ यतः कीदृशस्यात्रेर्महतो महानुभावस्य॥ सर्वं हि महतां महदिति न्यायेन महतोऽत्रेर्नेत्रे तेजोमयबिं
दुरप्ययमिंदुर्महापरिमाणस्थिरकालस्थायी चेत्तस्मान्नेत्रवर्त्मनि तेजोमयबिंदोरिंद्रोर्वैलक्षण्यं मुक्तमेवेति भावः॥ अत्र एकः
अल्प इति कन्॥ नाशीत्यस्यार्थ इति॥ २०० ॥ त्रातुमिति॥ मृतसंजीविन्यादय ओषधयः स्वशक्त्या स्वसामर्थ्येन निजर
सवीर्यविपाकाभ्यां हत्वा ओषध्यः शत्पति मेनं चंद्रं क्षयिणं प्रतिदिनं कलाक्षयवंतं मध्यक्षयरोगिणं सं तं त्रातुं न शेकुः
तथा विप्राः द्विजराजत्वान्निजस्वामिनं क्षयिणं मंत्रेण शक्तिसामर्थ्येन दत्वा रक्षितुं न शेकुः॥ तथापयोधिरपि पुत्रं क्षयिणं
मेवं मणिभिरनेकप्रभावैरं तस्स्तैः दत्वा तु रक्षितुं न शशाकेति वचनपरिणामः॥ तथा सुधापि स्वाधारभूतं क्षयिनमेनं
अजरामरत्वजनकैः स्वत्वात्रातुं न शशाक॥ चासमुच्चये ओषध्यादयः स्वशक्त्यादिरक्षणसाधनैस्तं न्यपि शेकत्वात्तु त्र
त्वाच्चिसुशिष्यत्वाच्च क्षयाद्रक्षितुमहिमप्येनं रक्षितुं समर्था न बभूवुरिति विशेषोक्त्या सर्वकर्मज्ञो रोगो महानुभावे
रप्या यैनेतु न शक्यत इति व्यज्यते॥ अचिंत्यो हि मणिमंत्रौषधीनां प्रभाव इत्योषध्यादानां सामर्थ्यं प्रसिद्धं॥ २०१ ॥ क्षये
ति॥ निशानाथस्य महतस्तेजः सुधाधारा स्मररूपमेवेति लोकवादो मृषा सत्य एव वा भवेत्॥ वा अथवा यदि चंद्रतेजः
सुधैवेति लौकिकप्रवादः सत्य एव तर्हि नो चंद्रतेजोरूपा सुधा जराविनिशो जराविनाशो जरामरणे न हरेद्विनाश

येत्॥ द्वित्संगी कार्यः। स्वं इन्द्रतेजः सुधानैवेति वर्गी कार्यः॥ अथ चैतद्रूपा सुधापि जरामरणेनात्यायनीत्यंगी कार्यमित्यर्थः
अपरथन्यथा यदि चंद्रतेजः सुधेति प्रवादः सत्यस्तद्रूपा सुधा जरामरणे विणायैरो त्रिहिं चकोरारव्याः पक्षिणम् विधा
मरात्वीन्या त्वायिकथं किमिति न अजरामराः स्युर्जरामरणरहिता नवेयुः। चंद्रतेजः सुधा तैरेतस्या अस्सुधाया
जरणाविनाशे सामर्थ्यसद्भावे तत्पानेन चकोरैरप्यजरामरैः स्थातव्यं न च तेनै तथा न स्मात्तेजसः सुधात्वं वा दृष्टा स्या वे
ता सुधा न्हृतस्या पिवा जरामरणापहारे सामर्थ्यं नास्तीत्यन्यतरदंगी कार्यं॥ तथा स्तुधा प्रत्तावेर्न निज्ञा अर्थ्यैवे
ति पूर्वश्लोकोक्तस्य समाधानमित्यभिप्रायः। अजरामरास्युः रितिपाठे विं॥२॥ वाणीत्रिरिति॥ तावेमम त्राणिः पूर्वस्त्रि
निःपरिपाकेन निर्दिष्टानि परिणतकवित्वशक्तितया प्रसादादिगुणयुक्तोनि वाणीनि कृत्वानंतरं दूत्रानं दजडं
हर्षपरियशं च चकार॥ तथा सु उर्न्ने अद्भुता परनाम्ना अर्थ्ये एतस्तैनाथ चतद्रूपेण जलेन हैमीतुषारतुषारसं
बंधिनी दृष्टिरिव नैमीस्तिमितमतिस्तेहावभ्राघस्तेनवाष्पवाई चकार॥ हसदृष्टि र्यथान्पं जडमाई चराकारो
ति॥ तथेयमपि ज्ञानं दजदंडसाति स्नेहं च चकारेत्यर्थः॥ परिपक्रिमाणि ईत्वा त्रिदृष्टे यो क्रिं क्रेर्मुमा॥३॥ इतिइति॥
इत्येवं जलान्वदसनल। अंत्र ज्ञानासेवावादूका नितरां संवादिनी धीर्यस्य नादृग्गं कमलतुल्पराग नमस्या मुखं

डुबिंबमंबुवत्॥ चंद्रकमलतुल्यं नैम मुखं बिंबु धृतमिति ध्वन्यते। मुखेस्पंडु बिंबत्वेन चपीयूषधारासंबंधो
पितीत्स्यते॥ तथा च यापीयूषधारया मधुरेत्यपि व्याख्येयं॥ संवाद दूकेत्यादिना चंद्रमा पद्मिनी त्वं प्रसिद्धं चंद्र
बिंबसकमले सहविसंवादो विरोधिबादेतन्मुखं च इंदुबिंबस्यतु कमलेसह सहसंवादः कमलस्सोनागपुना
त्कादिति प्रसिद्धिचंद्रबिंबादेतन्मुखचंद्रबिंबमधिकमितिस्यते। अस्यार्थस्तं वदति संवाद दूकासंस्त्वो यंमे
त्रावर्त्तते॥ ५॥ प्रियेनेति॥ प्रियेणैवं इंते मुखादित्यादिरूपं प्रियवचनं उक्ता भाषिता। विरलनिःस्त्रीपतेर्वरेण
कुलेनमुक्ता जनिता तथा स्फुरंती दीप्यमानकांतिः सोल्लासान्नेम अयनलवस्त्वनंतरं स्मितांशुजालं वितत
नते देवनलायप्रीतिदानमिवददावित्यर्थः केवदिवसकाद्यात स्थाएधुएपतयास्वेछया वाहृतावातारान्न
लेक्रिमागतारोहिणीतारेवंस्फुरंती किरणजालवितता स्वेतित्वेन्दोपमावा। चंद्रः कुलव्येववद्गोवेण
स्तत्रजातादि वधायेषुिकामो किं करूपः॥ लतावतारेत्यत्र तरणंतरः कदो रएतदंता स्वज्ञादत्वात्सार्थे एप
श्चादव्राह्नेनसहसुपेति समासः॥ पाश्चेति॥ साधरातुरास्ताहं त्रसी इंद्रइत्याहस्म इति किं हे प्रियइंदुरूपं त्वन्मु
खइति हेतोश्चंद्ररूपात्मस्तौमां नियुज्याज्ञाप्यप्रशाशिनः प्रशस्तो वर्णने विषये उदास्ते नितरामुदास्तानं भव

ति॥ एवनत्स्वेनेयुक्तं॥ हेतुमेवाह॥ इति किंसततोमेतदकर्तव्यं परनिंदात्मनः स्तुतिरित्यादि वचनात्स्वयमात्मनैवस्व
स्ववर्णनास्तुतिर्नार्हतीति॥ नयुक्तेति॥ इयंतं पर्यंतं मयात्वं द्रोवर्णितं इदानीं सयावर्णनीयस्तूष्णींभावो वायुक्त इत्या
शयेन नैम्यात्वं नस्तुतोतं सोत्प्रासं प्रावर्तयदिति भावः॥ तुरासाहमित्यत्र तृतीयसर्गे धरातुरासाहीत्यत्र छांद
सत्वाशंकाज्ञानस्था तत्रोनतरो इदंरूपं त्वत्सुखैवं नरूपात्म स्तुतो यां मां नियुज्य शासिनः प्रशस्तोऽस्तु तुरासाहि
धरावदन्तुराऽस्तुतालाऽवेगावाष्ट ध्वीवं इत्यनीरेत्य र्थः॥ अर्थान्तरमालस्येति ज्ञातव्यं॥ ६॥ तमेति॥ सत्त्वलोकेसारः
श्रेष्ठ नमो नलः स्मितवान् तुषारत्वात्तुं चन्द्रं निर्णिष्यत्॥ वर्णयिष्यन। सत्वस्तुतगां सोत्ताप्यवंती नैषधं वनाण॥ किंभू
तः नयास्तुसुख्या नैम्यापपरिहास स्मोत्किरां मुद्रावयित्री गिरमारित्तउक्तः॥ तथाप्राणसमेति प्रेयान्तत्तया वंद्र
वर्णने प्रेणितः सत्परा हास्तरस्तो त्किरां गिरं स्तुतगं यथावन्नोणेतिवा॥ उत्किराः मिगुप धेतिकः सर्वेणाषष्टी सम
सः॥ न णिष्यन्न हेतौ लृटः शता॥ ७॥ तवेति॥ हे प्रियेऽस्त्रयं मृगः नधानने जातिचूर्णिनूतसर्वां गीतं स्वरमाधुर्यं निपी
यसादरमाकर्णिदानीं मपितस्यानवरूतेराकर्णनायलोलुपो ऽतितरां लुब्धोतिमाद्दश्यात्वद्वदनत्वमेनविधं
हातुज्ञातु कदाचिदपि नस्पृहयतीत्यहमवैमि॥ मृगा हि गानप्रियात्मवंतिर्चि तत्वन्मुखवत्त्रां स्वास्मृत्वेने छलीत्व

हंत्रांकइत्यर्थः॥जातचर्वीकृतस्वैचरह॥लोलुपःपङ्क्तात्यत्त्वाद्यविपाडो विवेतितिय इल्लुकः॥५॥इंदोरिति॥
अतिसाहसपादिंदुरेवेदमितीदोत्र्रमेनमृगस्यागमनामयोगेप्राप्नुमर्हतिवस्येवर्त्तमानाजिह्माकर्त्रीणीत्यावर्ण्यस्व
रमाधुर्यात्मित्वो विरूपंवास्तुवसतिस्फुटंहंतद्विघ्यतेयस्यनंविधुनास्तुमंतेत्वंद्रुमध्यस्थायिनमपिमृगंकर्षतुगीतेर्मधुर
तमत्वान्मृगस्य च प्रियगानत्वात्स्वसमीपमानयतित्यर्थः॥तदाकर्षणसाधनमुत्प्रेक्षते॥नंस्यता॥गमिष्यतोमृगस्यो
त्रैवविवासार्थंबंधनंकर्षितश्रवणद्वयेनपाशीवन्त्वेकिं॥तद्रूपयावंधनरज्वासमाकर्षतित्यर्थः॥अन्यापिशावरी
गीतमृगमाकृष्यपाशेनबध्नाति॥नवस्तुखंनिष्फलंकमपृताधिकंगी॥नियुक्तंचा॥वेंद्रस्तुसकलंकइतिनावः॥त्वंच
एनिशवसेरपिमध्यमथ्यैनैमीमुखवर्णनानुरागातिशयस्तवनार्थंत्र्ययंश्लोकक्षेपकइतिकेचित॥५॥गगनस्थोपि
मृगोनैमीमुखगीतिंकथमश्टणोदित्याशंक्याह॥आप्यायनादिति॥शद्वरूपःपांथेनित्यपथिकः॥निशायांयावद्व्र
जतितावदध्वपश्रांतःकल्पेनवाक्लिनगच्छति॥यस्माद्दिनेघर्मेणातपेनदुःखःसंतप्तः॥तस्माद्दिनेअल्पमेवगच्छतीत्य
र्थः॥रात्रेर्दूरगमनेहेतुमाह॥सुधांशोरमृतरूपाभीरुचिभिराप्यायनाद्युक्त्वावितवलत्वाद्ध्वानमेवकाननंतस्माज्ज्यो
न्मयस्यगाढांधरजातछैत्याह॥तेजसोऽभावेनमसःसंभवादौष्ण्याभावाच्छैत्यं॥अतएवरात्रौबहुगच्छतिदिनेवोल्पेन

श्रांत इव वक्रं न गच्छती ॥ रात्रौ हि स्वभावादति दूरेपि श्रूयते दिवा तु न तथा । पथि कोपि रात्रौ पोत्पाद दूरं गच्छ
ति दिने चाल्पं ॥ दूरश्रवणधातिपादकोयं श्लोकः ॥ २० ॥ दूरेपीति ॥ हे प्रिये खलु निश्चितं कृपाण्या पतिश्चंद्रो नास
श्चंद्रिकाएकस्यान्यस्तानि क्षिपति ॥ अधोमुखं वेति ॥ किंभूतः दूरेपि अतितरां देशाव्यवधानेपि तत्प्राप्तिश्च म
धुरतरं तावकं गानं तस्य पानं तस्मात् श्रवणाद्धेतोः स्वादुरस्तो पनोगो माधुर्या निशावान्तु न चैव विषयेन धाव
धिः प्राप्तमयदि उत्प्रेक्षते ऽवईयेव वक्रं तु न भूतं नव कीतमाधुर्यापेक्षया ऽल्पमाधुर्यं तया ऽवमाननयेवेत्यर्थः
अयं श्लोको भिन्न एव न तु युग्मं ॥ २१ ॥ अस्मिन्निति ॥ हे तन्वि एष चंद्रः आदिशंस श्री विज्ञो वीमवं कुर्वन्निवेति
यत् ॥ अस्मिन्नेत्रानवने विषये ऽयं नेत्रभूतश्चंद्रो ऽस्मान्न विस्मापयते ॥ आश्चर्येण प्रापयति ॥ अत्रार्थे ऽस्माकमा
श्चर्यं न भवतीत्यर्थः ॥ किल यस्माद्धेतो रत्रिनेत्रादुदितस्योत्पन्नस्यास्य तत्र चक्षुर्भवनं ॥ कलाभि रूपं रूपं कलो
चितं स्वरूपं नेत्ररूपात्कारणाज्जातस्य नेत्रानवनं सूचितमेव ॥ तस्मादस्य पुराणपुरुषनेत्रानवनेन किंचि
दस्माकं चित्रमित्यर्थः ॥ विस्मापयते नित्यं स्मय यते ॥ तं रित्यात्वं ॥ नास्मोर्ह तुनय इति तङ् ॥ अस्मान्कुनांतरोपे
क्षया वकुत्वं ॥ २२ ॥ आननिरिति ॥ हे मृगेंद्रोदरवक्रत्रसुदरं यस्यास्तादृशि रजन्या रजकीत्तया ॥ दोरस्य दुग्धस्य

धा॥ रात्रिरिव दृश्यमाना निर्धवलतरा निः॥ अत्रि कौमुदी निः॥ कृत्स्नां वस्त्रां तमोमयीं यै नीलीवज्जलवत्काली
रुचिः दलमात्रेण क्षालिनि रस्ता॥ रजक्या वसनस्था कालीकांतिदुग्धधाराभिः दूनेन क्षाल्यते॥ तदुक्तं कला
कोशे॥ तैलं दृष्टे तनतक्रो क्षजले दुग्धेन कज्जलं नाशयेद्वस्त्रं तु मलं क्षारेणसोष्मणेति॥ चांद्रिकाभिर्गगनं नि
र्मलीकृतमिति भावः॥ मृगेंद्रोदरी नासिकोदरे तिङ॥ पूर्वं यथा प्राणिवाचिनां लावान्नाली वत्रीला तिङ॥ सम
र्थनीयाः रजकीधुनः पित्वाउं पू॥ २४॥ पयइति॥ हे वामोरु व्यासरित्रकृतुः पयो सुधावर्षकाले निम्नुत्वं केरि
शयितमपि मेचकिमानं उच्चाटयामास॥ तया कालिमापनयने दृष्टसामर्थ्यया शारदाप्पस्य चंद्रस्य लांछनरू
पः कालिमा किंचिदल्पमपि प्रोक्षितुं न पारि॥ शारदस्य चंद्रमलिनः कलंको तितरां शोभत इति भावः मेचकि
मानं वर्णवाचित्वादिमनिच्॥ २५॥ एके तिं॥ अस्तं यतो गच्छतोस्य चंद्रस्य एकादश कला एकादशानां रुद्राणां मौ
लीन् प्रति यातिकिल गच्छंति॥ शेषास्तु पंच कास्तु पुनः पंचेषोः कामस्य तूणीमल्लभिवृद्धिं प्रविस्यर्द्धः चंद्राकार
त्वादर्द्धचंद्राख्या इषवो भवति॥ विनाश समयेप्यपरोपकारनिरत इति ध्वन्यते॥ तूणीमल्लविवक्ष्यास्त्री लिंगो रादि
त्वान्ङ॥ पू॥ अर्द्धश्चंद्रश्चाशिश्चे रूढः॥ २६॥ निरंतरेति॥ हे तन्वि तारागणसहस्राणि निरंतरत्वेनान्योन्यसंबंधतया वि

विधायैकान्तन्यपदिश्यन्य सुधांस्तु क्रियेत निर्मियितत दा तर्हि सत्यं द्वस्तारागणमकलंकत्वात्तन्मयत्वात्क
लंकेन मुक्तः। संस्त्वदास्यस्य श्रियं शोभां नाम आश्रयेति। क्रियातिपत्तेरविवक्षितत्वात्लङभाव॥२६॥ यदितिहे
मृगाक्षि यत्त्वदंतवाननीयां सुखसंबंधिनीं लक्ष्मीमादित्सुर्गृहीतुकामं कुरंगलक्ष्मा चंद्रस्तत्सुखशो
भां गृहीतुकाम॥ तयोः शशांकपंकेरुहयोरेष विरोधः त्वन्मुखशोभालहरणे एकोर्थस्तस्य लिप्सालक्षण
प्राप्तिवांछानिमित्त एव तस्य हेशंके। एकद्रव्याभिलाषित्वेन विरोधः सुप्रसिद्धः चंद्रपद्मयोरपि विरोधः प्र
सिद्ध एव चंद्रपद्मयाच्यांशाकासां त्वन्मुखमधिकमिति भावः। आदित्सुर्दत्तेः सन्निक्वि विपरिनाम॥ लक्ष्मी
नत्वोकेतिषष्टीनिषेधः॥२७॥ लब्धमिति॥ हे प्रियेत्वहं सर्वैरपि देवैर्विधस्तीकृतायां निःशेषपीतत्वात्तुच्छशेष
कृतायां निःशेषपीत्वात्तुच्छशेषीकृतायां त्वस्य विधोः सुधायां धृणां जुगुप्सां दधे धारयामि। किंभूत्वा लेखा
नां देवानां प्रस्तुनेंद्रेनापि पातुनलब्धं कृतप्रयत्नस्याग्निस्य चरणेनेनतुःप्रापकेनाप्युच्छिष्टं तेमुखे दोर
धाररूपममृतं निपीय पीत्वा। चंद्रसुधायाः सकारणत्वदधरामृतस्वादुतर मिति भावः। अन्योप्युच्छिष्टं भोजने
जुगुप्सां धारयति॥२८॥ एतमिति॥ सगिरींद्रपुत्रीपतिः शंभुरेतमोषधिशं विधुं सुतमांगे शिरसि विभ्रद्धा

रयस्तस्यअपिद्विजन्मसमूहोत्पन्नं घोरं दारुणमपि विषं अश्नाति मुक्तकरांकभुजंगं सर्पराजं वासुकिं च धत्ते ॥
ग्रीवोरस्युपाकारत्वेन स्वस्य श्रेष्ठोयमिति भावः । ओषधिस्वामिनोस्य शिरसि धारणादिव निःशंकं विषं न्हयति
सर्पांश्च धारयतीति भेदः ॥ भुजंगं नात्यनिप्राये ऐकंवचनं वा ॥ ९ ॥ नीति ॥ हे प्रिये द्विजे न्स्यापास्य च वं न्स्यापाथ्च द्वि
जेन्स्य गुरोर्बृहस्पतेर्दारान् स्त्रियं यान्ति वतो गच्छन्तो पि गुरुतल्पगामिनो पि पापाः स्वर्गं द्रुतो । घ्न्चपातित्पनव
रवपरपवित्रमेतद्विलोकयेत्यर्थः ॥ अथवा युक्तमेतत् । प्रवृत्तये धर्माधर्महेतुकर्माणि तत्र अपि आत्ममय यत्र
मे स्वरूपमेव प्रकाशो येषां तान् प्रकाशांतरापेक्षान् प्रकाशस्वरूपान् यथा च परमात्मैव प्रकाशो येषां तान् परमा
त्मस्वरूपान् इति स्ति प्रकाशान् निज्ञानस्य प्रकाशात्मिकाद्विनो ब्रह्मज्ञानिनोंतिमदेहं तेजोरूपशरीरं स्पर्शंतीवा प्राप्य
न पयानंतरत्वाविमोक्षत्वात् प्राचीनशरीरप्रवाहापि पंचयात्रेषु शरीरं प्राप्य द्वी वस्तुकालपुरुषान्हियस्मान्न न द्वि
तिस्थिता शुभफलबंधेन न संवंतीत्यर्थः । तेषां न ज्ञो विशेषेण प्रत्यवायो न विद्यत इति प्रामाणिकवचनात् तेजो द्वि
पस्यास्य च न्स्य पातो नाच्छ दिति युक्तमेव न च पवित्रमिति भावः । वं ज्योप्यात्ममयप्रकाश । अंतिमदेहं संस्पर्शंती
प्राप्य ॥ १० ॥ स्वधेति ॥ तनये इन्दुके श्रद्धया परलोकादिस्थित्व बुध्या वितीर्णत्वात्पवित्रं तृप्तिलोहित्वं मिश्रं

नै०टी०२२

पितृभ्यः स्वधाहुतं यदन्नं । पितृस्थानं तथा चंद्रो वै पितृलोक इति पितृलोकतया सर्वं द्रष्टुमुपतस्थे चंद्रेण संगत
मन्नं तत्तस्मात्तिलमिश्रं जलमेवांकस्य कलंकस्य यच्चन्द्रो विंकांतिः तया सवर्णितामिश्रितं सुधापीयूषं । तस्मा
त्तिल एव कलंकस्तत्सलिलं जलमेव पीयूषं न त्वन्यः कलंको न वान्यत्पीयूषमित्यर्थः । स्व इति पितृलोकप्राप्तो हे
तुर्गर्भो । उपतस्थे संगतकरणं तङ् ॥२०॥ पत्रपाति । हे प्रिये त्वं उच्चैः सौधो स्थितापान्थत्वा सौख्येन निरंतरा यैलद्वे
द्वयेपत्वकेलिकुल्यायाः अंबुमिते तद्वृद्धो विविंपत्रपातत्किराजहंसीद्द कृकुल्याजले निमज्ज्य चिरं सतेतोत
वर्तमानस्य प्रियस्य राजहंसस्य चमेन यच्चंद्रबिंबं चुंबति । सौख्यस्यार्थे सुखिनोत्रा वइति तन्नाव वाष्पं ॥
सौख्ये तिपगिस्सत्वं त्वेन लब्धो उच्चतरदेशस्थितं प्रतिबिंबो देशस्थितं वस्तु सत्वं प्रतीत्या ति ॥२१॥ सौवर्ग
ति ॥ स्वर्गेति वा । सौवर्गा देवास्तेषां वर्गैर्वृंदैः स्मृतं निपीयाकृतितुच्छीकृतः तितो यं शशलांछनो मनिश्रितेन तव
त्वा । क्रीडानद्यां प्रतिमाछलेन प्रतिबिंबव्याजेन मग्नः सन्पुनरमृतानां जले रथश्च पीयूषैः पूर्णः स्यादिवेत्य । इ
त्यहं संभावयामित्यर्थः । एतेन नदीजलस्यामृतत्वं सूचितं । अवकृतुच्छः कृतोऽपुनः क्रमेनामृतैः पूर्णस्तन्नात्रो
तव क्रीडानद्यां प्रतिमाव्याजेन मग्नस्य तुकः पानभयादिव पलाय्य निलीनः स्यादित्यहं शंक इति वा । पूर्णेभि

तानां स्पर्धित्वात्करणे षष्ठी ॥२३॥ समममिति ॥ इह तव क्रीडानद्यां कैरविण्याः कुमुदिन्याः प्रसूनरूपप्राणेश्वरि श्रियानः
केरणरश्मिपाणिः अथ च पाणिर्वा पाणिना सम्मं सह समे ने संगते सति मधुपुष्परस एव छलेय स्वसत्त ह्या जलस्याग जलस्य
कन्यादानसंबंधिसंकल्पोदकस्याभिषेकः कर्त्रा ऽनयोः श्रीकुमुदानि विकसितानि मकरंदश्रेणिं निर्व्यो विवाहलीलां त्र
आहेक्त स्वयती त्वाचंद्रकरस्पर्शमात्रेण कुमुदानि विकसितानि मकरंदस्रेणिं निर्वजातानीति भावः ॥ विवाहे उभयोः
पाणिमेलनं पाणौ दानजलाभिषेको पि भवति ॥२४॥ विकासीति ॥ हे प्रिये इह तव केलिनद्यो वनस्थात लनिवासिन्
अथ च काननस्थात था विकासीनीलं आयतं विस्तृतं तु ग्म मे च नेत्रं यस्यास्तत्तुल्या नेत्रा चेयं प्रत्यक्षदृश्यमाना इंदीवरिणी
यस्मान्मृगी वनस्थत्वाद्विकासिनेत्रायतत्रयपनेत्रत्वाच्च पतो हरिणी तत्तस्मादिंदीवरिणी मृगी आननमिवयं
श्चंद्रः सामर्थ्याच्चिदाननतुल्योयश्चंद्रस्तङ्गजेतं तस्कं कांतं सुंदरमथ च तुल्यजातीयं स्वप्रियं मृगं उपरिष्टाद्दलोकते
विकसितकुसुम उ नेत्राणि ऊर्ध्वं प्रसारितानि दृश्यंते तर्हि प्रायेण चंद्रस्थमुपरि वर्त्तमानं निजभर्त्तारं मृगं पश्यतीत्यर्थः
तदाननमेवयश्चंद्रस्तत्रस्थं चंद्रत्वादनुमेयं मृगमुपरिष्टात्पश्यति ॥ त्वं प्रासादोपरि वर्त्तसे इयं चाधोदेशे वर्त्तते ॥ नेनेति
पदेऽक्षेदं तत्वा चंद्रराजं निजं प्राणेशं मृगं मुपरिष्टात्पश्यतीति न किं तु पश्यत्येवेतिवा ॥ व्याख्येयं ॥ वनस्थाम्मृगी ॥ हि प्रस्ता

नैषट०२२

शितनीलायमत्नेत्रा सती स्वकांतं मृगं इतस्ततो विलोकयति शशज्ञमित्यपि पाठः ॥ मृगपर एव व्याख्येयं ॥ २५ ॥ तपस्यावामिति
॥ हे प्रिये अंबुनि सदा निवासात्तत्रैव तपस्यतां कैरवाणां कुमुदानां समाधेर्दिवासंकोचस्यैव ध्यानस्य भंगे तस्या जने विषये नि
मित्ते वा विबुधांगना अप्सरोरूपायाः रात्रेः चंद्रमुखमेवाहमेवं मिमन्ये ॥ किंभूतं सुखं अमृतमेवाधारोऽस्य नूतं ओष्ठे यस्या
यद्वा अमृतं तत्तुल्यो धरोष्ठो यस्याः यद्वा अमृतमधरं यस्मात्पीयूषादधिकरसत्वदोष्ठो यस्य तथा मयूखा एव स्मितं अथ च तत्समा
धिभंगादेव चंद्रकरवदुज्वलं यस्मितं तेन व्याकं ॥ चंद्रे विशेषणे लिंगविपरिणामः ॥ देवांगनानामप्येवं विधं सुखं रात्रौ जले
तपस्यतां ॥ दुश्चरं तपश्चरतामपि मुनीनां समाधिभंगं करोति ॥ तपश्चरतीत्यर्थे कर्मणो रोमंथ तपोभ्यामिति क्यङ् तत्तपः
सः परस्मैपदं चेति शता ॥ २६ ॥ अल्पेति ॥ अल्पोकएव वयं को यस्यां तथापि पीयूषं एव नीरं यस्यां सेयं विधुमंडली स्मरस्य स
रसी विशालं सएव ॥ अत एव स स्मरः अनन्यवं अस्यां चंद्रसरस्यां समुत्पन्नं सुधानामेतदीयामृतानां पानाद् जले जल
रहिते पल्वले जलाभावेपि पिपवाः मृत्युं मरणरहितं मीनं चिह्नं अथ च सुधारसो जातत्वादनुमापकं लिंगं विद्यते मीनाद्दि
जलाद्बहिर्भूता प्रियं त एवायं हि न म्रियते तस्माच्चंद्रामृतसरसीभवत्वात्सदा तमृतपानाज्जलाभावेपि मृत्युरहितइ
तिसर्वं युक्तमित्यर्थः ॥ २७ ॥ तारेति ॥ घोरस्थमात्मानं अष्टमूर्तेर्हरस्य मूर्तिशरीरं स्फुटं व्यक्तमाह ब्रवीति ॥ यतः किंभू

२३

ताराजा ताराएवास्थीनि रूपाय स्याः तथा शशिनमेव जङ्कुजा चंद्रं गंगावा विनार्तिनृत ॥ तथा चंद्रांशवएव पांशवो त्
स्मानि नैः छुरितात्कतांगरागद्युतिर्यस्यास्तथा छायापथ. गगने दंडाकारादक्षिणोत्तरस्या धवलारेखा छद्मयस्य छाया
पथरूप. फणींद्रो वासुकिं स एव मुक्ताहारो यस्याः स्ता ॥ हरस्मृत्निरयुक्त विशेषणैर्विशिष्ट ॥ द्योरप्यता दृशीतिमूर्ध्वतरापद्मयाव
र्त्तेमहमेव महेशस्यमूर्त्तिर्मिपत्ततात ॥ निजपितुर गगनं कथयतीत्यर्थः ॥ २० ॥ एकेति ॥ एतस्य चंद्रस्य जनकस्यातस्य प्रसिद्धस्या
त्रिमुनेस्तोवनस्यतारा कनीनिका किले कैव जाता भूता ॥ किल पुराणादौ ॥ अस्यात तु त्रस्य तु पुनरियं दृश्यमानासंपत्ततात
निजपितुरत्रिनेत्रसकाशादधिका ॥ यद्यस्मादस्य चंद्रस्य तारा कनीनिका अश्विन्यादिनक्षत्राणि सप्तविंशति ॥ किंतिवन्तद
इति छलं पितुः सकाशादधिकसंपत्तिर्वात्सत्राप्येयमिति भावः सप्तविंशतिमिदवइति इन्दुः सप्तविंशतिकन्यात्रश्विन्या
दिकाश्चंद्रायददाविति पुराणं ॥ २१ ॥ मृगाक्षीति ॥ हे मृगाक्षि हरिणनेत्रे यदेतत्प्रत्यक्षदृश्यं ते इंदोर्मंडलं तत्स्मरस्य पांडु
श्वेतं साम्राज्यस्य चक्रवर्त्तित्वस्य कं आतपत्रमेव ॥ श्वेतछत्रदर्शने सति सम्राजो वरपात्न भवति ॥ पूर्णधवलचंद्रमंडलस्य चोद्दीपकत्वा
त्र दर्शने सर्वेपि कामस्य वशा भवंति ॥ तस्मादेतत्कामस्य श्वेतातपत्रमेवेति भावः ॥ यच्चशशिमानंतरं मस्य छत्रमंतस्येंदुमं
डलस्यतं गोमोटनं कलत्वयस्य सम भ्रथस्य छत्रभंगं खलु ॥ छत्रस्यमोटनं राजत्वयस्य सूचयति ॥ तच्चापदेक्षेवाद्दीपकमित्रं

द्रष्टव्यैकामन्दीणएकत्वतितस्मात्कल्पपदे योऽस्पष्टं गः सकामस्य छत्रं गङ्गवस एवेति नावः । खलु उत्प्रेक्षायां नि
ध्येयेव ॥ २० ॥ दशेति ॥ दिग्विजये यद्यतेन दशाननेनापि जगति जित्वापि योयं चंद्रः शुरा सर्वे जातु कदाचिदपि जेतुं नापा
रि । हेमानि त्वन्मुखस्पर्द्धिनं चंद्रमसह मानेनैभी तस्यास्य विशेषोऽयं कस्यच्चित्स्वपाकलंकरूपाम्लानिर्लज्जा सज्ञा गता
लयाथच युक्तैव ॥ यतस्त्वयैकेनाननेन नितरां जितस्य । यो हि दशाननेन दशाननैरपि सुरैर्वैजेतुं नाशकि किं तस्य स्त्रियास्त
वैकेन मुखेन विजितत्वेक्लब्धया मालिन्यमुचितमेवेत्यर्थः ॥ तन्मुखमेतस्मादधिकमिति नादः ॥ प्रतीयमानोत्प्रेक्षा ॥ ल
ज्जया म्लानिर्भवतीति ॥ रावणश्चेन्द्रं जेतुं प्रवृत्तस्तत्सुराग्निना दह्यमानः कंपमानश्च तमजित्वैव पराङ्मुख इति ठक्करकं
डिकया ॥ २१ ॥ हृष्ट इति ॥ अयं शशांक इयंतं तावंतं अहानि शुक्लपक्षदिनानि तावद्वृद्धिं लब्ध्वा नितरां सर्वदशा सर्वसर्वदि
नावस्थां जयन्ति कामपुत्रे रोत्तरदिनेषु कलावृद्ध्याधिको नवं त्वया दृष्टः इयंति दिनानि जयन्नेव दृष्ट इत्यवधारण
ध्वनिता वक्रोक्तिः ॥ अनयैव परिपाट्या पूर्णबिंबोऽयं त्वदास्येन सह तुलां साम्यमथ च तोलनकाष्ठं प्राप्तः आरूढश्चेत्तदा मे
नरं निकटं त्वमेव स्वच्छत्वेनैव स्वेनेव पराजयं कलाद्वयं वृद्ध्याप्तासि । उत्तमेन सह स्पर्द्धमानो हि नंगं प्राप्नोत्येव । तुला
दिव्ये हि हीनस्य पराजयः सर्वैर्दृश्यते ॥ अहानि त्यत्यन्तसंयोगे द्वितीया ॥ अतुलोपमाभ्यामिति निषेधेपि सह योगे तृतीया ॥

तथाच कालिदासस्तुलां यदारोहति दंतवाससेतदिति ॥ श्लो० ॥ क्षत्राणीति ॥ द्विजेंद्रो जमदग्न्यपत्यत्वात्क्रोधेन प्रसिद्ध
पराक्रमो रामः सर्वाणि क्षत्राणि परिच्छिद्यापि क्षत्रादेव रामात् हृतिरथेः सकाशात् यथा न त्यक्तपरात्मवं प्रापत थातेनैवप्रका
रेणायमपि द्विजराजः सर्वान्पिक्षान किच्छित्वा संकोचकरणात्परान्द्वयापित द्वक्रपक्षान्सकाशात्परिम्लतिं परात्मवमेति ॥
सकलक्षत्रियाधिक्यं यथा श्रीरामस्य तथा सर्वपक्षाधिक्यं त्वन्मुखपद्मस्यपीति भावः ॥ वा तुं लिपक्षमित्यमरः ॥ श्लो० ॥ अंतरि
ति ॥ हे परेप चंद्रदर्शने अहन्ने नेमि हरिणेन पांडुरेण रूपे एवं रोति कत्रस्तिधांशोरंतः प्रांतगः सर्वमश्रीकोपीशानीस
लक्ष्मीः क्रियते सश्रीकः क्रियते त्वं पत्रप ॥ अथ चवं द्रस्यमध्यं हरिणेन मृगेन कत्वर्थरूपेन स्वीयनीलवर्णेन कृत्वा अस्य
लक्ष्यते सलक्ष्मीः क्रियते सकलंकं क्रियत इत्यर्थः ॥ पत्रप ॥ एषसनल इत्यमुना प्रकारेणास्य चंद्रस्यांतपर्यंतं रागं कदा
चिक्षणमात्रमेवमाम ददर्शत्ति दर्शयामास ॥ कदाचिद्भ्रांतमर्ध्यरागं दर्शयामास ॥ अंगुल्यादिना चंद्रस्थेतनीलत्वप्रांतम
ध्यरागदर्शने सर्वस्लिष्टपदैस्तयमस्त हर्कीडांच कारेति भावः इति मध्ये कवेरुक्तिः ॥ हरिणः पांडुरः पांडुरित्यमरः ॥ अंतंइ
त्यकारांतमेफत्र ॥ अंतरित्यव्ययमपरत्र मध्यवाचि ॥ लक्ष्मीशब्दस्य समासांतविधेरनित्यत्वात्कप्नाभावे सलक्ष्मीरिति शब्दा
सिद्धिः ॥ पक्षे सलक्ष्मशब्दात्सिद्धिः ॥ पत्रपेपा प्रादिना कर्तव्यैचिरा ॥ हरेप बुध्यर्थत्वा ड्रति अणैकर्तुर्णौ कर्मत्वात् ज्ञीमामिति द्वित

नै०टी०८२

या॥२४॥सागरादिति॥ अयं चंद्रः सागरात्समुद्रान्मुनिविलोचनाद्दरेरात्रेर्नेत्रकूपाद्द्वयात्तत्काशाद्द्वयस्मादजनि उत्पन्नस्तेन
कारणेन द्वाभ्यां जातत्वा। द्विजः किं। एवमेव चानयैवरीत्या द्वाभ्यां जातत्वादेव द्विजोऽभवत्। नप्पर्ययं विधुरत्रेर्मुनेर्जातः किं
कथं पर्यवस्पति द्वाभ्यांजातत्वेऽसत्यपि अत्रिमुनेर्वक्त्रं वन्नयं द्विजः पर्यवस्पति किं द्वाभ्यां जातत्वा यथा जोऽनड्रति तात्प
र्यं दृष्ट्वा कथमुच्यत इति त्पर्थः। अथ चैवमेव यथानेन प्रकारेण द्विजत्वं तथैवात्रिमुनियो न वक्त्रयं द्विजः पर्यवस्पति किं
द्वाभ्यांजातत्वा यथा द्विज उच्यते तथा द्विजाद त्रिमुनेर्जातत्वादपि द्विज उच्यते किं। द्विजोत्पन्नो हि द्विज एव भवतीत्य
र्थः॥ अथ च द्वाभ्यां जातत्वा। द्विजो न वक्त्रे वनत्रिभ्यो जायत इत्यत्रिज इत्येवं तात्पर्याद्दृष्ट्वा कथ्यते किं। यो हि द्वाभ्यां जा
यते स त्रिजो न भवति एवमेवायमत्रिजः कथ्यते किमित्यर्थः। अन्योपि द्विजस्त्रिजो न भवत्येव॥२५॥ तारेति॥ हे तन्वि
द्वशांगिधाता ताराणां नक्षत्राणां विहारस्तु विगगने चंद्रमयी मंडली विंबं जिनस्य उ स एष पुरुषस्य श्री विष्णोर्मन्त
स्तुमतो सत्पांत दादिष्ट मन्नः। पतत्त्व कारः निर्ममे॥ तेनैव सुकृतेन शोस्तिनिन लोको नर व्यापारेण ल्हाबास्त्वर्लोकः स्वर्गस्तु
वनं तत्संबंधिनां लोकानां सुराणां मध्ये तिलकत्वं श्रेष्ठं त्वं अवाप॥ किं भूतां मंडली हिमस्पतुषारस्पर्शस्तुर्वं स्थानं भूतां
अतिशीतलां तथा मृगस्य नाम्नो मध्ये वासो यस्यास्तां यस्यां मध्ये मृगोस्तीति यावत्। तादृशी अन्येषां सुराणामेता दृक्

रेव

३५

व्यापारकरणेसामर्थ्यान्नावाद्भ्रंहेलेवश्रेष्टोऽस्मादितिसर्थः॥ अथध्वतारायाबुद्धदेवस्यविहारस्थानेध्वजास्थानेहिमत्तुवे
शीतलांअत्त्वत्वाद्धिमाचलांरूपांवातथाष्टगनानेःकस्तूर्यावासःपरिमलोऽवस्थानेवायस्पानोकस्तूरीमिश्रितांचंद्रम
यीकर्पूरमयीमंडलीरात्रिंयच्चकारतेनैवउरूपेनजिनस्पर्मितेचौ द्रुस्त्वबिंब्रह्मासुरश्रेष्टत्वमधत्तबोध्याहि॥ बुद्धदेवप्र
सादेयस्तत्स्वार्थकर्पूरकस्तूरीशशिंकरोतिस्सर्वलोकमध्येश्रेष्टोभवति॥ तिस्वदर्शनेप्रत्यथ्यादयत॥ ब्रह्मान्वेवमर्हन्
तस्मादिवसर्वश्रेष्टोजातइत्यर्थः॥ तेनैवतिपाक्तेत्रैन्द्र॥ बुद्धदेव्यांमततार॥ ३५॥ इडुमिति॥ हेहिमांशुक्षिवस्पर्लकस्या
शोभायानिडुविस्वस्मान्सत्त्वात्परिहासकारिततोप्यधिकशोभंमुखंयस्यास्तादृशि॥ नैमिपंडितेइडुतवमुखान्
कान्त्यत्वन्मुखमपेक्ष्यवाकुंडलमीषदसमार्घत्र्यंलत्वमपियस्य पूर्णेनसंपन्नेतत्तणादपिनिःसारमितियावत्
अथववद्धधिकंद्वलंयस्मात्तणदपिनिःसारंयद्यस्माऊणंतत्तस्माद्धेतोर्मृगएनंचंद्रंमृगसंबंधित्वात्कलयाकोमलं
तृणकवलनाभिलाषेणैवाथवान्वंदेप्रयुक्तस्यवकुंठणशाद्वस्यवकुंचतत्तृणंचवकुलिंतृणानियस्मिंतादृशमिति
त्यैवंरूपार्थग्रहणरूपायात्त्रांतेबनत्पजति॥ मृगोहिवकुयत्तृणंवकुंठणंदेशोवानखुंचति॥ नन्वतुलेवसतत्पासंसारंक
यंत्रांतिरितासांक्वार्थंतरन्यासमाह॥ पात्रावीभपशुसंबंधिनी॥ उविंत्रिशुज्ञानेशुविषयेमोहमहिमात्त्रोतिवाऊर्ल्वं

नान्येति॥ वऊ कालातिक्रमेपि नापयाति॥ यतो हि सर्वदा भूदा एवेत्यधाभृगस्य भ्रांतिर्नापयाति तस्मादनंतं पजनीत्
तियुक्तमित्यर्थः॥ हृन्निष्ठितिपठि व्यापारे ष्ठु॥ मुखात्वल्पत्वो पेपंचमी॥ वऊ द्वण पद्लेइ षदस्समाप्तेकिनाषासुप
वऊजिति वऊच॥ २७॥ स्वर्णानुनेति॥ हि प्रिये सुधाएवं सुधांशुं श्रवयत्कात्ववाधरोष्ठमवलंब्य सुषरक्केस्यो
ष्ठस्यरागोबक्कवर्णैः स्वतसिनस्पष्टावःसितिमाधावल्पमेव चिकित्सयस्यतादृशं धवलरूपमपि स्वमात्मानं निक्कु
तिकुनः स्वर्णानुपानात्रियानिरोदधाति॥ यतः स्वर्णानुनावारंवारं प्रस्कलपानेन विशेषिकाजिर्णयोत्पादेन त्वदी
दुःखात्मत्वाप्रातिलोम्यान्वरोगेनोत्पादितदुःखा॥ किंभूतमधरोष्ठं प्रसिद्धस्य ताम्बूलस्येव ताम्रवर्णस्य तांबू
लेनेवकृतताम्ररक्तवर्णं॥ पुनाराकुपानस्यियात्वदधरमेव स्थानांतरमाश्रित्य रूपांतरेणात्मानं गोपायतीत्यर्थः॥ त्र
न्यापिसत्वयं स्थानं हित्वा स्थानांतरमाश्रित्य तत्रापिरूपांतरं धृत्वा स्वं निक्कुतेसुधायाश्चंद्रस्य परित्यागात्वन्मुख
श्रयणात्वन्मुखं चंद्रादधिकमितिन्नावः॥ तांबूलताम्रमित्युक्कारीत्या पंचमीत्स्क्तावा॥ दुःखात्लतादुःखात्प्रातिलो
म्य इति ज्ञेयम्॥ २८॥ हर्यक्षीति॥ हे प्रिये मत्तेनेदेन कलंकरूपं कुरंगं यद्यासस्य उदरे मध्ये प्रक्षिप्य जातास्फीता प्र
र्णा तनुर्यस्य हरेरिंद्रस्य पत्न्याहरिता प्राच्या दिशा स्तनस्य तत्रोदितस्य पूर्णस्यात एव हरेः श्री विष्णोर्वापादीन

६

बतःयद्वासंजातप्रणशरीरस्यमृगयद्वात्रात्रांकलंकंमध्येनिक्षिप्यमध्यस्थितकलंकस्यपत्नीनिकातुल्यत्वाच्च॥विध
चामनेत्रीनवोत्तोमुख्यचंद्रस्यवद्धदनांवुजात्सकाशाद्यसंगःपराजयोऽजनितदेकाकिनःसर्वदात्र्यसहायादेकस्मा
त्प्रात्मनत्वन्यस्मात्तकमलात्॥नह्यन्यैपरैरयपराजीयते॥प्रत्युतायमेवपद्मान्पराम्लवतीत्यर्थः॥अथवांवुजतुल्या
त्वद्वदनादेवपद्मादथवपद्मसंख्याकोत्त्वंदनरूपादंवुजाद्यदस्यत्वंगोजातस्तदेकाकिनोऽसहायस्यस्पाद्भवेत्॥बहु
भिरेकःपराजीयतइतियुक्तमेवेत्यर्थः॥यःसिंहिकायाःसुतोराहुःसत्वनरेकोऽन्योऽस्यप्रतिभटःप्रतिमल्लःपरात्नावुको
राहुरेवनतुअन्यइति॥संप्रतीतिपाठेऽच्छत्वनरस्यैकःप्रतिभटःयःसिंहिकायाःसुतःस्यात्॥एकाकिनोऽस्यतवन्नुरनप
न्नःप्रतिद्वंद्वीनन्नवाअतुल्यत्वात्॥किंत्वेकाकीराहुरेवास्यप्रतिभटोयुक्तइत्यर्थः॥किंचस्वनग्नत्वनात्राहोरप्यस्मा
त्पःपराजयइतिमहदस्यकष्टंप्राप्तमित्यर्थः॥अथवहरिद्विषेण्याहरेःसिंहस्यापत्न्यासिंघिकयाप्रसूतस्यतथामृगंत्री
त्रांचायंकंचनपक्षुंजठरेनिक्षिप्यनदृयित्वास्थितिस्यात्एवसंजातपुष्टशरीरस्यातएवहर्यच्छीनवक्तःसिंहितांप्राप्तु
वतोस्यतवमुखाद्यःपराजयोऽजनिसएकाकिनःकेवलात्पद्माङ्कजादेवपराजयःसिंहस्यगजाङ्कंगेयथातद्वद
तन्महद्भिन्नमित्यर्थः॥अथवपद्मसंख्याकादेकस्यपराजयःसिंहोप्येकोवहुभिःपराजीयतएवेत्यर्थः॥अथ

नै०प०टी०८२

वपश्चाच्छशादष्टापदादेवर्भंगः सिंहस्य केवलमष्टापदादेवर्भंगः पद्मस्य शत्र्यांशकाशत्त्वन्मुखमधिकमिति भावः
हर्यक्षः केशरीत्यमरः ॥ गजाकुशारत्नाः पश्चाद् इत्यनेकार्थभोजः । प्रथमपक्षे हर्यक्षशब्दो द्वितीयः ॥ द्वितीयपक्षे हर्यक्षबाद्ध
दव ॥ २१ ॥ यदिति ॥ हे प्रिये वेधा नयनद्वयमेवोत्पलं तन्मयीं तद्रूपां तद्रचितां यस्य पद्मस्य पद्मजो व्यधात् व्यरचयत् ।
यतः श्रीविष्णोर्नाभौ वर्तमानात् पद्माद्भवतीति पद्मजः । स्वजनकस्य यस्य पद्मस्यापि त्वत्क्यानेत्रद्वयेनैव नीलोत्
पलयुगेन महती स्रजामकृत । वा कूपारीणा वाचः परतीरं न वा वाचा वर्णयितुमशक्यां रुचिर्यस्य सोयं पद्मश्चेन्नावके
मुखं न एव न वत्सुखरूपो जातः ॥ अनंतरं ब्रह्मणस्त्वपि त्वद्भुज्यां नेत्रनीलोत्पलाभ्यां तत पद्मजनत्वादत्र त्वन्मुखेनेत्र
नीलोत्पले चक्षेपे तेइत्यर्थः । इति चेन्न दातः हि अस्तोशीतांशुः कोना मापि तु न कश्चित्त्वन्मुखस्य पुरस्तादयं वराकः स्म
रणे हे प्रिये इत्यर्थः । तर्हि सो कइतिचेत्तत्राहायं वकः किंभूतः दक्षिमुख एव मृग स्तस्य व्याधो हर जटाजूट वासीति
प्रसिद्धं ॥ वाक्यारीणरु स्वि शितिब्रह्मविशेषणं वा ॥ अत्यंतयदपत्यस्य ब्रह्मणोपि सोयं वाग्गोचरस्तत्ति तु पद्मस्य
सोदर्यमनसोपि गोचरो न भवतीत्यर्थः ॥ त्वन्मुखस्य चंद्रस्य च महदंतरं साम्यसंभावनापि नास्तीति भावः ॥ एतेन ने
त्रादिसुंदरं द्वंद्वं ब्रह्मणा सृष्टं । भवदीयमुखपद्मं तु ब्रह्मणोपि स्त्रष्टृत्वात्सर्वाधिकमिति सूचितं । अन्यापि विशिष्ट व

३१

वस्तुग्रामयेशिवस्थानयुक्तनदीतीरवानीरवासीतपस्पति॥नदीतीरवानीरवासित्वेवकज्ञातिगवाकपारीणा त्र
वार्थिराड्गावारपाराद्धरवाविस्पत्रापिविस्टहीतादपीतिक्वनारव॥४०॥जातमिति॥अर्हदिंदोरंकेवलविजयिनइं
द्रस्पगजग्रामणीर्हस्तिषुमध्येप्रधानंशास्पामिवर्त्तमानोयऐरावतस्तस्यगंडयोःकपोलयोःपिंडयोःसिरःस्थितऊंनस्थ
लयोश्चयद्वंद्वंगंडद्वंद्वंपिंडद्वंद्वंचतेएवापादानंनिर्गमनस्थानंयेषांतेच्युतेदानाद्रवलवामदजललेशाश्चतेषांगलन
त्संपर्कात्काकतालीयंआकस्मिकंदैवात्सिद्धइंदीवरान्नंजातमेकंकुलंकविवरोकोमन्ये।किंभूतसंद्रोःअस्पामंगुल
निर्दिष्टायांपुरोहरूपायांशातक्रतोरथंशात्क्रतवीतस्पांहरितिदिशिविहरतउऊढत॥तथोरुपामत्वेविषयेएक
मत्यंसर्वसंवादस्तेनतत्रवास्थितिभिर्वर्त्तमानाभिःसकलाभिःपंचदशभिरपिकलाभिःकृत्वानिर्मितिर्यस्पारुपामत्वैक
मत्येनस्थितासकलकलानिर्मितिर्यस्पताद्दशस्पवा।अतएवनिर्मलस्पप्रत्येकंकलानांधावल्यस्पदृष्टत्वाद्धवलस्यकल्प
कल्पानिर्मितत्वात्कारणधावल्याद्धवलस्यारुपामत्वैकमत्येनस्थितायाःसकलाःकलास्ताभिर्यानिर्मितिस्तस्याबाहे
तोर्धवलस्या सर्वकारणधावल्यात्सकलोप्ययंधवलएवाभूत्।पश्चान्नुपूर्वदिग्भ्रमणचरात्तत्रैवभ्रमतऐरावतस्प
कपोलऊंनस्थलगलन्मदजलंदैववशात्स्पर्शनेनायंमध्येकालत्वैःप्रतिज्ञातिस्पर्शः॥तालतरुतलेयदेवकाकस्योपवेशनं

नैषटी०२२

तदैवदैवात्काकस्योपरि तालफलपात इति॥ काकतालमिव समासः। घत द्विषयादिति छः। निर्मित्तेः पदे हेतौ पंच
मी॥ अंशमिति॥ हि प्रिये लोकाः रजनीनाथं षोडशमंशं कलामामनंति सत्यं कथयंति। तत्र षोडशांशरूपाः प्रतिपदा
दि यस्मिन्कर्मणि राकां पूर्णिमामभिव्याप्य वर्द्धिष्णवः प्रतितिथि एकैका तिष्ठन्त्यो वर्द्धमानाः पंचदशसंख्याका
एव कलाः एवं चंद्रं वृत्तत्वं तिवर्तुलं कुर्वंति तिथिसंख्यास्ताभ्यस्तस्य मंडलं कुर्वंतीत्यर्थः। यावुनः कला षोडशी
तिथिमृते उद्भूता प्रयोजनाभावाच्चंद्राद्बहिः कृता सा षोडशी कला शेषा पंचदशकलाभ्यो ऽवशिष्टा सती यद्वा
षोडशीं तिथिं विना प्रयोजनाभावाद्यावशिष्टा सा निःप्रयोजनत्वाद् उद्धृता चंद्राद्बहिर्निष्काशिता सती हरालंकारः
शिवशिरोभूषणं जाता किं। चंद्रे प्रयोजनाभावाद्धरालंकृतिरिवाभूत् किमित्यर्थः॥ अहं तस्याश्चोद्धृतायाः षोडश्याः
कलायाः स्वरूपामिकं न जानामि तिमा स ह भवद्वर्त्तमानस्थानस्य सर्वावस्थिते त्वं बुद्धिविलविवरं तत्कला नवस्थित्या
तत्वाश्रयनीलं नभोभागमेव हे चंद्रे मंडलमध्ये कलंकं पश्यामि किं। मध्यवर्त्तिनीलं तत्स्थानबिलमेवाहं कलं
कत्वेन शंक इत्यर्थः॥ शेषशब्दस्यापि धेयालिंगत्वं पूर्वमेव दर्शितं पूर्णे राका निशाकर इत्यमरः। वृत्तत्वं तितलक
रोति तितिणिः॥ वर्द्धिष्णवः अलंकृञ्जीनौ ष्णुच्॥ तिथिमृते ऋते नलाशा मितिवत्। स्वरूपामिका मनोज्ञा देशाद

३८

निगरणत्वाद्भावेबुद्ध ॥४२॥ ज्योत्स्नामिति ॥ हे सुभ्रु सुंदरि त्वद्वक्त्रं हन्तत्वादिगुणैः समानमपि नयनाभि
रामत्वाद्यधिकं समानमेवाभिधित्सुरत एव स्वस्य श्लाघीयसी अतिदीर्घलोचने निस्तुलं भूमिष्ठं विधुमकोर
शिशुना प्रयोज्येन स्वीयां ज्योत्स्नामादयते न स्वयति ॥ तत्रोत्प्रेक्षते ॥ चंद्रिकाकृत्स्नपायनस्तत्तत्पकृतपर्णेनात्मी
यास्त्ववंशीकृतादिति स्वचकोरबालकान्तस्य कारणान्मूलं स्वचंद्रिकापायनहेतुभूतेभ्यो नदीयातिदीर्घनेत्रद्वयसुभ्रू
वितुमादातुमिव ॥ यद्वा कंचित्स्वचांद्रिकांपाययित्वा ततो नेत्रद्वयलक्ष्मीं प्राप्याप्तुं मूलं चंद्रिकारूपं मूलधनं वृद्धि
लुमिव ॥ अन्योऽपि पुत्ररत्नमणीधमर्णस्य किंचिद्दत्वा तं वशीकृत्य पाश्चममिष्टं वस्तु ततो गृह्णाति ॥ तथायं चंद्र इत्याह
आदरयुक्तः सन्नंकेऽमध्ये स्वचोत्संगे रंकुत्वकरोति ॥ उत्संगधारणेन लालयतीत्यर्थः ॥ किमर्थमित्याशंक्याह ॥
तन्मूलमित्यमति विशालं तदीयनयनयुगलं परिस्प्रष्टुमिव स्वलक्ष्यं कर्तुमेव ॥ त्वन्मुखसाम्यनिशिभिन रमणीय
नेत्रद्वयसंपादनाय्यायं चंद्रश्चकोरं हरिणं वं वयतीत्यर्थः ॥ चंद्रा उत्कृष्टं त्वन्मुखमिति भावः ॥ परिस्प्रष्टुमिति पा
ठे तन्नेत्ररामणीयकप्राप्त्युपायं स्प्रष्टुमित्यर्थः ॥ शिशुः सुप्रतापद्वितिसूत्रस्यितुं शिशुपदं ॥ आदयते अदो भग
रणार्थत्वेप्यदेशात्प्रतिषेधो वक्तव्यइति वक्तव्या निगरणादिपरस्मैपदा जावे णिच्व्यधेतिनङ् ॥ शिशुनात्यादिवाद्योने

नैषटी० २२

तिः अगुणैकमत्त्वमिति भावः॥ नाधीयसी अतिशायने ईयसुनि प्रियस्थिरेति प्राधादेशः॥ लिङ्गु विधिस्तु रिति न लोके नि
षष्ठी निषेधः॥४३॥ लावण्येति॥ हि प्रिये वक्रस्य कश्चित् त्वत्रैरसं विना अखिलेन लावण्येन कृत्वा तवास्य मेवारंभि
मिति॥ चन्द्रस्तु पुनः तस्य लावण्यस्याधारपात्रं स्पष्टं जानीहि स्फटिकेन लावण्यस्थानि पात्रमात्रलग्नेनावशिष्टेन प्रोञ्छ
नेन पात्रनिर्घर्षणेन कृत्वायाल ध्वता उपार्जितत्वे नेनाहं कियत्वदं मलिनं यस्मात्तेन किंचिन्मलिनेन शेषेणान्व
मुखं निर्माणं विशिष्टेनांशेन कृत्वारेभिति मितः॥ अत एव क्षावलमंडलोयं शेनितमित्यर्थः॥ शेषेण तु निर्मित
इति वा॥ विधिना एतत्वन्मुखमृगांकलक्षणं द्वयं निर्मयिस्पृहं दृष्टा अस्नुपाणौ क्षालितो खलु लावण्यलेपकृत ज
लक्षालनं विद्वा॥ तस्मात्तस्य क्षालनरजो मिलितलावण्यलेपस्य लेशैः अल्पैरंशैः रसैरंशैरेव कन्दर्पिर धुना
पीरनिलये जलस्था पिता : सृष्टि रंभोजमारभ्यते निर्मियते॥ कमलनिर्माणे ब्रह्मणः कोपि प्रयासो नेत्यर्थः
कमलाच्चन्द्रोऽधिकस्तस्मादपि त्वन्मुखं लावण्यशाकल्येन निर्मितत्वादधिकमिति भावः॥ अंभोजं जातेकवच
नं॥४४॥ लावण्येनेति॥ अखिलेन लावण्येन तव वदनमारंभि नेतान्नव हृदन कामनीय वर्णना निर्मितापि हृ
रिति घृत्वशक्यकरणत्वादित्यर्थः॥ उक्तरीत्या तत्पात्रमात्रस्पृष्टा प्रोञ्छनलब्धताहं मलिनेन शेषेण तु यस्य

३९

द्रोविधिना निरमायि तस्य लेखापि लावण्यपात्रमात्रस्य लावण्यनिर्मितस्य चंद्रस्य षोडशांशरूपा कलापिक
लामात्रत्वादेव निष्कलंकत्वात्तुषमयापरमयाशोनयाहत्वाऽहं कृत्वाऽहं कृत्वाऽस्यापि दयाहमेव रमणीयेति दर्प
णवलंब्यशीलो। शिखामणि शिरोभूषणमस्त्रतु॥ शिवशिरोधरो हरः॥ अन्योऽपि सदर्पस्तु न म शिरोधिरो हर इति॥ अड्कुकु
मुदं कर्तृ यद्यस्मात्तस्य चंद्रस्य पदं प्रति विकस्थानं जलमस्तत्रादात् श्रियः सद्मास्त्रतु। जलस्य चंद्रकिरणसंस्पर्शात्सिद्ध
स्य चतत्रोत्पन्नत्वाद्वर्तमानत्वा। कुमुदसाहचर्याच्च पद्ममपि लक्ष्म्याः स्थानमस्त्वतु। यद्वा पद्मं वा तु कुमुदाद्वितो श्रियः
सद्मास्त्रतु। अत उत्पन्नजातियोगात्॥ कुमुदादाधार उत्पन्नयोगाच्च कुमुदादिव परं पर्यायप्रज्ञाणां लक्ष्मीः रह स्वस्त्रदि
सर्वथ्य यद्वा यावच्छिखाशांनो। शिखामणिः स्त्रतस्य शिखामणेश्चंद्रस्य पदं स्थानं शिरोमस्तकं पूजास्मये यस्मात्कुमुद
पद्मं वा स्पृशात्॥ अतस्तदुभयं श्रियः सद्मास्त्रतु। चंद्रसंबंध शिरःसंबंधादुभयं श्री पद्मस्त्रतु॥ तस्य लावण्यस्य श्ला
नं विधिहस्तलावस्य पण्य लेपद्मालनशीलं यस्मात्कुमुदं पद्मं वा स्पृशात्॥ यद्वा पद्ममेवा स्पृशात्। यतो ज्येतस्मात्कु
मुदं पद्मं च पद्ममेव वा श्रीसद्मास्त्वदिति वा॥ तस्य खलु लावण्यलेशापरं परासंस्पर्शप्राप्तशोभान्विं हा हा निर्तिहस्तुख
लावण्यं वाङ्मनसगोचरो न भवतीत्यर्थः इति भावः॥ अर्थांतरस्यास्पष्टत्वात्पूर्वार्द्धस्यत्वर्थांतरप्रतिपादनार्थमनुवाद

रूपत्वानायंश्लोकपुनरुक्तः॥ अहमिति विभक्तिप्रतिरूपकमव्ययं॥ तस्यत्वकोतेनसहसुपेतिसमासेत्वकोऽल्पप्॥ ४५
सपीतिरिति॥ हे प्रिये संप्रीति स्तीगणमेवान्योन्यं सम्यग्पाप्रीतिः सौहार्दं तस्माद्धेतोर्यासपीतिः सहपानं सुहृदो हि
सहपानं कुर्वंति तस्माद्धेतोर्यद्वा सहपानाद्धेतोर्यासम्यक्प्रीतिः सैवाभिष्टद्विस्तस्माद्धेतोस्तारागणपरिषदा सं
येनमरीचः समंताद्याप्तेयं रजनीशः दिनमणिः सूर्यकांतमणिस्तस्यश्रीवाशिला तया घटितोतिधवलः स्थूलः
पेयद्रव्याधारभूतोमणिकोऽलिंजरएवाजनिसंभूतः॥ विधिनातारापरिषदाद्यार्थमर्थंचौतिपद्मपाकोद्दशः साद्द
शपनकस्त्वंतरसंभावनारूपायामुत्प्रेक्षायांविषये कविभिर्विशिष्टसंभावनाद्भुतैः श्रीहर्षादिभिर्महाकविभि
स्तारापरिषदेवसुधामस्तुवर्द्धं धृतोयोमध्यस्थितः शशांकः कलंकः स एवनीलीस्मानीलमणिस्तेनघटितंचषकी
पानपात्रं यस्मिन्नेवंभूतइवायमितिअभिधानायवर्णनीयवर्णयितुंसुराकस्सुखेनशक्यः॥ वंद्योधावल्याद्दूत्र
स्वर्णत्वाच्चपीयूषस्वर्गः सूर्यकांतिमणिकइवकलंकश्चनीलमणिघटितंचषकमिवदृश्यते। पक्षेपइत्यर्थः। यद्यम
णिकस्त्रोदकाद्युद्धरणायमणिकमुखेचषकः स्थाप्यते तथा ताराशशिः परस्परं मिलित्वासुधापानं कर्तुंपरिवेष्टि
तस्यसुधाशशिनस्तस्यापिचंद्रमणिकस्यमुखेसुधोद्धरणायशशानामानीलमणिचषकोनिहितइवस्सुप्ते

तुराकृत इत्यर्थः॥ चषको ऽस्त्री पाणपात्रमित्यमरः॥ सपीतेः चोपसर्जनस्येति म ह्रस्व इति योगविभागाद्ध्रस्वः हस्वसः॥ क
विनिःषलर्थ योगान्न षष्ठी॥ सुराक इति निरवलं॥ ४६॥ त्वास्यमिति॥ हे सुंदरि विधिनाद्यगतमधूषस्य मंडलं बिंबं तस्य हृत्वाकृष्य द
कत्वादिगुणान्॥ आदाय गृहीत्वा ते त्वास्यं यत्ते निर्मितं तेन गुणानामाकर्षणहेतुना शर्वर्याः परिहृतः॥ प्रत्युत चंद्रो दोषाणामा
कर उत्पत्तिस्थानं नतु दोषारात्रिस्तत्कारित्वाद्दोषाकर इत्यर्थ इत्यहं शंके॥ तथा अहं इंदोर्मृगगत्सकाशान्तारं हृशायाः द
यत्र अतिशेष्टे ते के गृहीत्वा इह भवन्मुखे निहिते स्थापिते इत्यहं जाने॥ कुतो ज्ञातमित्यत आह॥ सुंदरतरेत द्धृके इत्यग्रतः के
सति॥ अंधकारदुःखमनुभवयतारतम्यक्षिप्यार चतुरोयं मृगो विधोर्वं द्वेदूसिंस्थितिमभवसमीचीनाधारपरितोषं कृतोवाद
ध्या ह्मरयेद पितुनकथं वितस्मान्नेत्रोद्धरणाद धस्तत्वेनैव त्वन्मुखरामलीयकादर्शनादस्य त्वागतुमशक्तेः स्थितत्वन्मुखत्य
स्कां नैवायं स्थित इत्यर्थः॥ त्वन्मुखे चंद्रादधिकं नेत्रे च मृगनेत्राभ्यामधिके इति भावः सारे इति कश्चित्॥ ४७॥ सुत्वाति॥
हे रुशांतनु त्वं गगनतटे नभः स्थलं अतुलदृष्टी तत्पश्यसि किविशिष्टे तकांतिं तथा बहुत्वाद्गणनैः संख्यातुमशक्यं त्रपुंत्रं
गुल्मानि द्विरपं प्रत्यद्गम्यं उडुगणां प्रतिनिशारात्रौ शशितलाच्चंद्राधोभागाद्विगलितास्त्वला॥ मृतेनामृतं स्पर्शरविरथ
स्य हयचयस्तास्य खुराणां यानि विलानि न्यासस्थान विवराणि तेषां कुलं वृंदमिव भाति रुपेण कलयसि त्वपितु नदिवा

नैषधी २२

तितरां जानीहीत्यर्थ प्रतिक्रियां चंद्र ऊलना धवलेनामृतेन पूर्णाः सूर्याश्वखुरगर्त्ता इव तारकाः शोभंत इति भावः ॥ गग
नतटं कर्मप्रवचनीययोगे द्वितीया प्रतिनिरोतिवीप्सायामव्ययीभावः । सर्वलघुः ॥ ४८ ॥ उपनतमिति । हे प्रिये रक्तोनै
मः शनिः तस्योरुरूपीतः कविरित्यादिप्रोतिःशास्त्रादिप्रमाणपात्रानावर्णैकृत्तीस्मुदु निनत्तत्रान्सेवेपुष्पजातं उपनत
मुपसन्नं संपन्नमास्ति अयं मल्लदलेण जनः प्रारब्धकामदेवपूजा यास्तवपरिवारकस्यैवंदनाभुपचारोपनाय कोथवा
संयोगकारीनवतु ॥ त्वं तिलैः संजाततिलकस्तिले वेवतिलवाकृतोवायः पर्पटः शालितंडुलपिष्टरचितश्चिपिटस्ति
त्तसंकुली संज्ञ उपदेशविशेषस्तद्वदाकायस्यतत्तुल्ये सकलंकमध्यत्वाद्विशिष्टपर्पटसदृशमिंदुमेवनिवेद्यं काम
पवितरा एवं पंचबाणं कामदेवं उपास्व । पूजयत्रन्योपि देवपूजकः पुष्पादिसामग्र्यादेवं पूजयति कश्चित्परिचारको
पितस्य जवति । एवमत्रापि ॥ सर्वाणि नक्षत्राण्युदितानि कामोद्दीपकश्चंद्रोप्युदितः सुरतां तत्परोकाराणि षिद्धः । संध्या
समयोऽतिक्रांतस्तस्मात्काममुपास्य सुरते प्रवर्त्तस्वेति भावः ॥ पंचबाणेइत्यनेन कामस्यपीडाकारित्वं सूच्यते । जाति

धाना

र्जातं च सामान्यमित्यभिज्ञात शब्दः सामान्यवाची पुष्पमात्रे पर्यवस्यतीति लक्षिते तितारकादिः मतुर्बताक्करोतीति
रूपंमान्निष्ठा ॥ ४९ ॥ इदानीं काव्यसमाप्तिं विकीर्षुः श्री हर्षोनायकमुखेनाशिषमाशास्ते ॥ रवेरिति ॥ हे प्रियेदेवः प्र

काश्मानस्तुषारद्युतिर्हिमकरोऽथवा हिमकर एव देवो वर्णनीयः सर्वचक्रवर्तिनोऽस्मदादीनामावयोर्वा कृष्टये परमानंदाय
स्तु॥ किंभूतः स्वर्भानो राहोः प्रतिवारं पौनःपुन्येन यत्पारणं चर्वणं तस्यैव गिलनं तेन तत्र वा मिलनसंलग्नो योदंतौघस्तद्रूपं यंत्रं
छिद्रकरणसाधनं तस्मादुद्भवो यस्यास्साश्चन्द्रली दंतव्रणान्वितविवरं परालयात तस्याः संक्रांत्या पतयालु पतनशीला
दीधितिसुधा किरणामृतं तद्रूपः सारः श्रेष्ठभागो यस्य दीधितिसुधाया आसारो धारासंपातो दीधितिसुधारूपो वा। आसा
रो यस्य सः अत एव पुष्पेषोः सनस्य पुष्पधनुषस्तत्प्रियायारतेश्च परिणयानंदो विवाहरूपानंदस्तत्संबंधिन्यभिषेको तस्य
वि महाभिषेकोऽर्थं प्राप्ता सहस्रधारस्य सहस्रच्छिद्रगलधारस्य कलशस्येव श्रीः शोभा येन सः॥ महोत्सवे हि सहस्रधारेण सुव
र्णनलशेन महाभिषेकः क्रियते तथा चराहुदंतक्षतच्छिद्रपरंपरागलदमृतधाराश्चन्द्रो गलज्जलधारसहस्रच्छिद्रसुवर्ण
कलशाद्वन्मो भवान्। सर्वोत्कृष्ट वर्णनयोक्तविधत्वकृतत्वजया च सुरतप्रवृत्तयोरावयो रुद्दीपकतया परममानंदं कुर्या
दिति भावः॥ एतेन तत्समये वितरति कामविवाहोत्सवाभिधानेन चंद्रोस्तु न स्तुष्टइत्यनेन च विलासिनानलेन स्वनिर्वृत्तिः
तीयकरूपार्थ पपोधिपीयूषरसास्वादनलालसा त्विव्यज्यते। सुधाधार इत्यपि पाठे दीधितिसुधाया धाराय स्य सुधा
या आधार इति वा। आनंदपदेन कृष्टयेऽस्त्वित्याशिषा च ग्रंथसमाप्तिं द्योतयति। महाभारतादौ वर्णितस्यास्तु नरनलचरि

नै०टी०८२

त्वस्यनीरसत्वान्नायकाभ्युदयवर्णनेरसस्त्वंगसद्भावाच्चकाव्यस्यबहुदहृदयाह्लादनफलत्वाच्चात्रोत्तरचरित्रं प्राह
र्विराणनवर्णितमित्यादि ज्ञातव्यं॥नइतिपदच्छेदः स्मरोहृद्योपाश्चेतिछित्त्वैपिवज्ञवचनं॥५॥श्रीहर्षमिति॥ द्वाविंशतेहरणेस
र्गान्तः॥समाप्तिं प्राप किंभूतस्य श्रीहर्षस्यन्नवीयः साहसांकोनामराजातस्य चरित्रे विषयेश्वं रंगचपद्यंमयीकथांक
रोति॥तिन्नवतस्यनिर्मितनवतः॥सोपित्रं शायेनकृतइतिस्त्वयते॥नृपसाहसांकेतिपाठेनृपश्चासौसाहसांकश्चतस्यगौ
डेंद्रस्यचरित्रेविषयेवं रचितः॥भोजराजस्यविक्रमार्कस्य वेतिकेचित्॥द्वाविंशःपूरणेडटि ति विंशतेरितितिलोपः॥५१
यथेति॥यथापरमरमणीयाभिरमणीभूनस्तरुणस्यकामिनोंतःकरणहरणंकुरुतेतद्वत्तथाकुमाराणांबालिशा
नांकमलानामत्रेण परमपुरुषार्थप्राप्तिमनिमन्यमानानामनुभूतकामसुखानांचित्तंस्ववशंकैवकुरुतेपिनकापितथे
यंकाव्यस्यरचनारूपापरमरमणीयामङ्गक्रिमपिश्रवणमननादिवशात्सुधीनृपामृतत्वंप्राप्यसुधियःसकलदूषणनिर
हस्यचेदिनोतिसरसस्यपंडितस्यचेतश्चेद्यदिमदयति॥आनंदयतितर्हस्याःसुधियात्पादृतायामङ्गकैःअरसानी
नीरसानां॥सर्वथैवसंस्पष्टरसराहित्याभ्यानामपिवलद्दुपलप्रायाणांमटणादीपुच्छपशूनांपुरुषाणांमनादरभरेस
कृताघ्रणासम्हेहेः किंनामस्यात्अपितुनकिंचिदप्यस्यास्तैरपकर्तुंशक्यते॥सुधीभिरादरेकृतेसतिनीरसैरकृते

६२

ऋतेव्याप्यादरेणकिंचिदित्यर्थः॥सुधीभिरादृतत्वात्सकलगुणप्रपूर्णातिसरसेयंमदुक्तिरितिभावः॥मदुक्तेःसुधारूपत्व
भावात्तत्तोदानंतरंवसरसत्वप्रतीतेःसुधात्वात्सुधीभिरादृयेतिभिःसुधियइतिजात्यभिप्रायेणैकवचनापिसुधीयत्त्रादरेऋतेमह
ज्जैरेवंचऊर्मिरप्पज्ञैरनादरेस्खलतेक्षपिनकिंचिन्नवमित्यभिप्रायेणवायूनइतिप्रतिये॥गिनएकवचनांतत्वाच्चैववचने
कवेःस्वयंथमुद्दिश्यपयस्मुक्ति॥(प्र)॥कविरयंतिरोक्त्यास्वीयामुक्तिंवर्णयति॥दिशीति॥गिरिःग्रावाणोऽद्रिपाषाणाःदिशि
दिशिस्वांनिजांसरस्वतींनदीमंतर्गतजलप्रस्रवणानांचमंतुमुंचंतु॥आपातःस्तामस्त्येनपतनंस्फुरत्प्रकाशमानःध्वनि
डंबरःशब्दाडंबरोयस्यांतांचनदींमिथोऽन्यनद्यासमंमिथस्तुलयतुसमीकरोतु॥अविसर्गांतिपाठेआपातेनसमंतादू
र्ध्वदेशादधःपतनेनप्रकाशमानःशब्दाडंबरोयस्यांतांअन्यनद्यासमंसमाकरोतु॥जनइत्यर्थः॥अथवापातिप्रथमारंभस्य
स्फुरत्प्रपातघोषांतांजनोमिथस्तुलयतु॥उभयव्याख्यानेपिपरिणामितुननदीत्वंतस्याःशब्दाडंबरश्चैरंतनइत्यर्थः॥स
द्वीरोदस्वान्परंकेवलमपरःनविद्यतेपरःउत्कृष्टोयस्मात्सर्वोत्कृष्टोध्वान्यएव॥यतःयस्यद्वीरोदस्येदंयंदीयंअमृतमे
तादृशसुदीयते॥उत्पद्यते॥कोदृशांमथितुदेवादेःस्वेदच्छेदिमथिनजनितक्लेशापहं॥तथाप्रमोदनंनितरांमानंददा
यितथाऽत्रोदनंनक्रमास्वाद्यसिद्धान्नरूपं॥अथस्वैवंत्तंपरमुत्कृष्टंअमृतंयदयसुदीयतेसद्वीरोदत्वनपरःपरोऽन्यो

नास्ति किंत्वेक एव॥ अथच प्रतिदिशं सर्वदेशेषु गिरिचारणां विषये पाषाणतुल्या जडा अनेके कवयः स्वीयां वाणीं गुञ्जि
रंतु॥ आपातेन प्रतिभीमात्रे न स्फुरन् ध्वन्याख्याकाव्यविशेषस्याडंबरो यस्यां प्रथमारंभ एव स्फुरन् शब्दाडंबरेणुभा
सोयत्र तां वावाणीं मन्योन्यं जनः समीकरोतु॥ तस्य कवेरुक्तिरस्य वास्य च तस्य चेत्येवं तुलयतु आपात इति विसर्ज
नीयांतपाठे आपातप्रतिभासो तां तुलयत्वित्यर्थः॥ एवंविधे परं काव्यामृतं यदीयमुत्पद्यते स क्षीरसमुद्रतुल्यः श्रीह
र्षकविरपरो नास्ति किंत्वेक एव॥ अन्ये कवयः पर्वतग्रावतुल्याः अहं श्रीहर्षस्तु क्षीरसमुद्रतुल्य इत्यर्थः॥ यथा क्षीर
सागरो नीरार्थिनोपि तीरमात्रस्थान् क्षीरेण तर्प्पयति॥ लक्ष्मीकौस्तुभामृतादिभिः परमानंददायिभिः कृतार्थयति॥ म
दीयकाव्यविचारकस्यैव वक्षेयो वेतुल्येपादछेदिप्रमोदने च वचनामृतमुत्पद्यते नान्यकाव्यविचारकस्येत्यन्ये ग्रावतु
ल्याः क्षीरोदतुल्यश्चाहमिति भावः॥ पद्य॥ इदानीं प्रस्तादरूपमुखगुणाभावादतिदुर्बोधत्वादकाव्यमिति ये वदंति तच्छे
कामपनुदन् खलदर्पदलनार्थं गुरुसंप्रदायेन विना दुर्बोधमित्युपति गांभीर्यप्रतिपादनार्थं च बुद्धिपूर्वमेव मयेदं का
व्यं तत्र तत्र दुर्बोधं व्यरचीत्याह॥ ग्रंथेति॥ आत्मानं प्राज्ञं मन्यते प्राज्ञंमन्यं मनो यस्यैवंविधो ऽस्मिन् काव्ये हठेन स्वीयप्र
ज्ञाबलेन पठितमास्याशक्तीति पतित्तीदं काव्यस्य पाठकः खलो मा खेलतु किमत्रास्ति अश्रुतमिव व्याकर्तुं शक्यते इ

स्यवज्ञा सर्वं दर्पान्निबन्धं किं मा कार्षीदित्येवमर्थे इह काव्ये क्वचित्क्वचिदपि तत्र तत्र स्थले मया प्रयत्नाद्बुद्धिपूर्वं ग्रंथग्रंथिपि
र्ग्रथ्यमानः शब्दार्थकुटिलिकाभ्यासि विन्यस्ता॥ खलमुखवनं गार्थं बुद्धिपूर्वमेवेदं काव्यं मया दुर्बो[illegible]धं स्मरसि नतु प्रसन्न
काव्यकरणशक्त्येत्यर्थः। क्वचित्क्वचिदपीत्यनेन तत्र प्रसन्नता पुरुस्तीति न काव्यत्वहानिरिति सूच्यते। सज्जनस्य तु ग्रंथविवे
तोपायमाह श्रद्धेति॥ श्रद्धया गुरुदेवत्ते कवुद्ध्या श्रद्धेन सञ्जितेन गुरुणा सर्वमश्लथा अपि श्लथाः कृता व्याख्यया सुबोधाः कृता
दृढाः स्वरूपतो दुर्बोधा ग्रंथग्रंथयो यस्मै सद्गुरुसंप्रदायावगतार्थः। स एव दर्पवाहित्वा सज्जनः साधुः। एतत्काव्यस्य रसोर्मिरम्य
तलहरीतस्यां मज्जनं तज्जनितसुखेषु परमानंदेषु आसमंतात् ज्ञविन सज्जनं अवस्थानं समासादयतु प्राप्नोतु गुरुपरंप
रयापि विना एकस्यापि पद्यस्यार्थं बोद्धुं न शक्यते तस्माद्गुरुपरंपराया एवाध्येयमिदं काव्यमित्यर्थः। यश्चेदं गुरुपरंपराया
अधीते स सततं सुखी भवतीति महाकवित्तस्याशिषं ददाति॥ अस्मिन्प्रगितीक्रम्ये विषयस्येति कर्मणि सप्तमी॥ आराध्ये
तिराध्वेरवदान्तत्यादि दुन्नाव॥ ५४॥ इदानीं पंडितानंदनन्द्वारा स्वकृते स्वदयमाहास्ते॥ तांबूलेति॥ यः कन्यकुब्जेश्व
रात्सकाशात् संकल्प पंडिताधिकं व्यंजनं तांबूलद्वयं विद्वद्घोऽसमासनं च लभते। न केवलं राज्ञः स्तुप एव किंतु यः समा
धिषु अष्टांगयोगेषु ...ध्येषु ध्यानेषु वा विषये प्रमोदार्णवं परमानंदस्वरूपं पवागाद्यगोचरं ब्रह्म साक्षीकुरुते॥ नपरं

नै०टी० २२

सर्वोक्तिगुणावशि — — — हा विदेवर्किं तु यदीयं काव्यं मधुवर्षि श्रितिसरसत्वादमृतवर्षि। न परं सर्वविशेषण
— — — — श्लो॰ अतिसरसो महाकविरेव किं तु तर्कशास्त्रे घर्षियस्योक्तय: धर्षिता: पराभूता परे
या निस्तीर्णदर्प:॥ तस्यापि इच्छक चूडामणे: श्री हर्षकवेरीयं काव्यरचनारूपा च — — — — — — सुधीयो
मुदे आनंददायास्तु दीयात् कृतिमानंदं कुर्वता सत्पा कल्पमति यादित्यादी: सर्वत्र यच्छब्दनि
र्वाहो गुणएव। अस्तु दीयादिति गता वितस्य रूपं संत: सं तु परप्रयोजनकृत: कल्पद्रुमं त: सदा सस्मि
न्नेव पथि प्रवर्तनपरा: सत्कीर्त्ति — श्चापरे। अन्ये निस्पृहता: श्रितश्रुतिपथादीर्घं तु नव्याशाश्रया काकं त: कलह
प्रिया: खलजना जायंतु जीवंतु वा॥१॥ वासना मस्य रामस्य किं करस्य जगत्पते॥ नो चेत्सर्वरिया: कल्पिता कल्पस्य
तव किं करा:॥ ॥इति श्री वेदरकरोपनाम श्रीमन्नृसिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे द्वाविंशति
सर्ग:॥ ॥२२॥ ॥छ॥ ॥श्री:॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥समाप्त:॥
मुन्यंकनृपसद्वर्षे फाल्गुनासितत्रं केरे। शुक्रे देवो नैषधीयव्याख्यां सम्यक् व्यलीलिखत्॥१॥ ॥शुभं भवतु॥